सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

६० वर्षे
३-४ अङ्कौ

मार्गशीर्ष-फाल्गुन-पूर्णिमे
दिसम्बर-मार्च, २००५-२००६ ई.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

सम्पादकौ

डॉ. राजारामशुक्लः
निदेशकः, अनुसन्धानसंस्थानस्य

डॉ. हरिश्चन्द्रमणित्रिपाठी
निदेशकः, प्रकाशनसंस्थानस्य

६० वर्षे
३-४ अङ्कौ

वार्षिकं मूल्यम् - १०० रूप्यकाणि
दिसम्बर-मार्च, २००५-२००६ ई.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परामर्शदातृसम्पादकमण्डलम्

प्रो. अशोककुमारकालिया, कुलपतिः, अध्यक्षः

१. **प्रो. गिरिजेशकुमारदीक्षितः,**
वेदवेदाङ्गसङ्कायाध्यक्षः

२. **प्रो. सर्वेश्वरराजहंसः,**
दर्शनसङ्कायाध्यक्षः

३. **प्रो. रमाशङ्करमिश्रः,**
साहित्य-संस्कृति-सङ्कायाध्यक्षः

४. **प्रो. रमेशकुमारद्विवेदी,**
श्रमणविद्या-सङ्कायाध्यक्षः

५. **प्रो. कृष्णचन्द्रदुबे,**
आधुनिक-ज्ञान-विज्ञान-सङ्कायाध्यक्षः

६. **डॉ. राजारामशुक्लः,**
संयोजकः

❖ ❖ ❖

प्रकाशकः —
डॉ. हरिश्चन्द्रमणित्रिपाठी
निदेशकः, प्रकाशनसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी - २२१००२

मुद्रकः —
श्रीजी प्रिण्टर्स
नाटी इमली
वाराणसी - २२१००२

प्राप्तिस्थानम्—
विक्रय-विभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी-२२१००२

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयानुक्रमणी

१. कातन्त्रीयव्याख्यासु पतञ्जलिमतानां प्रामाण्यम्
प्रो. जानकीप्रसादद्विवेदः १८३-१९६

२. अधिकारसूत्रसमीक्षा
डॉ. भगवतशरणशुक्लः १९७-२१०

३. शुक्लयजुर्वेदमन्त्रसंहितायां नक्तमिति पदे ककारद्वित्वस्य विचारः
श्रीमान् आमोदवर्धनः कौण्डिन्न्यायनः २११-२२२

४. अद्वयद्वयसद्वपुः शिवः
डॉ. कमलेशझाः २२३-२४८

५. षट्त्रिंशत्तत्त्वसन्दोहविमर्शः
डॉ. हरेरामत्रिपाठी २४९-२६०

६. भक्तिप्रपत्त्योः स्वरूपविवेचनम्
डॉ. जयप्रकाशनारायणत्रिपाठी २६१-२७०

७. प्राच्यदृष्ट्या भूगर्भशास्त्रस्य समीक्षणम्
डॉ. सदानन्दशुक्लः २७१-२८४

८. संस्कृतवाङ्मये नारीणां वैशिष्ट्यम्
प्रो. रमाशङ्करमिश्रः २८५-२९८

९. पञ्चमो नाट्यवेदः
डॉ. (श्रीमती) प्रीतिसिन्हा २९९-३१०

१०. संस्कृतवाङ्मये प्राणिविज्ञानम्
डॉ. रामाशीषपाण्डेयः ३११-३२६

११. ध्वन्यर्थविचारः
डॉ. शिवरामशर्मा ३२७-३३२

१२. धर्माभिवृद्धये नैमिषारण्यस्य महत्त्वम्
डॉ. व्यासमिश्रः ३३३-३३६

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१३. **श्रीमद्वाल्मीकीयरामायणानुसारं श्रीलक्ष्मणस्य चरितम्**
श्रीविनोदप्रसादमिश्रः ३३७-३४२

१४. **भक्तितत्त्वविमर्शः**
श्रीराजेश्वरद्विवेदी ३४३-३५०

१५. **बौद्धधम्मे तिसिक्खाय महच्चं**
प्रो. ब्रह्मदेवनारायणशर्मा ३५१-३५६

लघु-ग्रन्थमाला

१. **वैदिकतान्त्रिकाधिकारनिर्णयः**
श्रीकाशीनाथभट्टः
सम्पादकः - डॉ. शीतलाप्रसाद-उपाध्यायः १-११

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

६० वर्षे	मार्गशीर्ष-फाल्गुन-पूर्णिमे, वि.सं. २०६२	३-४ अङ्कौ

कातन्त्रीयव्याख्यासु पतञ्जलिमतानां प्रामाण्यम्

प्रो. जानकीप्रसादद्विवेदः
शब्दविद्यासङ्कायाध्यक्षचरः
केन्द्रीयोच्चतिब्बतीशिक्षासंस्थानस्य
सारनाथ, वाराणसी

***

पाणिनीयव्याकरणे न केवलं पाणिनेरभिमतानां किञ्च तदपेक्षया वार्तिककारस्य कात्यायनस्याभिमतानामुक्तानुक्तदुरुक्तचिन्तासंवलितत्वादधिकं प्रामाण्यमङ्गीक्रियते। ततोऽप्यधिकं च सर्वातिशायि प्रामाण्यं मन्यते महाभाष्यकारस्य पतञ्जलेराक्षेपसमाधानपराणामभिमतानाम्। **'यथोत्तरं मुनित्रयस्य प्रामाण्यम्'** (म.भा. प्र. १/१/२८) इति वचनेन प्रदीपकारः कैयटः **'यथोत्तरं मुनीनां प्रामाण्यम्'** (म.भा., प्र.उ. ३/१/८७) इति वचनेन उद्द्योतकारो नागेशभट्टश्च पाणिनीयानामिममेव हार्दमुद्घोषयति।

मया कातन्त्रव्याकरणाध्ययनानुशीलनसम्पादनसमीक्षादिकार्यानुभवबलेनेदं निश्चयेन वक्तुं शक्यते यत् कातन्त्रीयव्याख्यास्वपि विविधविषयेषु महाभाष्याकाराभिमतमेव सर्वाधिकं समादृतं दृश्यते। [१]प्राज्ञैर्निषेवितपदद्वितयो [२]गोनर्दीयः पतञ्जलिः उत्तरप्रदेशीयगोण्डाजनपदीयः, कश्मीरदेशीयः, मध्यप्रदेशीयभोपालनगरसमीपस्थगोदरमऊग्रामवास्तव्यश्च मन्यते समीक्षकैः। इदं नाविदितं विदुषां यत् पाणिनेः परं विरचितेषु व्याकरणेषु कातन्त्रं वर्तते प्राचीनं सरलं संक्षिप्तमर्थलाघवानुरूपं त्रिकं च व्याकरणम्। तदधिकृत्य वाचस्पतिशोधोपाधिसम्प्राप्तिसमनन्तरमद्यावधि नव ग्रन्था मदीयाः प्रकाशिता

---

१. शालातुरीय......जयन्ति। मुख्यशब्दस्यादिवचनत्वात् शिवस्वामिपतञ्जलिकात्यायनप्रभृतयो लभ्यन्तो। (गणरत्नमहोदधिः, श्लोकः २)।

२. म.भा. १.१.२०; म.भा., प्र. १/१/२०; १/१/२८; म.भा., प्र.उ. १/१/२०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वर्तन्ते समीक्षात्मकाः, तत्र मया बहवः सन्दर्भाः पतञ्जलि-भाष्यकार-भाष्यकृद्-भाष्यशब्दैरेतादृशाः सम्प्राप्ताः, येषां समीक्षानुसारेण तत्र तत्र व्याख्याकारैः पतञ्जलेः प्रामाण्यमधिकमङ्गीकृतम्। अत्र केचित् सन्दर्भास्तुलनात्मकाध्ययनरूपाः प्रस्तूयन्ते—

१. **'वत्सतरार्णम्'** इत्यत्र पाणिनीयव्याकरणानुसारं वृद्धी रपरत्वं च विधीयेते। कातन्त्रे अकारस्य स्थाने अरादेशोऽकारस्य च दीर्घः प्रवर्तते। तदर्थं कातन्त्रपरिशिष्टे **'ऋण-प्रवसन-वत्सतर-कम्बल-दशानामृणे'** (सन्धि.८) इति सूत्रे **श्रीपतिर्वत्सतरमेव** पाठं प्रामाणिकं मनुते। उक्तं च तेन कातन्त्रपरिशिष्टे— **'वत्सतरमनादृत्य वत्सरश्चान्द्रकाशिकादौ पठ्यते। तदिहासम्मतम् पतञ्जलिशाकटायनादीनां वत्सतरस्यैवेष्टत्वात्। तथा च तरप्रत्ययोऽत्र भाष्यादावुक्तः'** इति। प्रसङ्गेऽस्मिन् कातन्त्रवृत्तिटीकाकारो दुर्गसिंहः प्रस्तौति— **'वत्सरे वर्षे वा ऋणम्–वत्सरार्णम् इत्यन्ये'**। अत्रान्येपदेन चन्द्रगोमिकाशिकाजिनेन्द्रबुद्धिप्रभृतयो गृह्यन्ते कलापचन्द्रकारसुषेणविद्याभूषण-वचनानुसारेण। उद्धरणमिदमयुक्तमुद्घोषयति सुषेणविद्याभूषणः। सः श्रीपतिवचनमेवात्र प्रमाणं मनुते, तस्य भाष्यसम्मतत्वात्। उच्यते च तेन—

'तथा च श्रीपतिः–तरप्रत्ययोऽत्र भाष्यादावुक्त इति भाष्यचान्द्रयोर्विरोधे उभय एव प्रमाणमिति युक्तमुत्पश्यामः' (क.च. १/२/४)। 'एत्येधत्यूठ्सु' (अ. ६/१/८९) इति सूत्रव्याख्याने भाष्ये तथैव वार्त्तिकं पठ्यते— 'प्रवत्सतरकम्बलवसनानां चर्णे' इति।

२. ऊहनम् ऊहः, भावे घञ् सोऽस्या अस्तीति ऊहिनी अक्षाणाम् (रथाद्यवयवानाम्) ऊहिनीति विग्रहे, अक्षान् ऊहितुं शीलमस्या इति वा विग्रहे **अक्षौहिणीशब्दः** साध्यते। अत्र पाणिनीयव्याकरणे 'अक्षादूहिन्याम्' (म.भा. ६/१/८९—वा. ३) इति वार्त्तिकवचनेनाकारोकारयोः स्थाने वृद्धिविधानेन वार्त्तिककारः, कातन्त्रव्याकरणे च 'अक्षस्यौत्वमूहिन्याम्' (कात. दु.वृ. १/२/७) इत्यनेन वचनेन वृत्तिकारोऽकारस्यौत्वेन ऊकारस्य लोपेन च 'अक्षौहिणी'-शब्दं साधयति। अत्र णत्वं केन प्रवर्तते एतदर्थमस्ति पाणिनेः 'पूर्वपदात् सञ्ज्ञायामगः' (अ. ८/४/३) इति सूत्रम्। कातन्त्रपरिशिष्टे च सूत्रं दृश्यते 'पूर्वपदस्थात् सञ्ज्ञायाम्' (णत्व. २) इति। परं कलापचन्द्रकारो वदति यद् भाष्यकारव्याख्यानदृशा सञ्ज्ञाबलादेवात्र णत्वं भविष्यति, अतः सूत्रेण णत्वविधानमनावश्यकम्। यथोक्तम्—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'तथा च भाष्यकृता–अक्षौहिणी सेनासमूहस्य सञ्ज्ञा, अतः सञ्ज्ञैवात्र प्रमाणमिति प्रत्याख्यातमिदम्' (क.च. १/२/७) इति। वचनमेतन्मया भाष्ये नोपलब्धम्; परं मन्ये कलापचन्द्रकारेणेदमवश्यं दृष्टं भवेत् क्वचित्।

३. 'अष्टौ' इत्येतस्य शब्दस्य सिद्ध्यर्थं पाणिनीये कातन्त्रे च नकारस्याऽऽत्त्वं जश्शसोरौत्त्वं च विधीयते। एतदर्थं पाणिनिना 'अष्टन आ विभक्तौ, अष्टाभ्य औश्' (अ. ७/२/८४; ७/१/२१) इति सूत्रद्वयं पठितम्। कातन्त्रे च 'अष्टनः सर्वासु, औ तस्माज्जश्शसोः' (२/३/२०, २१) इति सूत्राभ्यामिष्टं निष्पाद्यते। अत्रेदं विचार्यते यन्नकारस्यात्त्वे कृते जश्शसोः स्थाने ओकारो भवेद् औकारो वेति, उभयथापि समानरूपेणैव शब्दसिद्धेः प्रवर्तनात्। कातन्त्रवृत्तिटीकाकारेणोच्यते यद् भाष्यकृता नेह किञ्चिद् विशिष्टं निर्दिष्टम्, तस्माद् उभयमपि प्रमाणं मन्तव्यम्। तद्यथा—**'न चैतद् भाष्यकृतापि चोदितमिति ओत्वे औत्वे वा न किञ्चिल्लाघवम्'** (कात. वृ.टी. २/३/११) इति।

४. पाणिनिना पुनः पुनः पचतीत्यर्थे पापच्यते, भृशं ज्वलतीत्यर्थे जाज्वल्यते इत्यादीनि शब्दरूपाणि साध्यन्ते 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' (अ. ३/१/२२) इति सूत्राद् एकाचो हलादेश्च पच्धातोर्ज्वल्धातोश्च यङ्विधानेन। परम् 'अट्-अश्' इत्यादिस्वरादिधातुभ्यः 'सूचि-सूत्रि'-प्रभृत्यनेकस्वरधातुभ्यश्च यङ्प्रत्ययस्याप्रवृत्तौ 'अटाट्यते-अरार्यते-सोसूच्यते-सोसूत्र्यते'-प्रभृतय इष्टाः प्रयोगा नैव साधयितुं शक्यन्ते। तेषामपि साधुत्वमुपपद्येतेत्येतदर्थं कातन्त्रकारेण सूत्रं कृतम्—'धातोर्यशब्दश्चेक्रीयितं क्रिया-समभिहारे' (३/२/१४) इति। तेनानेकस्वरघटितेभ्य एकस्वरघटितेभ्यश्च धातुभ्यो यप्रत्यये कृते 'सोसूच्यते'-प्रभृतीनि शब्दरूपाणि निष्पद्यन्ते।

पूर्वसूत्रप्रोक्तव्यञ्जनशब्दानुवृत्त्या प्रवृत्तायां बाधायामभिधानादेषां साधुत्वमङ्गीक्रियते। अभिमतस्यास्य समर्थने भाष्यकृद्वचनमुद्ध्रियते कलापचन्द्रकारेण—**'भाष्यकृता अभिधानादनेकाचोऽहलादेरित्युक्तम्। स्वमतेऽप्यभिधानादेव भविष्यति'** (क.च. ३/२/१४) एतत्पक्षीयं 'धातोरेकाचो' (अ. ३/१/२२) इति सूत्रमधिकृत्य प्रवर्तितं भाष्यव्याख्यानं विस्तरेणोपलभ्यते। वस्तुतः पक्षोऽयं भाष्यकारमतमेवावलम्ब्य कातन्त्रव्याख्याकारैरङ्गीकृतः। पदकाररीत्या च समाधानान्तरमेव दृश्यते। यथोक्तम्—**'एतत्तु भाष्यकारमतमवलम्ब्योक्तम्, पदकारस्त्वेषां धातूनां विषयसप्तमीमाश्रित्य प्रयोगाः सिध्यन्ति, किमेषामुपादानेनेत्याचष्टे'**। (क.च. ३/२/१४) इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

५. संहितैकपदे नित्या नित्या धातूपसर्गयोः।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते।।

(क.च. १/२/१५) इति सन्धिविषयकं वचनं प्रसिद्धम्, तदनुसारं समासे नित्यसन्धिरपेक्ष्यते। परम् 'उच्चारितरुचिरऋचां चाननानाम्, हिमऋतावपि ताः स्म' इत्यादिवचनेषु समासेऽपि सन्ध्यभावो दृश्यते। तत्र का सरणिः समादरणीया साधुत्वासाधुत्वविषये इत्यत्र कलापचन्द्रकारो व्याचष्टे यद् भाष्यदृशा समासमात्रे प्रकृतिभावो न जायते। अर्थात् नित्यसमासो भवेद् विकल्पसमासो वोभयत्रापि प्रकृतिभावस्य प्रतिषेधः प्रवर्तते। तेनोक्तप्रयोगाणामसाधुत्वमेवावधारणीयम्। यथोक्तम्—

'भाष्यचान्द्राभ्यां समासमात्रे (प्रकृतिभाव-ह्रस्व-) प्रतिषेधस्योक्तत्वात्। न हि तेषामनित्यसमास इत्यादि। प्रकृतिह्रस्वयोर्नित्यसमासे निषेधः, अनित्यसमासे विकल्प इति वार्त्तिकम्। तद् दृष्ट्वा श्रीपतिनापि तथैव निर्णीतमिति किं तेन पाणिनिकात्यायनभाष्यकाराणामुत्तरोत्तरप्रामाण्यमिति स्मृतेः। तदुक्तं न्यासकृता–मुनिद्वयातिशायिनो भगवतो भाष्यकारस्य वचनं कथमुपेक्षामहे इति। अतो भाष्यकारविरोधेन तेषामपप्रयोगादिति भावः' (क.च. १/२/१५) इति।

६. **'अर्वन्तौ, अर्वन्तः, मघवान्, मघवन्तौ'** इत्यादि-शब्दरूपसिद्ध्यर्थं पाणिनिना 'अर्वणस्त्रसावनञः, मघवा बहुलम्' (अ. ६/४/१२७, १२८) इति सूत्राभ्यां तृ–इत्यन्तादेशविधानं नुमागमविधानं च स्वीक्रियते। अत्र भाष्यकारेणोच्यते—'अर्वणस्तृ मघोनश्च न शिष्यं छान्दसं हि तत्' इत्यादि। एतेनोक्तसूत्रद्वयं न करणीयं छान्दसप्रयोगाङ्गीकरणात्। यदि भाषायामपि प्रयोग उपलभ्येत तदा सूत्रकरणं स्यात् सार्थकमिति। प्रदीपकारेणोद्द्योतकारेण चेदं समर्थितम्।

कातन्त्रकारेणोक्तरूपाणि 'अर्वन्ति-मघवन्तु' इत्यादेशद्वयविधानेन साध्यन्ते—'अर्वन्नर्वन्तिरसावनञ्, सौ च मघवान् मघवा वा' (कात. २/३ २२,२३) इति सूत्राभ्याम्। अत्र कातन्त्रवृत्तिटीकाकारेणोच्यते—**'छन्दस्येतौ योगाविति भाष्यकारो भाषते। शर्ववर्मणस्तु वचनाद् भाषायामप्यवसीयते'** (कात.वृ.टी. २/३/२३) इति। तेन मघवद्वृत्रलज्जानिदानाख्यग्रन्थस्यो-दाहरणमपि प्रस्तूयते—'श्लथीकृतप्रग्रहमर्वतां व्रज' इति। इदमवश्यमवगन्तव्यं यत् **कातन्त्रकारेण केवलं लौकिकानामेव शब्दानां साधनार्थं सूत्राणि प्रणीतानि, न तु वैदिकशब्दानां**

CC-0. Sampurnanand University Collection. Digitized by eGangotri

साधनार्थम्। तेनोक्तप्रयोगनिष्पत्तये सूत्रप्रणयनादवश्यं तेन भाषायामपि प्रयोगो दृष्टः स्यादित्येतत् तात्पर्यमधिगम्यते। अथ च भाष्याभिप्रायानुसारं सूत्रप्रणयनमपि तदर्थं सार्थकमेव मन्तव्यम्।

७. **'मातुः स्मरति, मातुः स्मर्यते'** इत्यादौ पाणिनीये 'अधीगर्थदयेशां कर्मणि' (अ. २/३/५२) इति सूत्रेण कर्मणः शेषत्वविवक्षायां षष्ठी विधीयते। पाणिनिना 'षष्ठी शेषे' (अ. २/३/५०) इति यत् सूत्रं कृतम्, तत्र शेषपदेन कर्मादीनामविवक्षा गृह्यते भाष्ये। तेन यदा कर्म विवक्षितं भवति, तदा 'स्मराम्यहं मातरम्' इत्यादौ षष्ठी न प्रवर्तते, अविवक्षिते पुनः कर्मणि षष्ठी प्रवर्तते। एवमविवक्षिते कर्मणि अर्थात् सम्बन्धे षष्ठी, विवक्षिते कर्मणि च द्वितीयैव विज्ञेया।

कातन्त्रे शेषाधिकारो नास्ति, तर्हि कर्मणोऽविवक्षा ग्रहितुं न शक्यते 'स्मृत्यर्थकर्मणि' (२/४/३८) इति सूत्रे अविवक्षाया अभावे सर्वथा कर्मत्वाभावः कर्मत्वाभावेऽप्रवृत्ते च 'मातुः स्मर्यते' इति भावे प्रत्ययो न स्यात्, सर्वथाऽकर्मकादेव भावाख्यातप्रत्ययस्येष्टत्वात्। विषयेऽस्मिन् कातन्त्रपरिशिष्ट-कारेणाविवक्षार्थो व्याख्यातः, तस्य समर्थनाय कलापचन्द्रकारेणोक्तं यद् **'भाष्यकाररीत्यैव ग्रन्थो व्याख्येयः'** (क.च. २/४/३८) इत्यादि।

८. किम्-शब्दात् 'वा ह चच्छन्दसि' (अ. ५/३/१३) इति सूत्रेण हप्रत्ययं विधाय छन्दसि **कुहशब्दो** निष्पाद्यते पाणिनिना। पक्षे 'किमोऽत्' (अ. ५/३/१२) इति सूत्रेण त्रलोऽपवादम् अप्रत्ययं विधाय 'क्व' इति प्रयोगः साध्यते। अत्र काशिकाकारेणोच्यते—**'त्रलमपि केचिदिच्छन्ति–कुत्र। तत् कथम् उत्तरसूत्राद् वावचनं पुरस्तादपकृष्यते'** (काशिकावृत्तिः-५/३/१२) इति। एतेन 'कुत्र' इत्येतस्यापि प्रयोगस्य साधुत्वमुपपद्यते। परं त्रल्प्रत्ययस्यापवादरूपो यदि हप्रत्ययः स्वीक्रियते, तर्हि कुत्रेति प्रयोगस्यासाधुत्वमेव स्यात्। केचिदत्र वदन्ति यत् कुहशब्दवत् कुत्रशब्दस्यापि छन्दस्येव साधुत्वं न पुनर्भाषायाम्, तदर्थमुद्द्योतकारो व्याचष्टे—**'कस्मिन् कुत्रेति। वा ह चच्छन्दसि इत्यत्र वेति योगविभागाल्लोकेऽपि किमस्त्रलिति भावः। न च छान्दसमेव भाष्ये उदाहृतमिति भ्रमितव्यम्'** (म.भा., प्र.उ. ५/३/७) इति। कातन्त्रटीकाकारो दुर्गसिंहः 'किमः' (२/६/३१) इति सूत्रव्याख्याने वदति—**'कुत्रेति कैश्चिदिष्यते। भाष्यकारस्य पुनरसाधुरेव'** इति। कलापचन्द्रकारेणाभिमतमेतत् समर्थ्यते। परं 'सप्तम्यास्त्रल्' (म.भा. ५/३/१०) इति सूत्रव्याख्याने भाष्ये 'कुत्र' इति शब्दरूपं पठितमुपलभ्यते। एतेन तस्य सर्वथाऽसाधुत्वं नावगम्यते,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

किञ्च तस्य न केवलं छन्दस्येव साधुत्वम्, अथ च भाषायामपि तस्य साधुत्वमङ्गीकरणीयमिति भाष्यकारस्याशयो भवेत्।

९. **'रुणद्धि-भिनत्ति'**-प्रभृतयः प्रयोगाः पाणिनीये श्नम्विकरणेन कातन्त्रे च नविकरणेन साध्यन्ते। प्रकृतिप्रत्यययोर्मध्यपाती भवति विकरणः। एतेन स प्रकृतिप्रत्ययार्थे साहाय्यमेवाचरति, न त्वर्थान्तरं किञ्चित् प्रकाशयति। अर्थाद् रुणद्धीत्यादौ कर्तृरूपार्थो नविकरणेन समायाति, अत इहान्विकरणस्य प्रवृत्तिर्न जायत इति कातन्त्रवृत्तिकारो दुर्गसिंहः परिभाषते। अत्र विवरणपञ्जिकाकारस्त्रिलोचनो व्याचष्टे यत् प्रकृतिप्रत्ययाभ्यां प्रकृत्यर्थविशिष्टः प्रत्ययार्थः प्रतिपाद्यते। यदाह भाष्यकारः—'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः' इति। तस्मिंश्च ताभ्यां प्रतिपाद्येऽर्थे विकरणानामर्थान्तरानिवेशत्वात् साहाय्यमेवार्थः। स च नशब्देनैव कृत इत्युक्तार्थत्वादन्विकरणो न भवतीत्यादि।

कपालचन्द्रकारस्य सुषेणविद्याभूषणस्य वचनानुसारेण आख्यातस्य क्रियाप्रधानत्वे उक्तो भाष्यकारसिद्धान्तः सङ्गतो न भवेत् तर्हि वृत्तिकारादिभिः कथं स स्वीकृत इत्यत्र समाधानमुपस्थाप्यते—**'ननु कथमेतत्, यावता आख्यातं क्रियाप्रधानमित्यस्त्येव? सत्यम्। भाष्यकारमतमवलम्ब्योक्तम्। स्वमते आख्यातेऽपि प्रत्ययार्थान्वितस्वार्थबोधकत्वं (प्रकृतेः) अङ्गीकर्तव्यमिति संक्षेपः'** (क.च. ३/२/३६) इति।

१०. पाणिनीये कातन्त्रे च व्याकरणे पाकार्थकस्य श्राधातोः श्रपिधातोश्च क्तप्रत्यये कृते तयोः स्थाने निपातनेन श्रादेशं विधाय **श्रृतमिति** प्रयोगो निष्पाद्यते। निपातनमिदं क्षीरहविषोरेव वक्तव्यमिति भाष्यकारीयवचनानुसारेण श्राणा यवागूः श्रपिता यवागूरित्यत्र श्रादेशो नैव निपात्यते। अपि च 'श्रपेः श्रृतमन्यत्र हेतोरिति वक्तव्यम्' (म.भा. ६/१/२७—श्रृतं पाके) इति वचनानुसारेण 'श्रपितं क्षीरं देवदत्तेन' इत्यादावपि निपातनं नैव प्रवर्तते, प्रयोजकस्य हेतोः पक्तृलक्षणप्रयोजकव्यापाराङ्गीकारात्। इदमेवोक्तं कातन्त्रवृत्तिपञ्जिकाकारेण त्रिलोचनेन—**'न तु हेत्विनन्तस्यायं निपात इष्यते यदाह भाष्यकारः–श्रपेः श्रृतमन्यत्र हेतोः'** (म.भा. ६/१/२७) इत्यादि। एतदर्थं पाणिनीये कातन्त्रे च समानमेव सूत्रं क्रियते—'श्रृतं पाके' (अ. ६/१/२७; कातन्त्र. ४/१/४४) इति।

११. अग्रे-प्रथम-पूर्वेषु उपपदेषु सत्सु भुजादिधातुभ्यः पाणिनीये णमुल्प्रत्ययेन कातन्त्रे च णम्प्रत्ययेन **अग्रेभोजं व्रजतीत्यादयः** प्रयोगाः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

साध्यन्ते। तदर्थं पाणिनीयं सूत्रमस्ति—'विभाषाग्रेप्रथमपूर्वेषु' (अ. ३/४/२४) इति। कातन्त्रे चापि समानमेव सूत्रं वर्तते—'विभाषाग्रेप्रथमपूर्वेषु' (४/६/६) इति। अत्र कातन्त्रवृत्तिटीकाकारेण विचार्यते—अग्रादिशब्दैरेव यदि पूर्वकालता बोध्यते, तर्हि क्त्वाप्रत्ययो न विधातव्यः स्यात्—पूर्वं भुङ्क्ते व्रजतीत्यादिप्रयोगाः स्युः। अस्य समाधानार्थं भुजिव्रज्योः साधनपौर्वकाल्यमङ्गीक्रियते। अर्थात् कर्ता देवदत्तादिः पूर्वं भुङ्क्ते ततो व्रजिक्रियया सह तस्य सम्बन्धः क्रियते। अभिमतं कातन्त्रवृत्तिटीकाकारेण दुर्गसिंहेन भाष्यकारस्याङ्गीकृतम्। अत एवोक्तं तेन—

'भाष्यकारमतमेतत्। सूत्रकारमतं तूक्तानामपि स्वरूपानुवादकतया प्रयोगो दृश्यते' (कात.वृ.टी. ४/६/६) इत्यादि।

१२. 'कुमारी+अत्र, नदी+अत्र, नदी+अम्भः' इत्यादावनित्यसमासे पाणिनिना 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' (अ. ६/१/१२७) इति सूत्रेण प्रकृतिभावं ह्रस्वं च विधाय 'कुमारि अत्र, कुमार्यत्र' इत्येतादृशं रूपद्वयं साध्यते। अत्र ह्रस्वस्यैव प्रकृतिभावो मन्यते, परं कातन्त्रपरिशिष्टे 'तौ नामिनोऽसवर्णे' (कात. परि., सन्धि. २८) इत्यनेन प्रकृतिभावह्रस्वयोर्विधानेन 'कुमारी अत्र, कुमारि अत्र, कुमार्यत्र' इत्येतादृशं रूपत्रितयं निष्पाद्यते। 'वैयाकरणः, सौवश्वः, कुट्यर्थः, जान्वर्थः' इत्यादौ नित्यसमासे प्रकृतिभावो ह्रस्वश्च न प्रवर्तते। तदर्थं वार्तिकमस्ति—'सिन्नित्यसमासयोः शाकलप्रतिषेधः' (म. भा. ६/१/१२७, वा. १) इति।

अत्र भाष्यकारेण पतञ्जलिनोच्यते—'नित्यग्रहणेन नार्थः, सित्समासयोः शाकलं भवतीत्येव। इदमपि सिद्धं भवति वाप्यामश्वो वाप्यश्वः, नद्यामातिर्नद्यातिः' इति। अर्थात् समासमात्र एव ह्रस्वप्रकृतिभावयोर्निषेध इष्यते वाप्यश्वः, नद्यातिरित्यादिसाधनाय। अतः श्रीपतिर्भाष्यकाराभिप्रायस्योल्लेखेनात्र स्वकीयां सम्मतिमाविष्करोति। तद्यथा—'प्रकृतिह्रस्वयोर्नित्यसमासे निषेध इति वार्त्तिकम्। भाष्ये तु समासमात्रे निषेधः। चन्द्रस्यापि मतमेतत्' (कात. परि., सन्धि. २८) इति।

१३. 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' (अ. ३/१/२२) इति सूत्रेण पाणिनिर्यङ्प्रत्ययं विदधाति। यङ्प्रत्ययस्य चेक्रीयितमिति सञ्ज्ञा पूर्वाचार्याणामासीत्। यङ्प्रत्ययान्ताः शब्दा लोके प्रयुज्यन्ते, परं **यङ्लुगन्ताः शब्दाः** केवलं छन्दस्येव प्रयुज्यन्ते आहोस्विद् भाषायामपि तेषां प्रयोगः साधीयान् भवति न वेति मतभेदः प्रवर्तते विदुषाम्। कातन्त्रपरिशिष्टकारेण

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रीपतिना 'चर्करीताभ्यासस्य' (कात. परि., सन्धि. ३३) इति सूत्रेण 'अरिअर्ति' इत्यादौ चर्करीतेऽभ्यासस्वरस्य प्रकृतिभावं संसाधयता 'निर्लूरवृत्ति-चान्द्र-काशिका-जाम्बवतीविजयकाव्य-नीतिसंग्रह-भट्टिकाव्य-भाववृत्ति' इत्येतेषां सप्तग्रन्थानां पक्षो भाषायां प्रयोगविषयकः प्रस्तुतस्तत्तद्वचनोद्धरणपुरस्सरम्। तत्रादौ तेन **'भाषायामपि केचित् चर्करीतमिच्छन्ति। उक्तं हि भाष्ये-भाषायामपि यङो लुगस्ति'** (कात. परि., सन्धि. ३३) इति वचनेन भाष्याकारस्याप्यभिमतं यङ्लुगन्तस्य = चर्करीतस्य भाषायां प्रयोगपक्षानुकूलं साध्यते (मया यद्यपि वचनमिदं नोपलब्धं तथापि मन्ये तदवश्यं दृष्टं स्याद् ग्रन्थकारेण)। अर्थाद् भाष्यस्य प्रामाण्येन कातन्त्रपरिशिष्टकारः 'चर्करीताभ्यासस्य' (कात० परि०, सन्धि० ३३) इति सूत्रेण भाषायामपि चर्करीतप्रयोगाणां साधुत्वं मन्यमानस्तत्राभीष्टकार्यं निर्दिशति।

१४. 'शेषो घ्यसखि' (अ. १/४/७) इति पाणिनीयसूत्रेण सखिशब्दस्य घिसञ्ज्ञायाः, 'न सखिष्टादावग्निः' (२/२/१) इति कातन्त्रसूत्रेणाग्निसञ्ज्ञा-याश्चाभावान्न केवलं 'सख्या, सख्ये' इत्यादिरूपाणि सिद्ध्यन्ति नादेशगुणकार्यविरहितानि, किञ्च बहवः सखायो यस्य तेनेत्यर्थे **बहुसख्या,** बहवः सखायो यस्य तस्मै इत्यर्थे 'बहुसख्ये' इत्येतदपि रूपं साधु भवति। तर्हि सखायमतिक्रान्तस्येत्यर्थे 'अतिसखेः' इत्यपि प्रयोगः साधीयान्न भवेत्, कथं तर्हि तत् प्रयुज्यत इति कातन्त्रवृत्तिटीकाकारेण दुर्गसिंहेन पूर्वं तदुपस्थाप्य पश्चात् समाधानं प्रस्तूयते भाष्यप्रयोगस्य प्रामाण्यं मन्यमानेन। समाधानपक्ष एवमङ्गीकर्तव्यः—सखीं स्त्रियमतिक्रान्तस्यातिसखेरित्यत्रोपसर्जनत्वाद् ह्रस्वत्वं विधेयम्। विभक्तिविषयककार्ये लिङ्गविशिष्टपरिभाषा नाद्रियते। टीकाकारस्य वचनमस्ति—'कथमतिसखेरिति, भाष्यचोदितं चैतत्' (कात. वृ.टी. २/२/१) इति।

१५. द्वौ वा त्रयो वा परिमाणमेषामित्यर्थे बहुव्रीहिसमासे **'द्वित्राः'** इति शब्दरूपं साध्यते 'संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये' (अ. २/२/२५) इति सूत्रेण पाणिनिना, 'स्यातां यदि पदे द्वे तु यदि वा स्युर्बहून्यपि। तान्यन्यस्य पदस्यार्थे' (कात. २/५/९) इति सूत्रेण शर्ववर्माचार्येण च। अत्रेदं विचार्यते यद् यदा बहूनामानयनमीप्सितं भवेत् तदा बहुवचनमुपपन्नमेव, यदा तु खलु द्वावानीयेते तदा बहुवचनं न सिद्ध्यतीति। अत्र समाधानपक्षः प्रस्तूयते कातन्त्रवृत्तिपञ्जिकाकारेण त्रिलोचनदासेन यद् "द्वित्राः इति वाऽर्थेऽस्याभिधानम्, वाऽर्थस्तु न विकल्पः, किन्तर्हि संशयः। विकल्पे हि यदा द्वौ भवतस्तदा बहुवचनं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न स्यात्। संशये तु सदा बहुवचनं प्रयुज्यत एव। यथा 'कति भवतः पुत्राः, कति भवतो भार्याः'' इत्यादि।

पञ्जिकाकारेण स्वकीयाभिमतस्य समर्थनार्थं भाष्योक्तवचनमुपस्थाप्यते— **'तथा चोक्तं भाष्ये–अविज्ञातेऽर्थे बहुवचनं प्रयोक्तव्यमिति'** (पञ्जी. २/५/८; म.भा. २/२/२५)। विषयेऽस्मिन् बहुवचनस्योपपत्तये समाधानान्तरमपि क्रियते। तदनुसारेण द्वौ वेत्युक्ते त्रयो वेति गम्यते, त्रयो वेत्युक्ते द्वौ वेति गम्यते। एवं प्रकारेण पञ्च संख्या सम्पद्यते, तेनापि बहुवचनं युक्तमेवेति। एतत् सर्वं भाष्यभाषितं 'संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये' (अ. २/२/२५) इति सूत्रव्याख्याने उपलभ्यते।

१६. समाहारद्वन्द्वे 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' (अ. २/४/२) इत्यादिभिः सूत्रैः पाणिनिः, 'द्वन्द्वैकत्वम्' (२/५/१६) इत्यनेन सूत्रेण च शर्ववर्मा 'गङ्गाशोणम्, अहिनकुलम्, कुशकाशम्, दधिघृतम्' इत्यादावेकवद्भावम् एकवचनं वा विदधाति। 'दधिघृते, हस्त्यश्वौ, व्रीहियवाः' इत्यादिशब्दरूपाणां साधुत्वव्यवस्था शिष्टजनव्यवहारमेवाधिकृत्य मन्तव्येति तत्र तत्र व्याचक्षते कातन्त्रव्याख्याकाराः। विषयस्यास्य प्रामाण्यार्थं ते भाष्याभिमतं प्रस्तुवन्ति। यथा कातन्त्रटीकाकारो भाषते—**'दशानां समीपम् उपदशं पाणिपादम्, उपगताः समीपगता दश एषामुपदशाः पाणिपादाः। दर्शितेभ्योऽन्यत्रानियमः। एषामभिधानव्यवस्था भाष्येऽप्यादृता'** (दु. टी. २/५/१६) इति। कलापचन्द्रकारः सुषेणविद्याभूषणोऽप्येवमेव वदति। तदनुसारेण घृतादीनामर्धर्चादौ पुंस्त्वं वैदिकं मन्यते, अत एव घृतशब्दे पुंस्त्वव्यवहारं केचिदाचरन्ति; परं कातन्त्रमते व्यवस्थेयं शिष्टव्यवहारानुसारेणाङ्गीक्रियते। दर्शितेभ्यः शब्देभ्योऽन्यत्र समाहार इतरेतरयोगश्च प्रवर्तते। अत एव शिववैश्रवणौ, हस्त्यश्वौ' इत्यादीनि शब्दरूपाणि समाहारादन्यत्र संसाध्यन्ते।

१७. **'ओषाञ्चकार, विदाञ्चकार, जागराञ्चकार'** इत्यत्र पाणिनिना 'उषविदजागृभ्योऽन्यतरस्याम्' (अ. ३/१/३८) इति सूत्रेण, शर्ववर्मणा च 'उषविदजागृभ्यो वा' (३/२/२०) इति सूत्रेण आम्प्रत्ययः परोक्षायां लिटि वा परतो विकल्पेन विधीयते। अत्र कातन्त्रवृत्तिकारदुर्गसिंहानुसारेण जागर्तिना सहचरितो ज्ञानार्थको विदधातुरदादिर्गृह्यते, न तु सत्तार्थको दिवादिः, लाभार्थकस्तुदादिः, विचारार्थको रुधादिर्वेति। परमत्र टीकाकारो व्याचष्टे यद् भाष्ये साहचर्यं न चिन्तितम् इति। तेन तदीयाभिप्रायो वृत्तिकाराद् भिन्न एव प्रतिभाति। वस्तुतः साहचर्यापेक्षया लोकव्यवहारे 'विदाञ्चकार' इत्यस्य यद्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ज्ञानार्थे प्रयोगस्तदनुसारेण ज्ञानार्थक एव विदधातुरत्र ग्रहीतव्यो न तु सत्ताद्यर्थक इति।

१८. ब्राह्मणीवाचरतीत्यर्थे **'ब्राह्मणायते'** इत्यत्र हरिणीवाचरतीत्यर्थे **'हरितायते'** इत्यत्र पाणिनीये 'क्यङ्मानिनोश्च' (अ. ६/३/३६) इति सूत्रेण, कातन्त्रे च 'भाषितपुंस्कं पुंवदायौ' (३/६/६१) इति सूत्रेण पुंवद्भाव: प्रवर्तते। अत्र कातन्त्रवृत्तिकारेण दुर्गसिंहेनोच्यते पुंवद्भावोऽयं च्व्यर्थे (च्विप्रत्ययार्थे) न भवति, तत्र लोहिनीप्रभृतिशब्दानां गौणत्वात्। गौणमुख्ययोस्तावद् मुख्य एव कार्यं प्रवर्तते। अत एवालोहिनी लोहिनी भवतीत्यर्थे 'लोहिनीयते' इत्युदाहरन्ति केचित्।

कातन्त्रे येषां मते डाच्प्रत्ययान्तेभ्यो लोहितादिशब्देभ्यश्चायिप्रत्यय: प्रवर्तते, तेषां मते 'लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषया लोहिनीशब्दादप्यायिप्रत्ययो भवेदेव। तत्र च्व्यर्थे वृत्तिकारेण पुंवद्भावो न मन्यते, गौणमुख्यपरिभाषाया: प्रवर्तनात्। गौणत्वं चात्रालोहिनी-प्रकृतित्वाल्लोहिनीशब्दस्य वेदितव्यम्। परं गौणमुख्यपरिभाषाया अनित्यत्वाद् भाष्यादौ एतादृशनिदर्शनस्यानुपलब्धिवशाट्टीकाकारो वृत्तिकारस्योक्तामुत्प्रेक्षां तत्कल्पितां मन्यमान: स्वीकर्तुं नैव वाञ्छति। यथोक्तं तेन—'लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति लोहिनीशब्दादप्यायिरिति भाव:। स्वोत्प्रेक्षैषा, न च भाष्यादौ निदर्शनमस्ति, तस्या अनित्यत्वाभ्युपगमात्' (कात० वृ० टी० ३/६/६१)। अभिमतमिदं पञ्जिकाकारेण त्रिलोचनदासेन समर्थितम्—'इह पुन: पुंवद्भाव एव। भाष्येऽपि नैतद् दर्शितम्, अनित्यत्वाभ्युपगमाद् गौणमुख्यपरिभाषाया:' इति स्वकीयव्याख्यानवचनेन।

१९. **'मा भवान् करोत्, मा स्म करोत्, मा भवान् कार्षीत्, मा स्म कार्षीत्'** इत्यादौ मा-मा स्मयोगेऽडादिकार्याभावो निर्दिश्यते पाणिनिना शर्ववर्मणा च। तत्रेदमन्तरं वर्तते यत् पाणिनि: केवलं माङ्योग एवाडाद्यभावं विदधाति—'न माङ्योगे' (अ. ६/४/७४) इति सूत्रेण। परं शर्ववर्मा मायोगे मा स्मयोगे च निर्दिशति अडाद्यभावम्—'न मामास्मयोगे' (३/८/२१) इति सूत्रवचनेन। व्याख्याकाराभिप्रायानुसारेण 'मा स्म' इति निपातद्वयस्य व्यस्तनिर्देशो भवेत् संश्लिष्टनिर्देशो वा, उभयत्रापि माङ्योगवशादडाद्यभाव: प्रवर्तेतैव। परं कातन्त्रकारानुसारेण मायुक्तं स्म मा स्म इति माङ्निपाताद् भिन्नमेव वर्तते, तस्मात् सूत्रे माङ्निपातातिरिक्तं मा स्मनिपातस्यापि पाठ: कृत:। 'मा स्म' इति संश्लिष्टनिर्देश एव माङ्निपाताद् भेद: समायाति,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तस्मादुभयोर्निर्देशो नितान्तमपेक्ष्यते। एतस्य समर्थनाय कातन्त्रवृत्तिटीकाकारेण भाष्याभिमतमुद्धृतं यत् **'संश्लिष्टनिर्देशोऽयं भाष्यसम्मतः पक्षः'** (कात. वृ. टी. ३/८/२१) इति। परं 'मास्मयोगे ह्यस्तनी च' (३/१/२३) इति सूत्रव्याख्याने टीकाकारो वदति—**'परोऽपि कश्चिदाचष्टे स्म उत्तरोऽधिको यस्मान्माशब्दादिति। भाष्यकारेण तु न चिन्तितमेतत्'** (दु.टी. ३/१/२३) इति। मया सम्बद्धसूत्रभाष्ये एतादृशं वचनं नोपलब्धम्।

२०. **'शिष्टः, शिष्टवान्, शिष्यते'** इत्यादौ 'शासिवसिघसीनां च' (अ. ८/३/६०; कात. ३/८/२७) इति सूत्रणोभयत्र सकारस्य स्थाने मूर्धन्यषकारादेशः प्रवर्तते। एवं तर्हि 'मित्रं शास्ति' इति विग्रहे क्विपि प्रत्यये यदि सकारस्य स्थाने षकारादेशः स्यात्, तर्हि तस्य षकारस्य स्थाने डकारादेशः प्राप्यते—'हशषछान्तेजादीनां डः' (कात. २/३/४६) इति सूत्रेण। कथं तर्हि मित्रशीरिति प्रयोग उपपद्येत। अत्र कातन्त्रटीकाकारेण भाष्याभिमतमुद्धरता इदमुच्यते यत् 'सजुषाशिषो रः' (२/३/५१) इति सूत्रे आशीर्ग्रहणस्योपलक्षणत्वात् केवलं शासधातोरपि प्रयोगे सकारस्य स्थाने रकारादेशः प्रवर्तेत, तस्मात् मित्रशीरिति प्रयोगस्य साधुत्वे न काचिद् विप्रतिपत्तिराशङ्कनीया भवति। यथा तदीयं वचनमस्ति—**'कथं मित्रं शास्तीति मित्रशीः, शासेर्निमित्तत्वात् षत्वे कृते उत्वं प्रसज्येत? सत्यम्। 'सजुषाशिषो रः'** (२/३/५१) **इत्याशीर्ग्रहणस्योपलक्षणत्वात्। भाष्यसम्मतमेतत्। सूत्रकारमतं तु क्विबेवात्र न दृश्यते। वाक्यकारसम्मतमेतत्'** (दु.टी. ३/८/२७) इति। इदमवगन्तव्यं यदिदं सूत्रं भाष्ये नैव व्याख्यातमुपलभ्यते। तस्मात् कल्प्यते यद् अन्यत्रैतादृशमभिमतं भाष्यकारेणाभिव्यक्तं भवेदिति।

एवं 'वत्सतरार्णम्-अक्षौहिणी–अष्टौ-अटाट्यते-सोसूत्र्यते-संहिता समासे नित्या- अर्वन्तः-मघवान्-मातुः स्मरति-कुत्र-रुणद्धि-भिनत्ति-श्रृतम्-अग्रेभोजं व्रजति-कुमारी अत्र-चर्करीतप्रयोग-अतिसखेः-द्वित्राः, दधिघृते, जागराञ्चकार-लोहिनीयते-मा स्म कार्षीत्-शिष्टः' प्रयोगसम्बद्धविंशतिविषयेषु भाष्यकार-प्रामाण्यस्य संक्षेपेण समीक्षां विधायान्येषु कतिपयविषयेषु केवलं सन्दर्भवचनान्येव प्रस्तूयन्ते लेखविस्तरभिया। तत्र षट्त्रिंशद्वचनानि वृत्त्यादिव्याख्याभागस्य, नव-वचनानि टिप्पणीभागस्य, चत्वारि वचनानि च समीक्षाभागस्यात्र संगृहीतानि सन्ति। तद्यथा—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सन्दर्भवचनानि

१. चाक्रवर्मणस्तु मते सर्वप्लुतानामितौ विकृतिरेवेति तु भाष्यम् (कात.परि., सन्धि. ४३)।

२. अनुनासिकादेशस्य यकारादेरानुनासिक्यं हि भाष्यादौ समर्थितम्। तन्त्रान्तरे त्वादेशविशेषणमिहानुनासिकोऽधिक्रियते (कात.परि., स. ५५)।

३. 'अहोरात्रिं च शेते' इत्यपीच्छन्ति। भाष्ये त्वेतन्न चिन्तितम्।..... शाकटायनीये त्रिमुनिमते च।......चान्द्रे तु (कात.परि., सं. ८०)।

४. भाष्ये तु वाग्रहणं न पठ्यते (कात.परि., सं. ८३)।

५. तथा च भाष्यम्—अन्तस्थानुनासिकपरस्याधुट: संयोगादेर्न लोप इति (अस्म्यामित्यत्र) (क.च. २/३/१८)।

६. यदि भाष्यादौ 'द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चय:' इति पाठस्तदायमर्थ:—गत्यर्थानां मध्ये. (कलापचन्द्र:-२/४/१३)।

७. भाष्येऽप्युक्तम्—'कर्तृव्यापारेऽपि पच्यर्थ:' इति (दु.टी. २/४/१४)।

८. तेन ग्रामं गन्ता, ग्रामस्य गन्तेति स्यादिति जयादित्य:। तन्न, भाष्यविरोधाद् द्वितीया षष्ठीति मन्यते (क.च. २/४/२४)।

९. परस्त्वाह—जरतीशब्देन समासवचनात् कथं युवजरन्निति भाष्ये चानुदाहृतत्वात् सन्देह इति पदकारेण पुनरेतन्निश्चितमेव। (दु.टी. २/५/५)।

१०. तथा च श्रीपति:......इति भाष्यादावूरीकृतत्वात् (क.च. २/५/५)।

११. काक्ष:। 'सक्थ्यक्षिणी स्वाङ्गे' (२/६/४१-५०) इति राजादित्वादत्। नैतद् भाष्ये वार्त्तिके च चिन्तितमिति (दु.टी., क.च. २/५/२५)।

१२. रेध्वेति। 'अस्यैकव्यञ्जन.' (३/४/५१) इत्यादिना एत्वमभ्यासलोपश्च। नैतद् भाष्यसम्मतम् (दु.टी. ३/७/३५)।

१३. एर्गम: इगम इति व्याख्यानाद् गच्छतेर्न भवति। भाष्ये तु न चिन्तितमेतत् (दुर्गटीका-३/८/१३)।

१४. केचित् कुरुच्छुरोरिति विकरणान्तमेव पठन्ति। ......भाष्ये तु नैष पाठो धातुरेवास्तीति लक्ष्यते (दु.टी. ३/८/१४)।

१५. म्रष्टा, म्रष्टुमित्यपि प्रत्युदाहरन्त्येके। येषां मृजेरप्यकारागमोऽस्तीति मतम्, नैतद् भाष्यचिन्तितम् (दु.टी. ३/८/२३)।

१६. तथा च वर्यं प्रधानमुत्तमं विदुरित्यभिधाने भाष्येऽपि नास्ति विशेष: (दुर्गटीका-४/२/१५)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१७. भाष्यात् सम्बन्धमात्रेऽत्र त्वप्रत्ययस्तेनायमर्थः (क.च. ४/५/५)।

१८. अक्षशब्दोऽत्राविशेषात् सामान्यार्थो ग्रहीतव्यः। अत एव बहुवचनमुच्यते। भाष्ये तु न चिन्तितमेतत् (दु.टी. ४/५/५२)।

१९. सूत्रकारमतमेव साध्विति बोधयितुमाह—सूत्रकारमतं त्विति। कोऽत्र विशेष इत्यनेन भाष्यमतमपास्तम् (कलापतत्त्वार्णवः-४/६/६)।

२०. तथा च भाष्यकृतापि ष्णान्तायाः संख्यायाः प्रतिषेधः प्रत्याख्यायते (दु.टी. २/३/६)।

२१. भाष्यकारमते तु पुनः अतिजरादिति भवितव्यम्, सन्निपातलक्षणत्वात् (दु.टी. २/१/२१)।

२२. अथवा मुख्यस्य गोशब्दस्य गौरिति पदं निष्पाद्य पश्चात् पदाध्यारोपाद् वाहीके वृत्तिरिति भाष्यकारवचनात् (क.च. २/२/३३)।

२३. लिङ्गार्थः सत्तेति भाष्यकारमतेऽपि (दु.टी. २/४/१७)।

२४. तथा च भाष्यकारोऽप्याह अश्वघासादयः षष्ठीसमासा भविष्यन्ति (दु.टी. २/५/८)।

२५. अन्ये तु भाष्यकारप्रभृतय इत्यर्थः (क.च. ३/१/१६)।

२६. भाष्यकारास्तु लीयतेरात्मनेपदमिच्छन्ति (दु.टी. ३/४/२३)।

२७. भाष्यकारस्तु श्रन्थिग्रन्थिदन्भीनामपि (अनुषलोपम्) न मन्यते। (दु.टी. ३/६/३)।

२८. भाष्यकारोऽप्याह—धे सकारसिचो.......सेटि दुष्यति (दु.टी. ३/६/३९)।

२९. एकयोगो वाक्यकारस्य दर्शनम्। इदं तु भाष्यकारसम्मतम्। (दुर्गटीका-३/७/६)।

३०. भाष्यकारो ढे ढलोपेऽपदान्तग्रहणमिति (दु.टी. ३/८/६)।

३१. भाष्यकारमते यब् गुणी मा भूदिति व्याख्यानं नास्ति तन्मते सिद्धम्। अत्र तु वररुचिप्रमाणादेवोक्तम् (क.च. ४/१/१०)।

३२. केवलाभ्यामेवेति वक्तव्यम्, भाष्यकारमतमेतत्। ....भाष्यकारस्तु पूजाया अन्यत्र नुमं प्रतिजानीते (दु.टी. ४/१/२५)।

३३. कथमिह काशकटीकाकार इति भाष्यकारवचनम् (दु.टी. ४/३/१)।

३४. युडपि भवति अविशेषादिति भाष्यकारीयं मतम् (दु.टी. ४/३/५७)।

३५. भाष्यकारस्तु नियमद्वयमाह (दु.टी. ४/३/८३)।

३६. तथा भाष्यकारोऽप्याह निन्दादिभ्यो वुञ्ग्रहणम् (दु.टी. ४/४/२८)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

टिप्पण्यः

१. कुत्सित इति सूत्रभाष्ये स्थितम् (२/१/२)।
२. महाभाष्यानुसारं याज्ञे कर्मण्यपशब्दानां प्रयोगादधर्मो भवति (दु.टी. मङ्गलाचरणम्)।
३. शब्दा द्विविधाः (दु.टी. मङ्गलाचरणम्)।
४. महाभाष्ये ११३१ वेदशाखा निर्दिष्टाः (दु.टी. मङ्गला.)।
५. शब्दलक्षणं द्विविधं महाभाष्ये द्रष्टव्यम् (दु.टी. मङ्गला.)।
६. सिद्धशब्दस्य नित्यानित्यरूपमर्थद्वयम् (दु.वृ. १/१/१)।
७. मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते (क.च. १/१/१)।
८. बह्वर्था अपि धातवो भवन्ति (समीक्षा-३/१/९)।
९. महाभाष्ये पठ्यते—दुष्टः शब्द इति पाठः (दु.टी. २/६/२८)।

समीक्षावचनानि

१. सोऽयमक्षरसमाम्नायो वाक्समाम्नायः (समीक्षा-१/१/१)।
२. वर्णसमुदायः पदम्, पदसमुदायः ऋक्. (१/१/२०)।
३. या हि महती सञ्ज्ञा (प्रत्ययः) साऽन्वर्था भवति (३/२/१)।
४. इहापि कृतः पूर्वैरभिसम्बन्धः (३/८/३५)।

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत् तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि।। इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अधिकारसूत्रसमीक्षा

डॉ. भगवतशरणशुक्लः
उपाचार्यः, व्याकरणविभागस्य
संस्कृतविद्याधर्मविज्ञानसङ्कायस्य
काशीहिन्दूविश्वविद्यालये
वाराणस्याम्

❋ ❋ ❋

'मुखं व्याकरणं स्मृतम्' इति पाणिनीयशिक्षानुसारेण वेदाङ्गेषु प्रधानं व्याकरणं वर्त्तते। तत्र महाभाष्यकारः पतञ्जलिः पस्पशाह्निके 'सूत्रं व्याकरणमिति' साधितवान्। सूत्रयति = वेष्टयति स्वस्मिन्नखिलं प्रतिपाद्यतात्पर्यं स्थापयतीति सूत्रम्। 'सूत्र-वेष्टने' इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'[१] इत्यनेन अचि प्रत्यये कृते सति सूत्रमिति शब्दो निष्पद्यते। व्याकरणसूत्रत्वं नाम अल्पाक्षरासन्दिग्धसारवद्विश्वतोमुखस्तोभानवद्यविशेषणविशिष्टत्वे सति पाणिन्यादिमुनिविरचितत्वमिति। एतानि च सूत्राणि संज्ञापरिभाषा-विधिनियमातिदेशाधिकारभेदेन षड्विधानि सन्ति। एतेषु अधिकारसूत्राणां शब्दसाधुत्वप्रक्रियापरिज्ञानाय सर्वाधिकं महत्त्वं वर्त्तते। स्वोच्चारण-स्थानादुत्तरसूत्रेषु 'स्वरितेनाधिकारः'[२] इति सूत्रव्यवस्थया स्वरितत्वप्रतिज्ञाबलात् स्वानुवृत्तिबोधनमधिकारसूत्रप्रयोजनमस्ति। अधिकारत्वं नाम स्वदेशे लक्ष्यसंस्कारकवाक्यार्थशून्यत्वे सति निषेधनियमाद्यविषयत्वे सति उत्तरोत्तरस्वार्थसमर्थकत्वे सति तत्तद्विधिसूत्रैकवाक्यतया लक्ष्यधर्मिकसाधुत्व-प्रकारकबोधजनकत्वम्। स्वरूपदृष्ट्या अधिकारोऽयमनेकविधः—संज्ञाधिकारो यथा प्रत्ययः'[३] विशेषणाधिकारो यथा शेषे[४], स्थान्यधिकारो यथा एकः पूर्वपरयोः[५], प्रकृत्यधिकारो यथा ङ्याप्प्रातिपदिकात्[६], निमित्ताधिकारो यथा आर्धधातुके[७], आदेशाधिकारो यथा अपदान्तस्य मूर्धन्यः[८], इत्येवं रीत्या।

---

१. पा.सू. ३.१.३४;
२. तदेव-१.३.११।
३. तदेव-३.१.१;
४. तदेव-४.२.९२।
५. तदेव-६.१.८४;
६. तदेव-४.१.१।
७. तदेव-२.४.३५;
८. तदेव-८.३.५५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भाष्यकारेण षष्ठी स्थानेयोगा[१] इति सूत्रे अधिकारस्यापरे त्रयो भेदा: कथिता:— प्रदीपवत्, रज्ज्वा बद्धकाष्ठवत्, अधिक्रियमाणानुच्चरितशब्दप्रतियोगोपस्थितिरूपकश्च। तथा च भाष्यम् 'अधिकारो नाम त्रिप्रकार:, कश्चिदेकदेशस्थ: सर्वं शास्त्रमभिज्वलयति, यथा प्रदीप: सुप्रज्वलित: सर्वं वेश्माभिज्वलयति।

अपरोऽधिकारो यथा रज्ज्वा अयसा वा बद्धं काष्ठमनुकृष्यते चकारेण। अपरोऽधिकार: प्रतियोगं तस्यानिर्देशार्थ इति योगे योगे उपतिष्ठते'[२]।

अधिकारसूत्राणां स्वकीयाधिकारान्तर्गतसूत्रेष्वनुवृत्तिर्भवति 'स्वरितेनाधिकार:'[३] इति सूत्रेण स्वरितत्वप्रतिज्ञाबलात्। तत्र जिज्ञासा उदेति यदनुवृत्तिपदार्थ: क:? यस्य सूत्रघटकपदस्य सम्पूर्णसूत्रस्य वा यस्मिन् सूत्रेऽनुवृत्तिर्भवति तत्र तस्य पदस्य सूत्रस्य वा पुनरुच्चारणं लेखनं स्मरणं वा कृत्वा बोधं कुर्यात्। नालेखने सूत्रकारस्य तात्पर्यं सूत्ररूपं वाधिकारत्वात् तेन लेखनाभावात्, न च द्वितीयं वा तात्पर्यं पुनरुच्चारणविधाने प्रमाणाभावात्, गौरवात्, अधिकारव्यवस्थावैयर्थ्याच्च। नापि तृतीये तात्पर्यमुच्चरित एव शब्द: प्रत्यायको भवति नानुच्चरित इति सिद्धान्तस्य सत्त्वात्, स्मृतस्य च शाब्दबोधे भानाभावात्। तत्तर्हि किं तात्पर्यमिति चेदुच्यते तत्पदानुवृत्तिर्नाम तत्पदनिरूपितशक्त्यनुमानम्। तच्चेत्थं यथा—'अङ्गस्य'[४] इत्यधिकारसूत्रं वर्त्तते। यस्य चासप्तमाध्यायपरिसमाप्तेरधिकार:। तेन सप्तमाध्यायस्थे 'सुपि'[५] च इति सूत्रेऽपि 'अङ्गस्य'[६] इत्यस्याधिकारस्य सत्त्वात् तत्र तस्यानुवृत्तिर्भवति। तथा चानुमानाकार: 'सुपि'[७] च इति वाक्यं यञादिप्रत्ययाव्यवहितपूर्वत्वविशिष्टादन्ताङ्गनिष्ठोद्देश्यतानिरूपितदीर्घनिष्ठविधेयताश्रयनिरूपितशक्तिमत्, एतद्बोधतात्पर्यकोच्चारणविषयत्वात्, संयोगान्तलोप इति सूत्रवत्। यत्र यत्र एतद्बोधतात्पर्यकोच्चारणविषयत्वं तत्र तत्र यञादिसुप्प्रत्ययाव्यवहितपूर्वत्वविशिष्टादन्ताङ्गनिष्ठोद्देश्यतानिरूपितदीर्घनिष्ठविधेयताश्रयनिरूपितशक्तिरिति व्याप्ति:। यञादिसुप्प्रत्ययाव्यवहितपूर्वत्वविशिष्टादन्ताङ्गनिष्ठोद्देश्यतानिरूपितदीर्घनिष्ठविधेयताश्रयनिरूपितशक्तिव्याप्यैतद्बोधतात्पर्यकोच्चारणविषयत्ववत्सुपि च[८] इति वाक्यम्, अतो यञादिसुप्प्रत्ययाव्यवहितपूर्वत्वविशिष्टादन्ताङ्गनिष्ठोद्देश्यता-

---

१. पा.सू. १.१.४८; २. पा.सू., म.भा. १.१.४८।
३. पा.सू. १.३.११; ४. तदेव- ६.४.१।
५. तदेव- ७.३.१०२; ६. तदेव- ६.४.१।
७. तदेव- ७.३.१०२; ८. तदेव- ७.३.१०२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निरूपितदीर्घनिष्ठविधेयताश्रयनिरूपितशक्तिमद् इत्यनुमितेः सत्त्वात् तस्मात्तादृशार्थबोधो जायते। 'सुपि च' इति वाक्ये पूर्वोक्तबोधतात्पर्यग्राहिका लक्ष्यसिद्धिरेव, तस्य सूत्रस्य तथा तात्पर्यसत्त्व एव लक्ष्यसिद्धिर्भवितुं शक्नोति। तात्पर्यग्राहकत्वं नाम प्रकृतलक्ष्यधर्मिकसाधुत्वप्रकारकाप्रामाण्यज्ञानानास्कन्दितशाब्दबोधोपयोगिबोधकत्वम्। यतो हि एतस्यैवं बोधाभावे लक्ष्यसिद्धेरभावात् तादृशार्थलाभाय तत्रैवं शक्तिस्वीकरणमावश्यकम्। तादृशार्थलाभश्च तथाभूताद् 'अङ्गस्य'[१] इत्यधिकारादेव सम्भवति।

अधिकारसूत्राणां कस्य कस्मात् प्राक् किमभिव्याप्य वा अधिकार इति सर्वं भाष्यात् लक्ष्यसिद्ध्यर्थकसूत्रार्थाद् वा ज्ञायते। एतानि अधिकारसूत्राणि पाणिनीयाष्टाध्यायिग्रन्थे सर्वेष्वध्यायेषु वर्त्तन्ते। संज्ञाधिकारबोधकानि सूत्राणि च प्रथमाध्याये सन्ति। द्वितीयेऽध्याये च संज्ञाधिकारविषयकाणि विशेषणनिमित्ताधिकारविषयकाणि चाधिकारसूत्राणि वर्त्तन्ते। तृतीयाध्याये च संज्ञाविशेषणनिमित्तप्रकृतिस्थान्यधिकारविषयकाणि अधिकारसूत्राणि वर्त्तन्ते। तथैव चतुर्थाध्यायेऽपि प्रकृतिनिमित्तादेशविशेषणाधिकारविषयकाणि अधिकारसूत्राणि सन्ति। पञ्चमाध्याये च संज्ञाप्रकृत्यादेशविशेषणविषयकाणि अधिकारसूत्राणि विद्यन्ते। एवञ्च षष्ठाध्याये स्थानिनिमित्तादेशाधिकारविषयकाणि, सप्तमे च स्थान्यधिकारविषयकाणि तथाष्टमे स्थान्यादेशविशेषणविषयकाणि चाधिकारसूत्राणि लभ्यन्ते। एतस्य पाणिन्यष्टाध्यायिग्रन्थस्य प्रथमेऽध्याये त्रीण्यधिकारसूत्राणि सन्ति—प्रथमं 'कारके'[२] इति, यस्य 'तत्प्रयोजको हेतुश्च'[३] इति सूत्रपर्यन्तमधिकारो विद्यते, द्वितीयं 'प्रागीश्वरान्निपाताः'[४] इति, यस्य 'अधिरीश्वरे'[५] इत्यतः प्रागधिकारो वर्त्तते, तृतीयं 'कर्मप्रवचनीयाः'[६] इति, यस्य 'अधिरीश्वरे'[७] इत्यभिव्याप्याधिकारो वर्त्तते। इत्थं 'कारके'[८] इत्यस्याधिकारे सर्वाणि सूत्राणि कारकमुद्दिश्य स्वकीयं कार्यं विदधति, 'प्रागीश्वरान्निपाताः' इत्यस्याधिकारे स्थितानि सर्वाणि सूत्राणि निपातसंज्ञां ज्ञापयन्ति। 'कर्मप्रवचनीयाः'[९] इत्यस्य अधिकारे स्थितानि सूत्राणि कर्मप्रवचनीयसंज्ञां ज्ञापयन्ति।

---

१. पा.सू. ६.४.१; २. तदेव- १.४.२३।
३. तदेव- १.४.५५; ४. तदेव- १.४.५६।
५. तदेव- १.४.९६; ६. तदेव- १.४.८२।
७. तदेव- १.४.९६; ८. तदेव- १.४.२३।
९. तदेव- १.४.८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

द्वितीयाध्याये षडधिकारसूत्राणि सन्ति—'प्राक् कडारात्समासः'[१] इति प्रथमं यस्य 'कडाराः कर्मधारये'[२] इत्यतः प्रागधिकारो विद्यते। द्वितीयमव्ययीभाव[३] इति, यस्य 'तत्पुरुषः'[४] इत्यतः प्रागधिकारोऽस्ति, तृतीयं 'तत्पुरुष'[५] इति, यस्य 'शेषो बहुव्रीहिः'[६] इति सूत्रात् प्रागधिकारो विद्यते। चतुर्थं 'शेषो बहुव्रीहिः'[७] इति यस्य 'चार्थे द्वन्द्वः'[८] इत्यतः प्रागधिकारो विद्यते। पञ्चमम् 'अनभिहिते'[९] इति, यस्य चापादपरिसमाप्तेरधिकारो विद्यते। एतादृशमेव षष्ठमधिकारसूत्रम् 'आर्धधातुके'[१०] इति, यस्य 'वा यौ'[११] इति सूत्रं यावदधिकारो विद्यते।

तृतीयाध्याये च सप्ताधिकारसूत्राणि सन्ति। प्रथमं 'प्रत्ययः'[१२] द्वितीयं 'परश्च'[१३], तृतीयम् 'आद्युदात्तश्च'[१४], एतेषामापञ्चमाध्यायपरिसमाप्तेरधिकारो विद्यते। चतुर्थं 'धातोः'[१५] इति, यस्य तृतीयाध्यायसमाप्तिपर्यन्तमधिकारो विद्यते। पञ्चमं 'कृत्याः'[१६] इति, यस्य 'ण्वुल्तृचौ'[१७] इत्यतः प्रागधिकारो विद्यते। षष्ठं 'भूते'[१८] इति। यस्य च 'वर्त्तमाने लट्'[१९] इत्यतः प्रागधिकारो विद्यते। सप्तमं 'लस्य'[२०] इति, यस्य चापादपरिसमाप्तेरधिकारो विद्यते।

चतुर्थेऽध्याये चाष्टौ अधिकारसूत्राणि सन्ति। प्रथमं 'ङ्याप् प्रातिपदिकात्'[२१] इति, यस्यापञ्चमपरिसमाप्तेरधिकारो विद्यते। द्वितीयं 'स्त्रियाम्'[२२] इति, यस्य च 'समर्थानां प्रथमाद्वा'[२३] इत्यतः प्रागधिकारो वर्त्तते। तृतीयम् 'अनुपसर्जनात्'[२४] इति, यस्य च 'यूनस्तिः'[२५] इत्यतः प्रागधिकारोऽस्ति। चतुर्थं 'तद्धिताः'[२६] इति यस्य चापञ्चमपरिसमाप्तेरधिकारो

---

१. पा.सू. २.१.३;
२. तदेव- २.२.३८।
३. तदेव- २.१.५;
४. तदेव- २.१.२१।
५. तदेव- २.१.२१;
६. तदेव- २.२.२३।
७. तदेव- २.२.२३;
८. तदेव- २.२.२९।
९. तदेव- २.३.१;
१०. तदेव- २.४.३५।
११. तदेव- २.४.५७;
१२. तदेव- ३.१.१।
१३. तदेव-. ३.१.२;
१४. तदेव- ३.१.३।
१५. तदेव- ३.१.९३;
१६. तदेव- ३.१.९५।
१७. तदेव- ३.१.१३३;
१८. तदेव- ३.२.८४।
१९. तदेव- ३.२.१२३;
२०. तदेव- ३.४.७७।
२१. तदेव- ४.१.१;
२२. तदेव- ४.१.३।
२३. तदेव- ४.१.८२;
२४. तदेव- ४.१.७४।
२५. तदेव- ४.१.७७;
२६. तदेव- ४.१.७६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विद्यते। पञ्चमं 'प्राग् दीव्यतोऽण्'[१] इति, यस्य च 'तेन दीव्यति खनतिजयति जितम्'[२] इत्यत: प्रागधिकारो वर्त्तते। षष्ठं चाधिकारसूत्रं 'शेषे'[३] इति विद्यते, यस्य 'तस्य विकार:'[४] इत्यत: प्रागधिकारो वर्त्तते। सप्तमं 'प्राग्वहतेष्ठक्'[५] इति, 'यस्य च तद्वहतिरथयुगप्रासङ्गम्'[६] इत्यत: प्रागधिकारो विद्यते। अष्टमं च 'प्राग्घिताद् यत्' इति, एतस्य च 'तस्मै हितम्'[८] इत्यत: प्रागधिकारो विद्यते।

पञ्चमाध्याये च षडधिकारसूत्राणि सन्ति। तत्र प्रथमं 'प्राक् क्रीताच्छ:'[९] इति, यस्य च 'तेन क्रीतम्'[१०] इत्यत: प्रागधिकारोऽस्ति। द्वितीयं 'प्राग्वतेष्ठञ्'[११] इति, यस्य 'तेन तुल्यं क्रिया चेद् वति:'[१२] इत्यत: प्रागधिकारो विद्यते। तृतीयं 'कालात्'[१३] इति, यस्य हि 'व्युष्टादिभ्योऽण्'[१४] इत्यत: प्रागधिकारो वर्त्तते। चतुर्थं 'प्राग्दिशो विभक्ति:'[१५] इति, यस्य 'दिक्शब्देभ्य: सप्तमीपञ्चमीप्रथमाभ्यो 'दिग्देशकालेष्वस्ताति:'[१६] इत्यत: प्राग् विभक्तिसंज्ञाधिकारो विद्यते। पञ्चमं 'प्रागिवत् क:'[१७] इति, यस्य च 'इवे प्रतिकृतौ'[१८] इत्यत: प्राक् कप्रत्ययाधिकारो विद्यते। तेन तदधिकारस्थसूत्राणि कप्रत्ययं विदधति। एवं षष्ठं चाधिकारसूत्रं 'समासान्ता:'[१९] इति, यस्य हि आपादपरिसमाप्तेरधिकारो विद्यते।

षष्ठाध्याये च पञ्चदशाधिकारसूत्राणि वर्त्तन्ते। तत्र प्रथमम् 'एकाचो द्वे प्रथमस्य'[२०] इति, द्वितीयं च 'अजादेर्द्वितीयस्य'[२१] इति, अनयो: 'ष्यङ: सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे'[२२] इत्यत: प्रागधिकारो विद्यते। 'संहितायाम्'[२३] इति च तृतीयम्, यस्य च 'अनुदात्तं पदमेकवर्जम्'[२४] इत्यत: प्रागधिकारो

१. पा.सू. ४.१.८३;
२. तदेव- ४.४.२।
३. तदेव- ४.२.९१;
४. तदेव- ४.३.१३४।
५. तदेव- ४.४.१;
६. तदेव- ४.४.७६।
७. तदेव- ४.४.७५;
८. तदेव- ५.१.५।
९. तदेव- ५.१.१;
१०. तदेव- ५.१.३७।
११. तदेव- ५.१.१८;
१२. तदेव- ५.१.११५।
१३. तदेव- ५.१.७८;
१४. तदेव- ५.१.९७।
१५. तदेव- ५.३.१;
१६. तदेव- ५.३.२७।
१७. तदेव- ५.३.७०;
१८. तदेव- ५.३.९३।
१९. तदेव- ५.४.६८;
२०. तदेव- ६.१.१।
२१. तदेव- ६.१.२;
२२. तदेव- ६.१.१३।
२३. तदेव- ६.१.७०;
२४. तदेव- ६.१.१५२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विद्यते। चतुर्थम्: 'एकः पूर्वपरयोः'[१] इति, एतस्य 'अतो रोरप्लुतादप्लुते'[२] इत्यतः प्रागधिकारो विद्यते। पञ्चमं 'सुट्कात्पूर्वः'[३] इति, एतस्य च 'अनुदात्तं पदमेकवर्जम्'[४] इत्यतः प्रागधिकारो वर्त्तते। षष्ठम् 'आदिरुदात्तः'[५] इति, यस्य 'अन्तः'[६] इत्यतः प्रागधिकारो विद्यते। सप्तममन्तः 'अन्तः'[७] इति, यस्य हि 'उत्तरपदादिः'[८] इत्यतः प्रागधिकारोऽस्ति। अष्टमम् 'उत्तरपदादिः'[९] इति, एतस्य च 'अन्तः'[१०] इत्यतः प्रागधिकारो विद्यते। नवमम् 'अन्तः'[११] इति, यस्य हि पादसमाप्तिपर्यन्तमधिकारो विद्यते। दशमम् 'अलुगुत्तरपदे'[१२] इति, यस्य हि 'आनङ्ऋतो द्वन्द्वे'[१३] इत्यतः प्रागधिकारो विद्यते। एकादशं 'संहितायाम्'[१४] इति, एतस्य हि आपादपरिसमाप्तेरधिकारो विद्यते। द्वादशं च 'अङ्गस्य'[१५] इति, एतस्य चासप्तमाध्यायपरिसमाप्तेरधिकारो विद्यते। त्रयोदशम् 'असिद्धवदत्राभात्'[१६] इति, एतस्य चापादपरिसमाप्तेरधिकारोऽस्ति। चतुर्दशम् 'आर्धधातुके'[१७] इत्यस्ति, एतस्य हि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः'[१८] इत्यतः प्रागधिकारो विद्यते। पञ्चदशं 'भस्य'[१९] इति, यस्य च आपादपरिसमाप्तेरधिकारो विद्यते।

सप्तमाध्याये द्वेऽधिकारसूत्रे वर्तेते। प्रथमं 'मपर्यन्तस्य'[२०] इति, एतस्य 'त्रिचतुरोः स्त्रियां तिसृचतसृ'[२१] इत्यतः प्रागधिकारो विद्यते। द्वितीयं च 'उत्तरपदस्य'[२२] इति, यस्य च 'हनस्तोऽचिण्णलोः'[२३] इत्यतः प्रागधिकारो विद्यते।

अष्टमाध्याये चाधिकारसूत्राणि सप्त वर्त्तन्ते। तत्र प्रथमं 'सर्वस्य द्वे'[२४] इति, यस्य 'पदस्य'[२५] इत्यतः प्रागधिकारो वर्त्तते। द्वितीयं च 'पदस्य'[२६] इति,

---

१. पा.सू. ६.१.८४; २. तदेव- ६.१.११३।
३. तदेव- ६.१.१३१; ४. तदेव- ६.१.१५२।
५. तदेव- ६.२.६४; ६. तदेव- ६.२.९२।
७. तदेव- ६.२.९२; ८. तदेव- ६.२.१११।
९. तदेव- ६.२.१११; १०. तदेव- ६.२.१४३।
११. तदेव- ६.२.१४३; १२. तदेव- ६.३.१।
१३. तदेव- ६.३.३५; १४. तदेव- ६.३.११४।
१५. तदेव- ६.४.१; १६. तदेव- ६.४.२२।
१७. तदेव- ६.४.४६; १८. तदेव- ६.४.७१।
१९. तदेव- ६.४.१२९; २०. तदेव- ७.२.९१।
२१. तदेव- ७.२.९९; २२. तदेव- ७.३.१०।
२३. तदेव- ७.३.३३; २४. तदेव- ८.१.१।
२५. तदेव- ८.१.१६; २६. तदेव- ८.१.१६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एतस्या 'अपदान्तस्य मूर्धन्यः'[१] इत्यतः प्रागधिकारो विद्यते। तृतीयं 'पदात्'[२] इति एतस्य हि 'कुत्सने च सुप्यगोत्रादौ'[३] इत्यतः प्रागधिकारो विद्यते। चतुर्थमस्ति 'अनुदात्तं सर्वमपदादौ'[४] इति, एतस्य चापादपरिसमाप्तेरधिकारो विद्यते। पञ्चमं 'पूर्वत्रासिद्धम्'[५] इति, यस्य चाध्यायपरिसमाप्तेरधिकारो विद्यते। षष्ठं 'वाक्यस्य टेः प्लुत उदात्तः'[६] इति, एतस्य चापादपरिसमाप्तेरधिकारो विद्यते। सप्तममष्टाध्याय्याश्चान्तिममधिकारसूत्रमस्ति 'इण्कोः'[७] इति, एतस्यापि आपादपरिसमाप्तेरधिकारो विद्यते।

इत्थमखिलेऽपि पाणिनीयाष्टाध्यायिग्रन्थे चतुष्पञ्चाशद् अधिकारसूत्राणि सन्ति। एतेषामधिकारसूत्राणां भूमिका स्वाधिकारसूत्रस्थसूत्रेषु अनुवृत्त्यर्थमेवेति पूर्वं प्रतिपादितम्। यद्यपि सर्वाणि अधिकारसूत्राणि अधिकारमेव बोधयन्ति, किन्तु 'शेषे'[८] इति सूत्रमधिकारसूत्रेण सह विधिसूत्रमपि विद्यते। तेन चक्षुषा गृह्यते चाक्षुषं रूपम्, श्रवणेन गृह्यते श्रावणः शब्दः, उलूखले क्षुण्णः औलूखलो यावक इत्यादिप्रयोगा अनेन अणि प्रत्यये सति निष्पद्यन्ते। अधिकारत्वाच्च अपत्यादिचतुर्थ्यन्तादन्येष्वर्थेषु प्रत्यया भवन्ति। यद्यपि एकस्मिन्नेव अधिकारत्वविधित्वस्वीकारात् सूत्रेषु षड्विधत्वस्यानुपपत्तिर्भवति, तथापि स्वसमभिव्याहृतपदार्थत्वावच्छेदकव्याप्यधर्मावच्छिन्नावच्छेदकमिथो विरुद्धयावद्धर्मप्रकारकबोधानूकूलो व्यापार इति विधापदार्थपरिष्कारस्वीकाराद् दोषो न भवति। तत्र स्वसमभिव्याहृतसूत्रत्वपदार्थतावच्छेदकसूत्रत्वव्याप्यधर्मयोः 'शेषे'[९] इत्यत्राधिकारत्वविधित्वयोर्मिथोऽविरुद्धत्वेऽपि स्वसमभिव्याहृतपदार्थतावच्छेदकसूत्रत्वव्याप्याधिकारत्वावच्छिन्नावच्छेदकाधिकारत्ववत्त्वधर्मस्य विधित्वावच्छिन्नावच्छेदकविधित्ववत्त्वधर्मस्य च मिथो विरुद्धत्वान्न तत्र दोष इति बोध्यम्।

'पूर्वत्रासिद्धम्'[१०] इति सूत्रं विधिसूत्रमधिकारसूत्रं वेति विचारो वैयाकरणसमाजे विशेषेण वर्त्तते। यतो हि सूत्रमिदं पूर्वं प्रति परशास्त्रस्यासिद्धत्वं बोधयति। तच्चासिद्धं विधानं विधिरेव। अतः 'पूर्वत्रासिद्धम्'[११] इति सूत्रं विधिसूत्रमेव न त्वधिकारसूत्रमिति सिद्ध्यति; किन्तु एतस्य विधित्वस्वीकारे

---

१. पा.सू. ८.३.५५;
२. तदेव- ८.१.१७।
३. तदेव- ८.१.६९;
४. तदेव- ८.१.१८।
५. तदेव- ८.२.१;
६. तदेव- ८.२.८२।
७. तदेव- ८.३.५७;
८. तदेव- ४.२.९२।
९. तदेव- ४.२.९२;
१०. तदेव- ८.२.१।
११. तदेव- ८.२.१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा इत्येव सूत्रार्थो भविष्यति। तेन महाभाष्यकारबोधितो 'गोधुङ्मान्' इति प्रयोगो न सिध्येत्। तत्र हि गां दोग्धि इति गोधुक् ('क्विप् च'[1] इति क्विप्) ततः गोधुगस्ति अस्य इति विग्रहे 'तदस्यास्त्यस्मिन्निति मतुप्'[2] इति मतुप्प्रत्यये सत्यनुबन्धलोपे कृते गोदुह् मत् इत्यवस्थायां 'दादेर्धातोर्घः'[3] इति दुहो हकारस्य घत्वे कृते 'एकाचो वशो भष् झषन्तस्य स्ध्वोः'[4] इत्यनेन वशो दकारस्य स्थाने भष्भावे धकारे कृते गोधुघ् मत् इत्यत्र 'स्वादिष्वसर्वनामस्थाने'[5] इत्यनेन मतुपि परे गोधुघ् इत्यस्य पदत्वात् 'झलां जशोऽन्ते'[6] इत्यनेन घस्य जश्त्वेन गकारे कृते सति गोधुग् मत् इत्यवस्थायां 'यरोऽनुनासिकेऽनुनासिको वा'[7] इति सूत्रस्थेन प्रत्यये भाषायां नित्यमिति वार्तिकेन गकारस्य स्थानेऽनुनासिके ङकारे कृते स्वादिकार्ये च कृते सति 'गोधुङ्मान्' इति रूपं निष्पद्यते। 'पूर्वत्रासिद्धम्'[8] इत्यस्याधिकारत्वाभावाद् भष्भावं परत्वात् प्रबाध्य जश्त्वेऽनुनासिके च कृते सति भष्भावो न स्यात्, तेन 'गोधुङ्मान्' इति प्रयोगो न सिद्ध्येत्।

यद्यपि 'दादेर्धातोर्घः'[9] इति हस्य घत्वे कृते परमपि जश्त्वमन्तरङ्गत्वात् प्रबाध्य पूर्वं भष्भावे कृते पश्चाज्जश्त्वेऽनुनासिके च कृते सति 'गोधुङ्मान्' इति प्रयोगः सिध्यति, तथापि गोधुघ् मत् इत्यवस्थायामपवादत्वाज्जश्त्व-मन्तरङ्गत्वादनुनासिकं च प्रबाध्य 'झयः'[10] इत्यनेन मतुपो मकारस्य वकारे कृते सति जश्त्वानुनासिकत्वयो र्विधानाभावाद् 'गोधुङ्मान्' इति प्रयोगो न सिद्ध्येत्। तस्मात् तस्य तादृशानामनेकप्रयोगाणाञ्च सिद्धये 'पूर्वत्रासिद्धम्'[11] इति सूत्रमधिकारसूत्रमङ्गीक्रियते। तेन 'झयः' इत्यस्य दृष्ट्या 'दादेर्धातोर्घः' इत्यस्यासिद्धत्वाद् झयः परत्वाभावात् मतुपो मकारस्य वकारादेशो न भविष्यति। अतस्तत्रानुनासिकादिकार्ये कृते सः प्रयोगः सिद्ध्यति। एतस्याधिकारत्वादेव 'षट् श्च्योतति' इत्यत्र 'डः सि धुट्'[12] इत्यस्य दृष्ट्या 'श्च्योतति' इत्यत्र विहितस्य 'स्तोः श्चुना श्चुः'[13] इत्यनेन श्चुत्वस्य असिद्धत्वात्

---

१. पा.सू. ३.२.७६; २. तदेव- ५.२.९४।
३. तदेव- ८.२.३२; ४. तदेव- ८.३.३७।
५. तदेव- १.४.१७; ६. तदेव- ८.२.३९।
७. तदेव- ८.४.४५; ८. तदेव- ८.२.१।
९. तदेव- ८.२.३२; १०. तदेव- ८.२.१०।
११. तदेव- ८.२.१; १२. तदेव- ८.३.२९।
१३. तदेव- ८.४.४०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्र प्राप्तस्य धुडागमस्य वारणाय श्चुत्वं धुटि सिद्धं वाच्यमिति वार्तिकं चरितार्थं भवति। अत एव भाष्यकारो वार्तिककारस्य पूर्वत्रासिद्धमधिकार इति प्रकृतसूत्रवार्तिकं व्याचक्षाणस्तस्यैव मतं पोषितवान्। तेनास्य पूर्वत्रासिद्धमिति सूत्रस्याधिकारसूत्रता सर्वथा अक्षतैवेति सर्वे वैयाकरणाः कात्यायनप्रभृतयः स्वीकुर्वन्ति।

वस्तुतस्तु 'पूर्वत्रासिद्धम्'[१] इति सूत्रं न च विधिसूत्रं न चाधिकारसूत्रम्, अपि तु परिभाषासूत्रमस्ति। परिभाषात्वं नाम सङ्केतग्राहकभिन्नत्वे सति शब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाण्यज्ञानास्कन्दितबोधे सहकारित्वे सति विधिसूत्रैकवाक्यतया लक्ष्यधर्मिकसाधुत्वप्रकारकबोधजनकत्वम्। तच्च पूर्वत्रासिद्धमिति सूत्रे वर्त्तते। अतः सूत्रमेतत् परिभाषासूत्रमेवेति वक्तुं शक्यते। अत एव लघुशब्देन्दुशेखरस्याभिनवचन्द्रिकाटीकायां विश्वनाथदण्डिभट्ट एतस्य परिभाषात्वमेव स्वीकृतवान्। विधिसूत्रतास्य तु खण्डितैव। अतस्तत्र विचारणीयं किञ्चिदपि नास्ति। एतस्याधिकारसूत्रत्वविषये किञ्चिद् वक्तव्यमस्ति। पाणिनीयव्याकरणशास्त्रे यावन्ति अधिकारसूत्राणि (पूर्वत्रासिद्धमिति सूत्रं विहाय त्रिपञ्चाशत् सूत्राणि सन्ति), तेषां सूत्राणां न किञ्चिन्निषेधकं सूत्रम्, न च नियामकसूत्रं न चापवादसूत्रं वर्त्तते। तेषां सर्वेषामधिकारसूत्राणां यावदधिकारस्तावत् तानि अव्याहतगतीनि सन्ति; किन्त्वेतस्य पूर्वत्रासिद्धमिति सूत्रस्य विषये तथा नास्ति। एतस्य निषेधसूत्रं 'नमुने'[२] इति, श्चुत्वं धुटि सिद्धं वाच्यमिति वार्त्तिकं च वर्त्तते। तथैव नियामकसूत्रं 'नलोपः सुप्स्वर-संज्ञातुग्विधिषु कृति'[३] इति सूत्रं वर्त्तते। तत्र निषेधकशास्त्रीयोद्देश्यतावच्छेदकं निषेध्यशास्त्रीयोद्देश्यतावच्छेदकव्याप्यं च यद् रूपं तद्रूपावच्छिन्नातिरिक्तत्वेन निषेध्यशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने सङ्कोचो भवतीति सिद्धान्तः।

अत्र निषेधकशास्त्रस्य 'नमुने' इत्यस्योद्देश्यतावच्छेदकं निषेध्यशास्त्रस्य पूर्वत्रासिद्ध-मित्यस्योद्देश्यतावच्छेदकपूर्वशास्त्रनिरूपितपरशास्त्रत्वव्याप्यं रूपं क्रियमाण-कृतनाभावनिष्ठविषयतानिरूपितमुभावत्वं तद्रूपावच्छिन्नातिरिक्तत्वेन पूर्वत्रासिद्ध-मित्यत्र सङ्कोचः क्रियते। तेन पूर्वशास्त्रनिरूपितमुभावविधायकशास्त्रातिरिक्त-परशास्त्रासिद्धत्वं सूत्रमिदं विधास्यति। तथैव नियामकशास्त्रस्य 'नलोपः सुप्स्वरसंज्ञातुग्विविधु कृति' इत्यस्योद्देश्यतावच्छेदकव्यापकं नियम्यशास्त्रस्य पूर्वत्रासिद्धमित्यस्योद्देश्यतावच्छेदकव्याप्यं यद् रूपं यत्किञ्चिन्निमित्तकनलोपत्वं तद्रूपावच्छिन्नातिरिक्तत्वेन सङ्कोचः क्रियते। तेन पूर्वशास्त्रनिरूपित-

१. पा.सू. ८.२.१; २. तदेव- ८.२.३।
३. तदेव- ८.२.२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नलोपविधायकशास्त्रातिरिक्तपरशास्त्रस्यासिद्धत्वं पूर्वत्रासिद्धमिति शास्त्रं बोधयिष्यति। तस्मात् सुब्विधिस्वरविधिसंज्ञाविधिकृत्प्रत्ययाव्यवहिततुग्विधि-बोधकशास्त्रं प्रति एव नलोपविधायकशास्त्रमसिद्धं नान्यत्र इति 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' इति सूत्रं बोधयिष्यति। तेन सप्तमाध्यायस्थैः 'अतो भिस ऐस्'[१], सुपि च, बहुवचने झल्येत्'[३] इति सूत्रैः पूर्वत्रासिद्धमिति व्यवस्थया 'राजन् भिस्, राजन् भ्याम्, राजन् भ्यस्' इत्यत्र 'नलोपः प्रातिपदिकान्तस्य'[४] इत्यनेन प्राप्तस्य नलोपस्यासिद्धत्वात् क्रमशः ऐस्त्वं दीर्घ एत्वं चेत्यादेशा न भवन्ति। 'राज्ञः + अश्वः' इत्यत्र च षष्ठीसमासे सति राजन् + अश्व इत्यवस्थायां नलोपे सति पूर्वनियमानुसारेण सवर्णदीर्घे नलोपस्य असिद्धत्वाभावात् सवर्णदीर्घो भविष्यति। तेन 'राजाश्वः' इति प्रयोगः सिद्ध्यति। इत्थं सर्वत्र नियमस्वीकारेण परिहारविधाने महद्गौरवमायाति।

अत एव मया अधिकारसूत्रलक्षणं **'स्वदेशे लक्ष्यसंस्कारकवाक्यार्थशून्यत्वे सति निषेधनियमाद्यविषयत्वे सति उत्तरोत्तरस्वार्थसमर्पकत्वे सति तत्तद्विधिसूत्रैकवाक्यतया लक्ष्यधर्मिकसाधुत्वप्रकारकबोधजनकत्वमिति'** विहितम्। एतस्य निषेधनियम-विषयत्वादधिकारसूत्रत्वं नास्ति। अपि चैतस्याधिकारसूत्रत्वे नियम्यनियामक-व्यवस्था उत्सर्गापवादव्यवस्था निषेध्यनिषेधकव्यवस्था सर्वा उच्छिन्ना भविष्यन्ति। पूर्वस्य निषेधकसूत्रदृष्ट्या निषेधशास्त्रस्य, नियामकशास्त्रदृष्ट्या नियम्यशास्त्रस्य, अपवादशास्त्रदृष्ट्या चोत्सर्गशास्त्रस्यासिद्धत्वात्।

तेन भगवतो महाभाष्यकारस्य पस्पशाह्निकस्थस्य कथं तर्हीमे शब्दाः प्रतिपत्तव्याः? किञ्चित् सामान्यविशेषणवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्। किं पुनस्तत् उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्तव्यः, काश्चिदपवादः। कथंजातीयकः पुनरुत्सर्गः कर्त्तव्यः, कथं जातीयकोऽपवादः? सामान्येनोत्सर्गः कर्तव्यः। तद्यथा 'कर्मण्यण्'[५] तस्य विशेषेणापवादः। तद्यथा—'अतोऽनुपसर्गे कः'[६] इति भाष्यं, तत्कृता प्रतिज्ञा चोच्छिन्ना भवेत्। यतो हि त्रिपादिषु 'नलोपः प्रातिपदिकान्तस्य'[७] इत्यस्य निषेधसूत्रं 'न ङिसम्बुद्ध्योः'[८] इति, रदाभ्यां निष्ठातो नः 'पूर्वस्य च दः'[९]

---

१. पा.सू. ७.१.९; २. तदेव- ७.३.१०२।
३. तदेव- ७.३.१०३; ४. तदेव- ८.२.७।
५. तदेव- ३.२.१; ६. तदेव- ३.२.३।
७. तदेव- ८.२.७; ८. तदेव- ८.२.८।
९. तदेव- ८.२.४२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'संयोगादेरतो धातोर्यण्वत:'[१] इत्यनयो: र्निषेधसूत्रं 'नद्याख्यापृमूर्च्छिमदाम्'[२] इति, 'उपधायां च'[३] इत्यस्य च 'न भकुर्छुराम्'[४] इति विद्यते।

इत्थमेव बहूनि निषेधसूत्राणि सन्ति। तथैवापवादसूत्राणि बहूनि सन्ति। तद्यथा 'हो ढ:'[५] इत्यस्यापवादसूत्रं 'दादेर्धातोर्घ:'[६] इति, तस्य च 'वा द्रुहमुहष्णुहष्णिहाम्'[७] इति, 'रदाभ्यां निष्ठातो न: पूर्वस्य च द:'[८] इत्यस्य 'नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्'[९] इति, 'विसर्जनीयस्य स:'[१०] इत्यस्य 'शर्परि विसर्जनीय:'[११] वा शरि[१२], कुप्वो: 'क पौ च'[१३] एतानि अपवादसूत्राणि सन्ति। नियामकसूत्राणि यथा 'संयोगान्तस्य लोप:'[१४] इत्यस्य नियामकं सूत्रं 'रात्सस्य'[१५] इति वर्त्तते। एवमेवाधिकार-सूत्रव्यवस्थाप्युच्छिन्ना भविष्यति। यतो हि यदा अधिकारसूत्रं स्वकीयाधिकारस्थसूत्रेषु एकवाक्यतायै उपस्थास्यति, तदा तद्दृष्ट्या तद् विधिसूत्रमेवासिद्धं भविष्यति।

यथा 'वाक्यस्य टे: प्लुत उदात्त:'[१६] इति अधिकारसूत्रं वर्त्तते। यदा सूत्रमेतत् 'प्रत्यभिवादेऽशूद्रे'[१७] इति समीपे एकवाक्यतायै यास्यति तदा तस्यासिद्धत्वाद् एकवाक्यतैव न भविष्यति। इत्थमेव 'ड: सि धुट्'[१८] इत्यस्य दृष्ट्या 'स्तो: श्चुना श्चु:'[१९] इत्यस्यासिद्धत्वविषये श्चुत्वं धुटि सिद्धं वाच्यमिति वार्तिकमपि 'पूर्वत्रासिद्धम्'[२०] इति सूत्रं निषेधति। फलत एतस्याधिकारस्वीकरणं कथमपि नोचितम्। अत: पूर्वत्रासिद्धमिति सूत्रं परिभाषासूत्रमेव, तत्र सङ्केतग्राहकभिन्नत्वे सति शब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दितबोधे सहकारित्वे सति विधिसूत्रैकवाक्यतया लक्ष्यधर्मिकसाधुत्वप्रकारकबोधजनकत्वमिति परिभाषालक्षणस्य सर्वथा सत्त्वात्। एतस्य परिभाषासूत्रस्य लिङ्गमस्ति अष्टमाध्यायद्वितीयादिपादपठिततत्वम्, परिभाषाविधेयस्वरूपमस्ति पूर्वोपदिष्टशास्त्र-निरूपितपरोपदिष्टशास्त्रासिद्धत्वम्। एतस्य च लक्ष्यानुरोधाद् यत्र पूर्वशास्त्रदृष्ट्या

---

१. पा.सू. ८.२.८३; २. तदेव- ८.२.५७।
३. तदेव- ८.२.७८; ४. तदेव- ८.२.७९।
५. तदेव- ८.२.३१; ६. तदेव- ८.२.३२।
७. तदेव- ८.२.३३; ८. तदेव- ८.२.४२।
९. तदेव- ८.२.५६; १०. तदेव- ८.३.३४।
११. तदेव- ८.३.३५; १२. तदेव- ८.३.३६।
१३. तदेव- ८.३.३७; १४. तदेव- ८.२.२३।
१५. तदेव- ८.२.२४; १६. तदेव- ८.२.८२।
१७. तदेव- ८.२.८३; १८. तदेव- ८.२.२९।
१९. तदेव- ८.२.३९; २०. तदेव- ८.२.१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परशास्त्रासिद्धत्वमावश्यकम्, तत्रैव प्रवृत्तिर्भविष्यति। यत्र चावश्यकं नास्ति तत्र न भविष्यति। यद्यपि परिभाषात्वस्वीकारे सपादसप्ताध्यायीस्थशास्त्रेष्वपि प्रवृत्तिसम्भावनास्य भविष्यतीति कैयटहरदत्तभैरवमिश्रप्रभृतयः प्रतिपादयन्ति। अतः 'त्यदादीनामः'[१] इति शास्त्रस्य 'अतो भिस ऐस्'[२], 'टाङसिङसामिनात्स्याः'[३] इत्यनयोर्दृष्ट्या 'सर्वनाम्नः स्मै'[४] 'ङसिङ्योः स्मात्स्मिनौ'[५] इत्यनयोर्दृष्ट्या च असिद्धता भवेत्। तथा च तेन तैः तस्मात् तस्मिन् तस्य तथैव यस्य यस्मिन् इत्यादिप्रयोगाश्च न सिद्ध्येयुः। तस्मादधिकारसूत्रतैव पूर्वत्रासिद्धमित्यस्य न्याय्या इति च ते तर्कयन्ति। तथापि तन्न समीचीनम्।

लक्ष्यैकचक्षुष्कः पाणिनिः सर्वाणि लक्षणसमूहानि आर्षबुद्ध्या सङ्कलय्य लक्ष्यानुसारेणैव तस्मिन् तस्मिन् अध्याये, तस्मिन् तस्मिन् पादे, पादेष्वपि तत्तत्क्रमे सूत्राणि उपदिष्टवान्। अतस्तत्तत् सूत्रं स्वकीयस्थले पश्चाद्वर्त्तिषु सूत्रेषु वा स्वकार्यं विधास्यति। तेन परिभाषाशास्त्रस्य निषेधशास्त्रस्य अधिकारशास्त्रस्य च यत्रोपदेशं विदधाति पाणिनिस्तस्य तत्र तत्पश्चाद्वर्त्तिनां सूत्राणां विषय एव प्रवृत्तिर्दृश्यते लक्ष्यानुसन्धानाय, न तु ततः पूर्वम्। अत एव तस्य अध्यायपादसूत्रक्रमः सर्वथा समुचितत्वाद् विद्वद्भिर्वैज्ञानिकः कथ्यते। अतः पूर्वत्रासिद्धमित्यस्य परिभाषात्वेऽपि सम्पादसप्ताध्यायीषु प्रवृत्तिर्न भविष्यति। अत्र सम्पादसप्ताध्यायीषु तस्याप्रवृत्तिविषये 'तस्य लोपः'[६], 'तस्मादित्युत्तरस्य'[७], तेन रक्तं रागात्[८], यस्य हलः[९], यस्येति च[१०], यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्'[११] इति सूत्रस्थप्रयोगनिर्देशाः अपि प्रमाणानि सन्ति। यद्यपि एतस्य परिभाषात्वे एतस्याधिकारबोधकेन प्रकृतसूत्रस्थमहाभाष्यग्रन्थेन सह विरोधः स्यात्। तथा च भाष्यम्—

पूर्वत्रासिद्धमधिकारः (वार्तिकम्) पूर्वत्रासिद्धमित्यधिकारोऽयं द्रष्टव्यः। किं प्रयोजनम्। परस्य परस्य पूर्वत्र पूर्वत्रासिद्धविज्ञानार्थम् (वार्तिकम्) परः परो योगः पूर्वं पूर्वं योगं प्रत्यसिद्धो यथा स्यात्। अनधिकारे हि समुदायस्य समुदायेऽसिद्धत्वविज्ञानम् (वार्त्तिकम्) अनधिकारे हि सति समुदायस्य समुदायेऽसिद्धत्वं विज्ञायेत। तत्र को दोषः, तत्रायथेष्टप्रसङ्गः (वार्त्तिकम्) तत्र

१. पा.सू. ७.२.१०२; २. तदेव- ७.१.९।
३. तदेव- ७.१.१२; ४. तदेव- ७.१.१४।
५. तदेव- ७.१.१५; ६. तदेव- १.३.९।
७. तदेव- १.१.६७; ८. तदेव- ४.२.१।
९. तदेव- ६.४.४९; १०. तदेव- ६.४.४८।
११. तदेव- १.४.१३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अयथेष्टं प्रसज्येत गोधुङ्मान् गुडलिण्मान् इति घत्वढत्वयोः कृतयोर्झय इति वत्वं प्रसज्येत। तस्मादधिकारः (वार्तिकम्) तस्मादधिकारोऽयं द्रष्टव्यः।

एतस्मिन् प्रकृते सूत्रे भाष्ये भाष्यकारो वार्त्तिकग्रन्थं व्याचक्षाणः स्फुटतया प्रकृतसूत्रमधिकारसूत्रं स्वीकृतवान्। अतस्तस्य परिभाषासूत्रस्वीकारो भाष्यविरुद्धत्वादुपेक्षणीयः। तस्मात् 'पूर्वत्रासिद्धम्'[1] इति सूत्रमधिकारसूत्रमेव, न तु परिभाषासूत्रमिति सर्वैः स्वीकरणीयमेव। तथापि किञ्चिदत्र विचारणीयं भवति। एषा महाभाष्यकारस्य शैली वर्त्तते। यत्र वार्त्तिककारस्तस्यानुकूलं सूत्रं व्याख्याति तदा भाष्यकारः केवलं वार्त्तिकस्य सामान्यं व्याख्यानं विदधाति। किञ्चिदपि स्वकीयं न वक्ति। यत्र च वार्त्तिकविषये सहमतं न भवति, तदा स्वमतं निरूप्य वार्त्तिकं प्रत्याख्याति। अत्र सूत्रस्थभाष्येऽपि वार्त्तिकव्याख्यानातिरिक्तं किञ्चिदपि स्वकीयं मतं न प्रकटितवान् भाष्यकारः।

अतः प्रकृतसूत्रस्थभाष्यरहस्यं विचारणीयमस्ति। यतो हि भाष्यकारः 'षष्ठी' स्थानेयोगा'[2] इति सूत्रे परिभाषाशास्त्रमपि अधिकाररूपेण स्वीकृतवान्। तथा च भाष्यम्—'अथवा किञ्चिल्लिङ्गमासज्य वक्ष्यामि इत्थंल्लिङ्गा 'षष्ठी स्थानेयोगा' भवतीति। न च तल्लिङ्गमवयवषष्ठ्यादिषु करिष्यते। यद्येवं शास इदङ् हलोः शाहौ शासिग्रहणं कर्त्तव्यम्, स्थानेन योगार्थं लिङ्गमासङ्क्ष्यामि इति। न कर्त्तव्यम्। यदेवादः पुरस्तादवयवषष्ठ्यर्थं प्रकृतमेतदुत्तरत्रानुवृत्तं सत् स्थाने योगार्थं भविष्यति। कथम्, अधिकारो नाम त्रिप्रकारः। कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति, यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति।

अपरोऽधिकारो यथा रज्ज्वाऽयसा वा बद्धं काष्ठमनुकृष्यते तद्वदनुकृष्यते चकारेण। अपरोऽधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योगे उपतिष्ठते तद्यदेव पक्षोऽधिकारः प्रतियोगं तस्यानिर्देशार्थ इति, तदा हि यदेवाऽदः पुरस्तादवयवषष्ठ्यर्थमेतदुत्तरत्रानुवृत्तं सत् स्थाने योगार्थं भविष्यति' इति।

एतस्माद् भाष्याद् ज्ञायते यत् परिभाषाशास्त्रं 'षष्ठी स्थानेयोगा' इत्यादिकमपि महाभाष्यकारोऽधिकारत्वेन स्वीकरोति। अत्र तस्य परिभाषा-सूत्रस्यानुवृत्तिर्यदेवादः पुरस्तादवयवषष्ठ्यर्थं प्रकृतमेतदुत्तरत्रानुवृत्तं सद् इत्यादि-भाष्यबलादुत्तरसूत्रेष्वेव भविष्यति, न च पूर्वसूत्रेषु। परिभाषानिषेध-सूत्राणामधिकारत्वं कैयटनागेशावपि स्वीकुर्वतः 'षष्ठी स्थानेयोगा' इति सूत्रभाष्ये। महाभाष्यकारपतञ्जलिमतेनाधिकारत्वमधिकारसूत्रेषु परिभाषानिषेधसूत्रेषु

१. पा.सू. ८.२.१; २. तदेव- १.१.४८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

च वर्त्तते। तेन यदा वार्त्तिककारः पूर्वत्रासिद्धम् इति सूत्रव्याख्याने 'पूर्वत्रासिद्धमधिकार' इति वार्तिकमाह, तदा भाष्यकारस्तद्वार्तिकं व्याचक्षाणस्तत्र किमप्यन्यत् नोक्तवान्। यतो हि तस्य मते सूत्रस्यास्य परिभाषात्वेऽपि अधिकारत्वमस्त्येव। एतदेव मनसि निधाय महाभाष्यकारो वार्त्तिकोक्तं न खण्डितवान्। अत एव भाष्ये तस्य विधिसूत्रत्वविषय एव चर्चा समागता, न च परिभाषविषये। चेत् 'पूर्वत्रासिद्धम्'[१] इति सूत्रं महाभाष्यकारेण परिभाषात्वेनाभिमतं न स्यात्, तर्हि भाष्यकारस्तत्पक्षमुत्थाय स्वयमेव खण्डयेत्। न च तथा विहितम्, तेन ज्ञायते सूत्रमेतत् महाभाष्यकारेणापि परिभाषात्वेन स्वीकृतं विद्यते। चेदुच्यते नियमनिषेधापवादाधिकारसूत्राणि परित्यज्य तद्भिन्नेषु सूत्रमिदमधिक्रियत इति नियमः क्रियते, तदा तादृशपरिक्लिष्टकल्पनाविधानं सर्वत्र तत्तन्नियमनिषेधाधिकारापवादसूत्रविषये प्रभूतं नियमपरिकल्पनमेव दोषः। अपि च पारिभाषास्वीकारापेक्षया तस्याधिकारस्वीकार एव अधिका दोषा आयान्ति। अतः पूर्वत्रासिद्धमिति सूत्रं परिभाषासूत्रमेवाङ्गीकरणीयमिति सुधीभिर्विभावनीयम्।

●

१. पा.सू. ८.२.१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शुक्लयजुर्वेदमन्त्रसंहितायां नक्तमिति पदे ककारद्वित्वस्य विचारः

श्रीमान् आमोदवर्धनः कौण्डिन्न्यायनः
स्वाद्ध्यायशाला, १६८, शिवभक्तमार्गः,
लाजिम्पाट्, काष्ठमण्डपमहानगरम्,
नेपालदेशः

* * *

भारतवर्षीयाणां जनानां कृते सर्वविधज्ञानस्य स्रोतस्त्वेन स्थिता वेदा अतीव महत्त्वपूर्णाः सन्ति। ऋग्-यजुः-सामाऽथर्ववेदरूपेण चतुर्षु भागेषु विभक्तानां वेदानां मुख्यरूपेण मन्त्रभागो ब्राह्मणभागश्चेति द्वौ भागौ स्तः। ब्राह्मणभागे प्रायेण प्रसिद्धानि आरण्यकानि उपनिषदश्चान्तर्भवन्ति। वेदार्थज्ञानायैव वेदाङ्गानामपि रचना पश्चात्कालिकैर्मुनिभिः कृतेति ज्ञायते[१]। शिक्षा-कल्प-व्याकरण-निरुक्तच्छन्दो-ज्योतिषरूपेषु वेदाङ्गेषु मध्ये शिक्षा-नामकं वेदाङ्गं प्राथम्यं भजते। यतो हि शिक्षाज्ञानं विना वेदस्य शुद्धतयोच्चारणं कर्तुमेव न शक्यते। यदि वर्ण-स्वर-पदादीनां ज्ञानं शुद्धतया कर्तुं न शक्यते, तर्हि तदर्थ-तत्प्रयोगादिविचारावसर एव नाऽऽगच्छति। अतः सर्वप्रथमं वेदानां वर्ण-स्वर-पदादि-बाह्यस्वरूपं[२] ज्ञात्वा तदनुसारं शुद्धमुच्चारणं करणीयं भवति। अन्यथा तस्य विपरीतं फलं प्राप्यत इति शिक्षाशास्त्र उक्तं दृश्यते। तद्यथा—

---

१. 'साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः, उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च' इति निरुक्ते (१/६/५) यास्केनोक्तं दृश्यते।

२. 'शिक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्। साम सन्तानः। इत्युक्तः शिक्षाध्यायः'। इति तैत्तिरीयारण्यके (७/२) शिक्षाया विषया उल्लिखिताः सन्ति। तदेवानुसृत्य कौण्डिन्न्यायनशिक्षायां शिक्षाया लक्षणं प्रतिपादितं यथा—

वर्णानां च स्वराणां च मात्राया बलसाम्ययोः।
पदान्ताद्योः संहिताया विचारो यत्र लभ्यते॥

तत्सम्बद्धाश्चापरेऽपि विषया यत्र वर्णिताः।
भवति सा हि प्रथमा विद्या शिक्षेति भाषिता॥' इति (१/२-३, पृ. ८९)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्'॥

इति पाणिनीयशिक्षायाम्, श्लो. ५२; नारदीयशिक्षायां च-१/१/५।

अतस्तदर्थं तत्तद्वेदसम्बद्धानां प्रातिशाख्यानां[१] प्रातिशाख्यपरिशिष्टरूप-ग्रन्थानां शिक्षेति प्रसिद्धानां ग्रन्थानां चाध्ययनमावश्यकं भवति।

अधुना ऋग्वेदप्रातिशाख्यम्, तैत्तिरीयप्रातिशाख्यम्, शुक्लयजुर्वेद-प्रातिशाख्याम्, ऋक्तन्त्रम्, सामतन्त्रम्, अक्षरतन्त्रम्, पुष्पसूत्रम्, शौनकीया चतुरध्यायिका, अथर्वप्रातिशाख्यं चेति प्रातिशाख्यानि प्राप्यन्ते। शिक्षाशास्त्रान्तर्गता एव प्रातिशाख्यपरिशिष्टरूपा ग्रन्थाः शिक्षेति प्रसिद्धा ग्रन्था अपि प्रभूता एवोपलभ्यन्ते। शुक्लयजुर्वेदाध्यायिनां कृते पञ्चदशशाखा-साधारणस्य शुक्लयजुर्वेदप्रातिशाख्यस्य सम्बद्धवेदमन्त्रवर्णस्वरोच्चारणज्ञाने सर्वाधिकं महत्त्वं वर्तते। तथैव शुक्लयजुर्वेदसम्बद्धेषु प्रातिशाख्यपरिशिष्टग्रन्थेषु[२] मध्ये प्रतिज्ञासूत्र-भाषिक-सूत्रयोर्महत्त्वमधिकतरं वर्तते। प्रतिज्ञासूत्रे मुख्यतया माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-मन्त्रसंहिताया विशिष्टा अध्ययनधर्माः प्रतिपादिताः सन्ति। भाषिकसूत्रे तु शतपथब्राह्मणादि-ब्राह्मणग्रन्थानां वेदाङ्गानां च स्वरादीनामन्वाख्यानं कृतमस्ति। एवमेव शुक्लयजुर्वेदसम्बद्धाः शिक्षेति प्रसिद्धा ग्रन्था अपि प्रभूता एवोपलभ्यन्ते। तेषु याज्ञवल्क्यशिक्षा प्रमुखा वर्तते। अतो माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-मन्त्रसंहिताया वर्ण-स्वर-पदादीनामन्वाख्यानाय प्रवृत्तानां शुक्लयजुर्वेदप्रातिशाख्य-प्रतिज्ञासूत्र-याज्ञवल्क्यशिक्षादीनां शिक्षाशास्त्रग्रन्थानां साहाय्येनाऽपि तस्या वर्णस्वरादीनां निरूपणं कर्तव्यं भवति।

---

१. **'शाखायां शाखायां प्रतिशाखम्, प्रतिशाखं भवं प्रातिशाख्यम्'** इति प्रातिशाख्यशब्दस्य व्युत्पत्तिर्भवति। अतः प्रातिशाख्यैः स्ववेदशाखासम्बद्धानां वर्ण-स्वर-पदादीनां विषयो व्याख्यायते। प्रातिशाख्यप्रयोजनविषये उव्वटेनोक्तं यथा—

'जपादौ नाधिकारोऽस्ति सम्यक् पाठमजानतः।
प्रातिशाख्यमतो ज्ञेयं सम्यक् पाठस्य सिद्धये॥' इति शुक्लयजुर्वेदप्रातिशाख्यभाष्ये-१।१।

'शिक्षाच्छन्दोव्याकरणैः सामान्येनोक्तलक्षणम्।
तदेवमिह शाखायामिति शास्त्रप्रयोजनम्॥' इति च ऋग्वेदप्रातिशाख्यभाष्यारम्भे।

२. एतेषां प्रातिशाख्यपरिशिष्टरूपग्रन्थानां सङ्क्षिप्तः परिचयः कौण्डिन्न्यायनशिक्षायां दत्तोऽस्ति (पृ. ३४-३५)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अन्यासां वेदशाखानां मन्त्रसंहितानां मुद्रणं तत्तच्छाखीय-प्रातिशाख्य-शिक्षादिग्रन्थैरन्वाख्यातां स्वरवर्णानुपूर्वीमनुसृत्य कृतमद्यावधि न दृश्यते; किन्तु माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-मन्त्रसंहिताया मुद्रणं तु तदनुसारं कर्तुं प्रयत्नं दृश्यते। अतोऽस्या मन्त्रसंहिताया मुद्रणं प्रातिशाख्यादिभिरन्वाख्यातं द्वित्वादिकं[1] कृत्वाऽपि विहितं वर्तते। तथापि प्रातिशाख्याद्यनुसारं पूर्णतया परिशुद्धां स्वरवर्णानुपूर्वीमनुसृत्य मुद्रितं लिखितं वाऽपि पुस्तकं त्वस्या अपि मन्त्रसंहिताया अद्यावधि न दृष्टम्। तादृशपुस्तकमुद्रणायाऽस्माभिः प्रयासः कर्तुमावश्यकोऽस्ति। अस्मिन् प्रसङ्गे शुक्लयजुर्वेदप्रातिशाख्यस्य तद्भाष्याणां च सूक्ष्मरूपेणाऽध्ययने कृते विवेचनीया विभिन्ना विषया दृष्टिपथमागताः सन्ति। कुत्रचिद् भाष्यकाराणां प्रतिपादने परस्परमसमन्वयः, अस्पष्टता, असङ्गतिः, त्रुटिपूर्णता च दृश्यते। तेषु मध्य एको विषयोऽस्मिन् निबन्धे विवेचनपुरःसरं विदुषां विचारायाऽत्रोपस्थाप्यते।

पाणिनीयव्याकरणेन नक्तमिति पदे 'अनचि च'[2] (अष्टाध्यायी-८/४/४७) इति सूत्रेण वैकल्पिकरूपेण ककारस्य द्वित्वमन्वाख्यायते। ततश्च 'नक्तम्' इति ककारद्वित्वरहितं 'नक्क्तम्' इति ककारद्वित्वयुतं चोभयमपि रूपं साध्विति निश्चीयते। सर्ववेदपारिषदत्वेनाऽभिमतेन[3] पाणिनीयव्याकरणेन विभिन्नासु वेदशाखासु स्थितानां सर्वासां पृथक् पृथग् व्यवस्थानां स्वीकर्तव्यत्वाद् वैकल्पिकरूपेण विभिन्नरूपाणामन्वाख्यानं क्रियते; किन्तु कस्यामपि एकस्यां वेदशाखायां स्थितानां वैशिष्ट्यानामेव प्रतिपादनाय प्रवृत्तैः

---

१. यथा 'स्वरात् संयोगादिर्द्विरुच्यते सर्वत्र' (४/१०१) इत्युक्त्वा शुक्लयजुर्वेदप्रातिशाख्ये स्वरात् परस्य व्यञ्जनसंयोगादेर्द्वित्वस्याऽन्वाख्यानं कृतं तथैव ऋग्वेदप्रातिशाख्ये 'स्वरानुस्वारोपहितो द्विरुच्यते संयोगादिः स क्रमोऽविक्रमे सन्' इति (६/१), तैत्तिरीयप्रातिशाख्ये 'स्वरपूर्वं व्यञ्जनं द्विवर्णं व्यञ्जनपरम्' इति (१४/१), ऋक्तन्त्रे 'रात् णस्' इति (५/६/४ [२६९]) शौनकीयचतुरध्यायिकायां 'संयोगादि स्वरात्' इति (३/२८) चोक्त्वा व्यञ्जनद्वित्वस्याऽन्वाख्यानं कृतं दृश्यते। एवमेव विभिन्नवेदशाखासम्बद्धासु शिक्षास्वपि व्यञ्जनद्वित्वस्य विधानं प्राप्यते, तथापि तदनुसारं व्यञ्जनद्वित्वं प्रदर्श्य मुद्रितं पुस्तकं तु माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-मन्त्रसंहितां विहायाऽन्यासां मन्त्रसंहितानां नोपलभ्यत इत्यत्र विद्वद्भिर्ध्यानं दातव्यं दृश्यते।

२. 'अचः (स्वरस्य) परत्र स्थितस्य यरः (व्यञ्जनस्य) अनचि (व्यञ्जने) परे च द्वे (द्वित्वं) वा भवतः' इति अनचि चेति सूत्रस्यार्थः।

३. 'सर्ववेदपारिषदं हीदं शास्त्रम्। तत्र नैकः पन्थाः शक्य आस्थातुम्' इति (व्याकरणमहाभाष्ये-२.१.५८, ६.३.१४)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रातिशाख्यैस्तु[१] तत्तच्छाखाविशेषशब्दरूपाणामन्वाख्यानमेव क्रियते। अत: प्रातिशाख्येनाऽन्वाख्यातं रूपं न वैकल्पिकरूपेण स्वीक्रियते। एवञ्च शुक्लयजुर्वेदप्रातिशाख्येन नक्तमिति पदे एक एव ककारोऽन्वाख्यायते, अथवा द्वौ ककारावेवाऽन्वाख्यायेते इति निश्चेयं भवति। न त्वत्र वैकल्पिकरूपेण ककारस्य एकत्वं द्वित्वं वाऽप्यन्वाख्यातं स्वीकर्तुं शक्यते।

शुक्लयजुर्वेदप्रातिशाख्येन काँश्चिदपवादान् विहायाऽन्यत्र 'स्वरात् संयोगादिर्द्विरुच्यते सर्वत्र' (४/१०१) इत्युक्त्वा स्वरात् परत्र स्थितस्य संयोगादेर्व्यञ्जनस्य नित्यमेव द्वित्वमन्वाख्यायते। अतो 'नक्त'मिति पदेऽप्येतेनैव सूत्रेण द्वित्वं प्राप्नोति। अस्यापवादोऽपि न दृश्यत इति सामान्यतया प्रतीयते। माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-मन्त्रसंहिताया अधुना मुद्रितेषु व्यञ्जनद्वित्वयुतेषु सर्वेष्वेव पुस्तकेषु एतस्मिन् पदे ककारस्य द्वित्वं कृतमेव दृश्यते[२]। अतोऽद्यावधि केनापि विदुषा अस्मिन् पदे ककारस्य द्वित्वं भवति न वेत्येवं प्रकारक: प्रश्नो नोत्थापितो न च विवेचित इत्ययं विषय: सर्वथा नवीन: प्रतीयते। तथाप्यस्माकं विचारे नक्तमिति पदे ककारस्य द्वित्वं शुक्लयजुर्वेदप्रातिशाख्येनैव निषिद्धमिति मन्तुमपि शक्यं प्रतीयते। अतोऽयं विषयो विदुषां विचारायात्रोपस्थाप्यते।

---

१. 'शाखायां शाखायां प्रतिशाखम्, प्रतिशाखं भवं प्रातिशाख्य'मिति प्रातिशाख्यस्य व्युत्पत्तिर्भवति। अतो वेदस्य प्रत्येकं शाखाया: पृथक् पृथक् प्रातिशाख्यं भवितुमर्हति। तथापि प्राय: समानधर्माणां वेदशाखानां वैशिष्ट्यमेकेनैव प्रातिशाख्येनाऽपि प्रदर्शयितुं शक्यते लाघवार्थमिति ज्ञायते। शुक्लयजुर्वेदप्रातिशाख्यं (वाजसनेयिप्रातिशाख्यं) शुक्लयजुर्वेदपञ्चदशशाखासाधारणं वर्तते। अत एव तत्र काण्वशाखाया: पृथग् वैशिष्ट्यं पृथगेवोल्लिखितमपि दृश्यते। तद्यथा—विसर्जनीय: कखयो: पफयोश्च परयो: सतो: माध्यन्दिनीयशाखायां प्रकृत्यैव तिष्ठति; किन्तु काण्वशाखायां क्रमश: जिह्वामूलीयत्वमुपध्मानीयत्वं चाऽऽपद्यते इत्युक्तं तत्र 'प्रकृत्या कखयो: पफयोश्च जिह्वामूलीयोपध्मानीयौ शाकटायन:' (३.११-१२) इति। एतादृशी व्यवस्थैव शास्त्रे व्यवस्थितविकल्प इति कथ्यते।

२. अमृतलालशास्त्रिण: प्रास्ताविकेन (१९५०.३.१९) याज्ञिकसम्राज: पण्डित-वेणीरामशर्मगौडस्य प्राक्कथनेन (१९८३.८.३१) च युते संस्करणे (तृ.सं. १९८८, वाराणसी), काशीस्थसाङ्गवेदविद्यालय-शुक्लयजुर्वेदप्रधानाध्यापकस्य दाऊजीभट्टोपाह्वस्य गणपतिशर्मदीक्षितस्य संस्करणे (वि.सं. १९९२, वाराणसी), बहूनां पण्डितानां साहाय्येन परिशुद्धं मुद्रितुं प्रयत्ते भगवान् वेद इति नामके गङ्गेश्वरानन्दसंस्करणे (द्वयो: स्थानयो:) (वि.सं. २०२७ वाराणसी), दौलतरामगौडस्य (भूमिका, वि.सं. २०००, वसन्तपञ्चमी) संस्करणे (वि.सं. २०४४, वाराणसी), अन्येषु संस्करणेषु च नक्क्तमिति पदे ककारस्य द्वित्वं मुद्रितं दृश्यते। तथैव हस्तलेखेष्वप्येवमेव दृश्यते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यद्यपि शुक्लयजुर्वेदप्रातिशाख्यस्य 'स्वरात् संयोगादिर्द्विरुच्यते सर्वत्र' (४/१०१) इति सूत्रेण नक्तमिति पदेऽप्युत्सर्गतः ककारस्य द्वित्वं प्राप्नोति, तस्य निषेधकमन्यत् स्पष्टं वचनं किमपि न दृश्यते च, तथापि **'द्विस्पर्शम्'** (६/२५) इति सूत्रस्याधिकारे संयुक्ताभ्यां द्वाभ्यां स्पर्शाभ्यां युक्तानां पदानां परिगणने 'नक्तम्' इति पदस्यापि परिगणनं कृतम् (६/२६) इति हेतोरस्मिन् पदे ककारस्य द्वित्वं निषिद्धमिति मन्तुं शक्यं दृश्यते। ककारस्य द्वित्वे स्वीकृते त्वस्मिन् पदे त्रयाणां स्पर्शानां संयोगस्य स्वीकार्यत्वात् कात्यायनमुनिप्रणीतस्य आर्षग्रन्थस्य शुक्लयजुर्वेदप्रातिशाख्यस्य सूत्रस्यैव (६/२६) असङ्गतत्वं कथयितुं शक्यं भवति। अथवा तत्र नक्तमिति पदस्य परिगणनमेव कृतं नास्ति, तत्रास्य पदस्य समावेशोऽपपाठत्वेन जातोऽस्तीति च मन्तव्यं भवति। एवञ्चायं विषयः सम्यग् विवेचनीयो दृश्यते। अतस्तद्विवेचनाय सूत्रस्वरूपं तद्व्याख्यानं चाधः प्रदर्श्यते। तद्यथा—

द्विस्पर्शम्। (६/२५)

'द्वौ स्पर्शौ यस्मिन् पदे तद् द्विस्पर्शं पदम्। अधिकारसूत्रमेतत्'। इति उव्वटभाष्यम्।

'एवमाख्यातोपसर्गयोः स्वरमुक्त्वा अधुनावशिष्टं संयोगमाह। द्विस्पर्शमिति द्वौ स्पर्शौ यस्मिन् पदे तद् द्विस्पर्शं भवति। अधिकारसूत्रमेतत्'। इत्यनन्तभाष्यम्।

वेत्तु वित्त्वाऽस्मद्द्र्यक् पात्त्रमभित्त्यम् मृत्तिका द्ध्वं दात्त्रं समाववर्त्यृद्धिर्वृद्धिरराद्ध्या अर्द्धशुद्धबुद्धनक्क्तं निषण्णस्विन्नान्नसन्नाश्च। (६/२६)

'एतेषु पदेषु द्वौ स्पर्शौ भवतः। वेत्तु यथा— 'प्रति त्वा पर्वती वेत्तु' (मा.वा.सं.१/१९)। द्वौ तकारौ संयोगः। वित्त्वा यथा....। द्वौ तकारौ वकारश्च संयोगः। अस्मद्द्र्यक् यथा....(द्वौ दकारौ रेफो यकारश्च संयोगः)। पात्त्रं यथा....। द्वौ तकारौ रेफश्च संयोगः। अभि त्त्यं यथा....। द्वौ तकारौ यकारश्च संयोगः। मृत्तिका यथा....। द्वौ तकारौ संयोगः। द्ध्वं यथा— विमुच्यद्ध्वम्....। दकारधकारौ वकारश्च संयोगः। दात्त्रं यथा....। द्वौ तकारौ रेफश्च संयोगः। समाववर्त्ति यथा....। रेफो द्वौ तकारौ च संयोगः। ऋद्धिर्यथा....। दकारधकारौ संयोगः। वृद्धिर्यथा....। दकारधकारौ संयोगः। अराद्ध्यै यथा....। दकारधकारौ यकारश्च संयोगः। अर्द्धो यथा....।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रेफदकारधकाराः संयोगः। शुद्धो यथा....। दकारधकारौ संयोगः। बुद्धो यथा....। दकारधकारौ संयोगः। नक्क्तं यथा—'मधु नक्क्तमुतोषसः' (मा.वा.सं. १३/२८)। द्वौ ककारौ तकारश्च संयोगः। निषण्णो यथा....। द्वौ णकारौ संयोगः। स्विन्नो यथा....। द्वौ नकारौ संयोगः। अन्नं यथा....। द्वौ नकारौ संयोगः। सन्नो यथा....। द्वौ नकारौ संयोगः। 'स्वरात् संयोगादिः' इत्यस्य प्रायशोऽपवादभूतमेतत् सूत्रम्'[१]। इति उव्वटभाष्यम्।

'मृत्तिका दृध्वम् इति विच्छेदः। वेत्त्वादिविंशतिपदेषु द्वौ स्पर्शौ भवतः।....'अस्मद्द्र्यग्वावृधे'। अत्र द्वौ दकारौ रेफयकारौ संयोगः। एवमुत्तरत्रापि प्रत्युदाहरणं द्वौ द्वौ स्पर्शौ द्रष्टव्यौ।....'मधु नक्क्तम्'। 'यदि दिवा यदि नक्क्तम्'।....इत्यनन्तभाष्यम्।

उपरि प्रदर्शिते सूत्रे नक्तमिति पदं शुक्लयजुर्वेदप्रातिशाख्यस्य बहुषु संस्करणेषु ककारद्वित्वयुतरूपेण मुद्रितं दृश्यते। यथा—डॉ. वीरेन्द्रकुमारवर्मसम्पादिते उव्वटानन्तभाष्यद्वययुते पुस्तके (१९७५, वाराणसी, पृ. ३७७), आचार्ययुगलकिशोरमिश्रसम्पादितस्य ज्योत्स्नावृत्ति-युतस्य पुस्तकस्य आर्षसूत्रपाठे (१९८९, वाराणसी, पृ. २८८), श्रीमत्या इन्दु-रस्तोग्या आङ्ग्लभाषानुवादसहितं सम्पादिते पुस्तके (१९६७, वाराणसी, पृ. ३० (मूलसूत्रपाठे), पृ. ८४) इति। जीवानन्दविद्यासागरेण सम्पादिते पुस्तके तु ककारद्वित्वमत्र मुद्रितं नास्ति (१८९३ द्वि.सं., कोलकाता, पृ. २०१)। किन्तु 'अभित्यम्, अराध्यै' इत्येतयोः पदयोरपि तत्र द्वित्वममुद्रितमिति तस्य संस्करणस्य शुद्धाशुद्धिविवेचनप्रसङ्गे प्रामाण्यं ग्रहीतुमशक्यमिति ककारद्वित्वनिर्णयेऽपि तस्याऽकिञ्चित्करत्वं स्वीकर्तव्यं भवति; किन्तु बहुविधप्राचीन-हस्तलिखितपुस्तकानां साहाय्येन पर्यालोचनपुरःसरं श्रीमत्या इन्दुरस्तोग्या सम्पादिते पाठान्तरयुते शुक्लयजुर्वेदप्रातिशाख्यपुस्तके तु नक्तमिति पदे ककारद्वित्वरहितः पाठोऽपि टिप्पण्यां प्रदर्शितोऽस्ति (पृ. ३० मूलसूत्रपाठे)। एष पाठस्तु विचारणीयो दृश्यते।

---

१. एतत्सूत्रोल्लिखितेषु पदेषु 'स्वरात् संयोगादिर्द्विरुच्यते सर्वत्र' (४.१०१) इति सूत्रेण संयोगादिद्वित्वे प्राप्तेऽपि 'सवर्णे' (४.११२) इति सूत्रेण, 'स्ववर्गीये चाऽनुत्तमे' (४.११७) इति सूत्रेण च यथायथं द्वित्वनिषेधो भवतीति हेतोरियमुव्वटोक्तिरस्थाने प्रतीयते। एषोक्तिः 'उपोत्थित उत्तम्भनम्' (६.२९) इत्यादिसूत्रोल्लिखितानां पदानां सम्बन्धे सार्थिका दृश्यते। तथापि तत्र तु एषोक्तिर्नास्तीति ज्ञेयम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विक्रमसंवत्सरस्य एकादश-द्वादशशतकयोर्वर्तमानेन उव्वटेन[१] नक्क्तमिति पदे 'द्वौ ककारौ तकारश्च संयोग:' इत्युक्त्वा ककारस्य द्वित्वे प्रदर्शिते सति विना विवेचनं तद्गतानुगतिकैरन्यैरपि सर्वत्र तथैवोक्तं स्यादित्यवगम्यते। उव्वटेन एकत्र 'एतेषु पदेषु द्वौ स्पर्शौ भवत:' इत्युक्त्वा नक्तमिति पदेऽपि एकस्यैव ककारस्य सत्ता स्वीकृता, अन्यत्र पुनस्तेन नक्क्तमिति पदे 'द्वौ ककारौ तकारश्च संयोग:' इत्युक्त्वा द्वौ ककारौ तकारश्चेति सङ्कलने त्रीन् स्पर्शान् उल्लिख्य वदतोव्याघात: कृतो दृश्यते; किन्तु पश्चात्कालिकै: कैरपि एष विषयो न विवेचित इत्यप्यत्र स्मरणीयम्।

विक्रमसंवत्सरस्य सप्तदशशतकस्योत्तरार्धे अष्टादशशतकस्य पूर्वार्धे वा वर्तमानेन अनन्तदेवयाज्ञिकेनाऽप्युव्वटमेवाऽनुसृत्य[२] 'वेत्त्वादिविंशतिपदेषु द्वौ स्पर्शौ भवत:' इत्युक्तमस्ति। तथापि तेन 'मधु नक्क्तम्', 'यदि दिवा यदि नक्क्तम्' इत्युदाहरणयोस्तु त्रय: स्पर्शा: प्रदर्शिता: सन्ति। अनेनाऽप्ययं विषयो विवेचितस्तु न दृश्यते। केवलं तेनोव्वटानुसरणमेव कृतमवगम्यते।

ज्योत्स्नावृत्तिकारेण रामशर्मणा तु शुक्लयजुर्वेदप्रातिशाख्यस्य सूत्राणि प्रक्रियाक्रममाश्रित्य सम्पादितानि व्याख्यातानि च सन्ति। अतस्तेन सर्वाणि सूत्राणि व्याख्यातानि न सन्ति। उपर्युक्ते द्वे सूत्रे अपि तेन व्याख्याते नैव स्त:। अतो ज्योत्स्नावृत्तिकारस्याऽस्मिन् विषये किमपि व्याख्यानं नोपलभ्यते।

प्रातिशाख्यप्रदीपशिक्षाकारेण बालकृष्णगोडशेमहोदयेनाऽप्ययं विषयोऽनुल्लिखितो दृश्यते। अन्यैरर्वाचीनै: शिक्षाकारैरप्ययं विषयोऽस्पृष्ट एवाऽवलोक्यते। आचार्य-शिवराज-कौण्डिन्न्यायनप्रणीतायां महाशिक्षायां कौण्डिन्न्यायनशिक्षायामप्येष विषयो विवेचितो न दृश्यते।

डॉ. वीरेन्द्रकुमारवर्मणा शुक्लयजुर्वेदप्रातिशाख्यस्य उव्वटानन्तभाष्यद्वययुते पुस्तके कुत्रचिदुव्वटस्य भाष्यस्याऽसङ्गतत्वमपि प्रदर्शितं वर्तते

---

१. वेदभाष्यकारात् सायणादपि प्राचीन उव्वटो माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-मन्त्रसंहिताया 'मन्त्रभाष्यम्' इति नामकं भाष्यं चकार। स ऋग्वेदप्रातिशाख्यभाष्यम्, शुक्लयजुर्वेदप्रातिशाख्यभाष्यं मातृमोदाख्यम्, ऋक्सर्वानुक्रमणीभाष्यं च विदधे।

२. माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-मन्त्रसंहिताया भाष्यकाराद् महीधरात् पश्चात्कालिक: काशीनिवासी अनन्त: काण्वसंहिताभाष्यम् (उत्तरविंशतौ), पदार्थप्रकाशाख्यं शुक्लयजुर्वेदप्रातिशाख्यभाष्यं च चकार। प्रतिज्ञासूत्रस्य भाषिकसूत्रस्य च व्याख्याऽप्यनेन कृता वर्तते। अस्य नाम कुत्रचिद् अनन्तदेवयाज्ञिक इति कुत्रचिच्च अनन्तभट्ट इत्यनेन प्रकारेणोल्लिखितं दृश्यते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(पृ. ५७); किन्त्वस्मिन् विषये तेन मौनमेवाऽवलम्बितमिति तस्याप्यत्र ध्यानं न गतमिति स्पष्टं भवति। एतस्य सूत्रस्य हिन्दीभाषामय्यां व्याख्यायां तेन केवलम् 'एतेषु पदेषु द्वौ स्पर्शौ भवतः (इन पदों में दो स्पर्श होते हैं)' इत्येवोक्तं दृश्यते। इन्दुरस्तोग्या अप्येतस्य सूत्रस्य आङ्गलभाषामयेऽनुवादे 'एतानि पदानि द्विस्पर्शानि सन्ति (द वर्ड्ज् वेत्तु....नक्क्तम्....ह्याव् टू कण्ट्याक्ट् कन्सोनण्ट्स्)' इत्युक्तं दृश्यते।

वी. वेङ्कटरामशर्मणा आङ्ग्लभाषायां रचिते 'क्रिटिकल् स्टडिज् अन् कात्यायनाज् शुक्लयजुर्वेदप्रातिशाख्य (कात्यायनस्य शुक्लयजुर्वेद-प्रातिशाख्यस्य समीक्षात्मकमध्ययनम्)' इति नामके ग्रन्थेऽप्यस्य विषयस्य समीक्षा कृता न दृश्यते (१९३५, मद्रासविश्वविद्यालयः)।

आचार्ययुगलकिशोरमिश्रप्रणीते 'वाजसनेयि-प्रातिशाख्य : एक परि-शीलन (वाजसनेयिप्रातिशाख्यस्य एकं परिशीलनम्)' इति नामके हिन्दीभाषामये ग्रन्थेऽप्यस्य विषयस्य विवेचनं कृतं न दृश्यते। तत्र द्विस्पर्शपदानां परिगणने '.....नक्क्तम्, निषण्णः, स्विन्नः, अन्नम् तथा सन्नः इत्येतानि द्विस्पर्शपदानि सन्ति (....ये द्विस्पर्श पद हैं)' इत्यनेन प्रकारेण उल्लेखः कृतः प्राप्यते (१९९७, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी पृ. २५०)। तत्राऽन्यस्मिन् स्थानेऽपि नक्क्तमिति पदं ककारद्वित्वयुतमेव मुद्रितं दृश्यते (पृ. ३१९, [२६]।

एतेन प्रकारेण अद्यावधि नक्क्तमिति पदं यद्यपि सर्वैः द्विस्पर्शयुतमेवोल्लिखितम्, तथापि ककारद्वित्वयुतरूपेण तस्योल्लेखं वर्णनं वाऽपि कृत्वा तत् पदं तैस्त्रिस्पर्शयुतमेव प्रमाणीकृतं दृश्यते। तथाऽप्युव्वटप्रभृतीनां विदुषां परस्परविरोधपूर्णमेतादृशं प्रतिपादनमपीतः पूर्वं कैरपि न दृष्टं नोल्लिखितं न वा विवेचितमिति आश्चर्यस्य विषयोऽयम्।

यदि नक्क्तमिति पदं त्रिस्पर्शं कात्यायनमुनेरभिमतमभविष्यत्, तदा तु तत्पदं शुक्लयजुर्वेदप्रातिशाख्यस्य 'उपोत्थित उत्तम्भनमुत्तभानोत्त्थायोत्थिता-येति त्रीणि' इति सूत्रे (६/२९) परिगणितानां त्रिस्पर्शानां पदानां मध्ये समाविष्टमभविष्यदित्यपि कल्पयितुं शक्यं दृश्यते। अतोऽपि नक्तमिति पदं ककारद्वित्वरहितं भवेदित्यनुमातुं शक्यते; किन्तु माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-मन्त्रसंहिताया विभिन्नेषु मन्त्रेषु आगतं नक्तमिति पदं ककारद्वित्वयुतरूपेणैव तत्र तत्र विभिन्नेषु संस्करणेषु मुद्रितं दृश्यते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रातिशाख्यप्रतिपादितद्वित्वादेरनुसरणमकृत्वा मुद्रितेषु संस्करणेष्वेवाऽस्मिन् पदे ककारद्वित्वरहितं मुद्रणं कृतं दृश्यते। अतो नक्क्तमिति पदे शुक्लयजुर्वेदप्रातिशाख्यस्य 'स्वरात् संयोगादिर्द्विरुच्यते सर्वत्र' (४/१०१) इति सूत्रेणोत्सर्गतः प्राप्तं ककारद्वित्वमनिषिद्धमिति धारणा माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-मन्त्रसंहितासम्पादकेष्वपि स्थिताऽवगम्यते; किन्तु 'स्वरात् संयोगादिर्द्विरुच्यते सर्वत्र' इति सूत्रेण दन्त्यसकारस्याऽपि द्वित्वे उत्सर्गतः प्राप्ते 'द्विसकारं शास्स्व रास्स्वेति' (४/१४७) इति सूत्रस्य दर्शनादेवाऽन्यत्र तस्य द्वित्वं शुक्लयजुर्वेदे प्रातिशाख्येनैव निषिद्धं मन्यमानाः केचन अर्वाचीनाः शिक्षाकारास्तदनुयायिनो वैदिकाश्चानेनैव न्यायेन नक्क्तमिति पदस्य द्विस्पर्शत्वेन प्रातिशाख्यसूत्रे उल्लिखितत्वात् तत्र ककारद्वित्वं निषिद्धं कथं न मेनिरे इति तु न ज्ञायते।

एतावता विवेचनेनास्मिन् विषयेऽधः प्रदर्शितेषु त्रिषु पक्षेषु मध्ये एकः पक्षः समाश्रयणीयः प्रतीयते—

(१) 'वेत्तु वित्त्वा' (६/२६) इत्यादिकं कात्यायनप्रणीतं सूत्रमेवासङ्गतं दृश्यते, नक्क्तमिति त्रिस्पर्शस्य पदस्य द्विस्पर्शपदत्वेन द्विस्पर्शेषु पदेषु मध्ये समावेशादिति।

अथवा

(२) 'वेत्तु वित्त्वा' (६/२६) इत्यादिके सूत्रे नक्क्तमिति पदस्य पाठोऽपपाठो वर्तते। अर्थात् तस्मिन् सूत्रे नक्क्तमिति पदं प्रक्षिप्तमवगम्यत इति।

अथवा

(३) नक्तमिति पदं द्विस्पर्शमेव वर्तते। अतोऽस्मिन् पदे ककारस्य द्वित्वं न भवति। उव्वटादीनां व्याख्यानं तु भ्रमपूर्णमेव वर्तत इति।

उपर्युक्तेषु पक्षेषु मध्ये प्रथमः पक्षस्तु कथमपि स्वीकर्तुं न शक्यते। यतो हि आर्षग्रन्थस्यासङ्गतत्वं भवितुमेव नार्हति। कात्यायनमुनेर्द्विस्पर्श-त्रिस्पर्शपदविवेचनसदृशे सामान्यविषयेऽपि विवेकशैथिल्यं कल्पयितुं कथमपि औचित्यपूर्णं न भवति।

उपरि प्रदर्शितो द्वितीयः पक्षोऽपि कल्पयितुं सहसा न शक्यते। शुक्लयजुर्वेदप्रातिशाख्यस्य नित्यस्वाध्यायाऽध्ययनेनाऽद्यावधि अविकल-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रूपेणाऽऽगतत्वात्, मुद्रितेष्वमुद्रितेषु च सर्वेषु पुस्तकेषु तस्मिन्नेव सूत्रे नक्तमिति पदस्य दर्शनात्, उव्वटादिभिरपि तथैव व्याख्याततत्वाच्च नक्तमिति पदं सूत्रमध्ये प्रक्षिप्तं भवेदित्यनुमानमप्यन्याय्यमेवेति ज्ञायते।

अत: परिशिष्टस्तृतीय: पक्ष एव आपातत: स्वीकर्तुमुचितो दृश्यते। अस्मिन् पक्षे स्वीकृते सति कात्यायनमुनिप्रणीतसूत्रस्य सङ्गतिरपि भवति, सूत्रपाठे अपपाठशङ्काऽपि निवार्यते। केवलमुव्वटप्रभृतीनां विदुषां परस्परं विरोधपूर्णयो: प्रतिपादनयोर्मध्य एकं प्रतिपादनं भ्रमपूर्णं वदतोव्याघातयुतं वाऽपि मत्वा परिहरणीयं भवति। नक्क्तमिति पदे ककारद्वित्वे स्वीकृतेऽपि 'एतेषु पदेषु द्वौ स्पर्शौ भवत:' इत्युव्वटोक्ति: खण्डनीया एव भवति, तत्र ककारद्वित्वे अस्वीकृतेऽपि 'नक्क्तं यथा....। 'द्वौ ककारौ तकारश्च संयोग:' इत्येषा तदुक्ति: खण्डनीया एव भवति। अत उव्वटोक्तौ सङ्गति: स्थापयितुं न शक्यते। कात्यायनमुने: सूत्रे सुसङ्गति: प्रदर्शयितुं तु शक्यत एव।

अतो माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-मन्त्रसंहिताया: 'मधुनक्त-मुतोषस:' (१३/२८), 'उषासा नक्तम्' (२०/६१), 'पाहि नक्तम्' (२०/६२), 'उषे नक्तम्' (२१/३५), 'दिवानक्तम्' (२१/३६) इत्यादिषु स्थलेषु आगते नक्तमिति पदे ककारस्य द्वित्वं न भवति, द्वित्वं नोच्चारणीयम्, द्वित्वं नैव मुद्रापणीयं चेति सिद्धान्त: स्वीकर्तुमुचितो भवति, न वेति विद्वद्भिरथ सम्यग् विविच्य परीक्षणीय इत्यस्माकं प्रार्थना विदुषां पुरस्ताद् वर्तते।

अथवा कात्यायनमुनिना 'वेत्तु, वित्त्वा, ऋद्धि:, वृद्धि:' इत्यादीनि अन्यानि सर्वाणि उदाहरणानि यथा एकवर्गीयस्पर्शद्वित्वयुतानि सङ्कलितानि, तथैव 'नक्क्तम्' इति पदमपि भिन्नवर्गीयतकारमविगणय्य केवलं ककारद्वित्वयुतत्वेन प्रदर्शितमिति व्याख्याय कात्यायनमुने: सूत्रस्य सङ्गतत्वं कथञ्चिदुपपादयितुं शक्यमपि दृश्यते। एवं सति नक्क्तमिति पदे उत्सर्गत: प्राप्तं ककारद्वित्वमनिषिद्धमेव मन्तुमपि शक्यते; किन्तु कात्यायनमुनिप्रणीतस्यास्य सूत्रस्य सङ्गते: स्थापनाय एतादृशं स्पष्टीकरणमुव्वटानन्तादिभि: प्राचीनैर्भाष्यकारै: आधुनिकै: समीक्षकैश्चाऽप्यद्यावधि अकृतत्वादस्मिन् विषयेऽस्माभिर्विदुषां पुरत एषा शङ्का उपस्थापिता वर्तते। अतोऽस्मिन् विषये विद्वद्भिर्भृशं विचार्य निष्कर्ष: सर्वेषां पुरस्तात् स्थापनीयो दृश्यत इति शम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सन्दर्भग्रन्था:–

१. अष्टाध्यायी, पाणिनिविरचिता, काशिकया वृत्त्या सहिता।

२. पाणिनीयव्याकरणभाष्यम्, पतञ्जलिविरचितम्।

३. ऋग्वेदप्रातिशाख्यम्, उव्वटभाष्यसहितम्, सम्पादक:—डॉ. वीरेन्द्रकुमारवर्मा, वाराणसी, १९७०।

४. तैत्तिरीयप्रातिशाख्यम्, माहिषेयभाष्यसहितम्, सम्पादक:—वी. वेङ्कटरामशर्मा, दिल्ली, १९८२।

५. शुक्लयजुर्वेदप्रातिशाख्यम्, उव्वटभाष्यसहितम्, सम्पादक:—जीवानन्दविद्यासागर:, कोलकाता, १८९३ द्वि.सं.।

६. शुक्लयजुर्वेदप्रातिशाख्यम्, उव्वटभाष्यानन्तभाष्यसहितम्, सम्पादक:—डॉ. वीरेन्द्रकुमारवर्मा, वाराणसी, १९७५।

७. शुक्लयजुर्वेदप्रातिशाख्यम्, आङ्ग्लभाषानुवादसहितम्, सम्पादिका—श्रीमती इन्दुरस्तोगी, वाराणसी, १९६७।

८. शुक्लयजुर्वेदप्रातिशाख्यम्, ज्योत्स्नावृत्तियुतम्, सम्पादक:—आचार्ययुगलकिशोरमिश्र:, वाराणसी, १९८९।

९. ऋक्तन्त्रम्, ऋक्तन्त्रवृत्तिसहितम्, सम्पादक:—डा. सूर्यकान्त:, दिल्ली, १९७० (द्वि.सं.)।

१०. शौनकीयचतुरध्यायिका, आङ्ग्लभाषानुवादसहिता, सम्पादक:—ह्विट्नि:, वाराणसी, १९६२ (द्वि.सं.)।

११. पाणिनीयशिक्षा, वेदाङ्गशिक्षाविमर्शाख्यव्याख्यासहिता, चौखम्बाविद्याभवनम्, वाराणसी, १९९८।

१२. नारदीयशिक्षा, शिक्षाविवेचन्याख्यव्याख्यासहिता, चौखम्बाविद्याभवनम्, वाराणसी, २००२।

१३. प्रातिशाख्यप्रदीपशिक्षा, बालकृष्णगोडशेरचिता, शिक्षासङ्ग्रहान्तर्गता।

१४. कौण्डिन्न्यायनशिक्षा, आचार्यशिवराजकौण्डिन्न्यायनरचिता, काष्ठमण्डपनगरम्, नेपालदेश:, २०४९ वै.।

१५. शिक्षासङ्ग्रह: (श्रीमद्याज्ञवल्क्यादिमहर्षिप्रणीत: शिक्षासङ्ग्रह:), सम्पादक:—युगलकिशोरपाठक:, वाराणसी, १८८९-९३।

१६. शुक्लयजुर्वेदसंहिता, अमृतलालशास्त्रि-वेणीरामगौडसम्पादिता (गुटिका), वाराणसी, तृ.सं. १९८८।

१७. शुक्लयजुर्वेदसंहिता, दौलतरामशर्मसम्पादिता (गुटिका), वाराणसी, २०४४ वै.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१८. शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता, गणपतिशर्मसंशोधिता, रामघट्टः, काशी, १९३६।

१९. शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता, डॉ. युगलकिशोरमिश्रसम्पादिता, पञ्चमावृत्तिः, मुम्बई, १९९४।

२०. भगवान् वेदः, सम्पादकः—स्वामिगङ्गेश्वरानन्द उदासीनः, वाराणसी, १९७०।

२१. तैत्तिरीयारण्यकम्, सायणभाष्यसहितम् (द्वितीयो भागः), आनन्दाश्रमः, पुण्यपत्तनम्, १९६९ (तृ.सं.)।

२२. निरुक्तम्, दुर्गविरचितवृत्तिसहितम्, (द्वितीयो भागः) कलकत्ता, १९५२।

२३. वाजसनेय प्रातिशाख्य : एक परिशीलन, प्रो. डॉ. युगलकिशोरमिश्रः, सं.सं.वि.वि., वाराणसी, १९९७।

२४. क्रिटिकल् स्टडिज् अव् कात्यायनाज् शुक्लयजुर्वेदप्रातिशाख्य, वी. वेङ्कटरामशर्मा, मद्रासः, १९३५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अद्वयद्वयसद्वपुः शिवः

डॉ. कमलेशझाः
उपाचार्यः, संस्कृतविद्याधर्मविज्ञानसङ्कास्य
काशी-हिन्दू-विश्वविद्यालयये, वाराणस्याम्

❀ ❀ ❀

संस्कृतवाङ्मये निगमागमप्राधान्येन श्रुतिस्मृतिशास्त्रपुराणादीनां विशालं साहित्यं राराजते। परम् 'अध्यात्मविद्या विद्यानाम्, अक्षराणामकारोऽस्मि, गिरामस्म्येकमक्षरम्' इत्यादिना अध्यात्मविद्यायाः प्राधान्यं भगवता वासुदेवेन गीतम्। अध्यात्मविद्यैव नानाप्रस्थानभेदशालि दर्शनशास्त्रम्, नवनवोन्मेषशालि कालातीतवपुः, कालजयि च विजयते। तत्रापि अद्वैतवाद एव प्राधान्यं भजते। प्रकृतनिबन्धे पूर्वं मायावादो निविश्यते, यत्रानादिभूतापि माया मिथ्याभूतं जगत् सृजन्ती चैतन्यमाच्छादयतीव। अनन्तरं स्वातन्त्र्यवादमूलक ईश्वराद्वयवादः सन्निविश्यते, यत्र भगवतः शिवस्य या तदभिन्ना आनन्दशक्तिस्तदेव स्वातन्त्र्यमित्युच्यते। शिवोऽनेनैव स्वातन्त्र्येण विश्वमयो भवति। अथ चानेनैव स्वातन्त्र्येण विश्वोत्तीर्णो भवति। ततश्च विश्वमयतादशायां स्वातन्त्र्यस्यैवापरं नामधेयं माया या शिवस्वभावभूता, न तु तुच्छानिर्वचनीया वा। अनयोर्वादयोर्दर्शनेषु नितरां प्रतिष्ठितयोस्ते ते विशेषाः श्रीगुरुशास्त्र- कृपया निबन्धेऽस्मिन् प्रतिबिम्बिताः सन्ति। धीधनैः प्रस्थानभेदमाकलयद्भिस्ते ते विशेषाश्चीयन्तामात्मनो मुख्यमैश्वर्यञ्च प्रत्यभिज्ञायतामित्यभ्यर्थना।

समुच्छलन्त्यै जगदात्मिकायै शान्तस्वरूपाय सदाशिवाय।
सते भवन्त्यै भवते च सत्यै नमः शिवायै च नमः शिवाय[१]॥

मा वम संवृणु विषमिदमिति सातङ्कं पितामहेनोक्तः।
प्रातर्जयति सलज्जः कज्जलमलिनाधरः शम्भुः[२]॥

---

१. द्रष्टव्यम्, संवित्स्वातन्त्र्यम्, श्लोक-सं. ४५६।

२. आर्या-सप्तशती, पृ. २।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वाधारादुल्लसन्ती द्युतिविदितमहादिव्यतेजःस्वरूपा
षट्चक्रं भेदयन्ती गतिकृतमधुरध्वानमावेदयन्ती।
प्राप्येशं मोदयन्ती दशशतकमले व्याप्य विश्वं स्थिता या
विश्वानन्दप्रवाहान् वितरतु भवतां कौलिकी कुण्डली सा[१]।।

वैदिकी तान्त्रिकी चेति द्वेधा विस्फुरन्ती चिन्मयी [२]श्रुतिरनादिपरमेश्वरात् प्रभवन्ती कस्य वा सुकृतिनो न नमस्या सदा सर्वार्थविधानकर्त्री सुशिवा कल्याणी माता। सामान्यरूपेण निगमशब्दो[३] वेदवस्तुनि प्रयुज्यते, आगमशब्दस्तु[४] तन्त्रवस्तुनि। निगमस्येव आगमस्यापि साहित्यं प्राधान्येन परमपुरुषार्थप्रतिपादनाय[५] प्रवृत्तं परिलक्ष्यते। अनाद्यज्ञानमूलाद् बन्धाद् जीवस्य मुक्तिस्तु ज्ञानादेवेति निगमागमानां पार्यन्तिकः सिद्धान्तो नाविदिततमः प्रेक्षकाणाम्।

वेदशब्दव्युत्पत्तिः

वेत्ति = जानात्यनेन धर्मार्थकाममोक्षोपायानिति वेद इत्येवं ज्ञानार्थकाद् विद्धातोः अदादिपठिताद् लुग्विकरणात् करणव्युत्पत्तिर्वेदशब्दः।

वेदनम् = सत्ता = अस्तित्वम्, वेद इत्येवं सत्तार्थकाद् विद्धातोर्दिवादिपठिताद् श्यन्-विकरणाद् भावव्युत्पत्तिर्वेदशब्दः।

विन्दति = लभते अनेन धर्मादिचतुर्वर्गानिति वेद इत्येवं लाभार्थकाद् विद्धातोस्तुदादिपठितात् करणव्युत्पत्तिर्वेदशब्दः।

विन्ते = विचारयत्यनेन जगतः सृष्ट्यादिप्रक्रियां जीवब्रह्मणोरैक्यावबोधप्रयोजनिकामिति वेद इत्येवं विचारणार्थकाद् विद्धातोः रुधादिपठितात् करणव्युत्पत्तिर्वेदशब्दः।

---

१. सारस्वती सुषमा, वर्षे-२०, अङ्कः १, पृ.सं. ५।

२. संस्कृत वाङ्मय का बृहद् इतिहास—कुलार्णवतन्त्रम्, २.१४०; ख. हारीतस्मृतिः-श्रुतिर्द्विविधा—वैदिकी तान्त्रिकी च। उद्धृतम्-मनुस्मृतिः, २.९।

३. द्रष्टव्यम्, श्रीमद्भागवतमहापुराणम्, १.१.३। 'निगमकल्पतरोर्गलितं फलम्'।

४. संस्कृत साहित्य का बृहद् इतिहास, तन्त्रागम खण्ड, उद्धृत पृ.सं. २, पुरोवाक्—क. आगच्छन्ति बुद्धिमारोहन्ति यस्माद् अभ्युदयनिःश्रेयसोपायाः स आगमः। तत्त्ववैशारदी आचार्यवाचस्पतिमिश्रः। ख. तन्त्रालोकः ३५/१-२।

५. वेदान्तपरिभाषा, पृ.सं. १। 'धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः'।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सत्ता-ज्ञान-लाभ-विचारार्थकेभ्यो विद्धातुभ्यो निष्पन्नस्य वेदशब्दराशेरपि वेदपरमतात्पर्यभूतस्य ब्रह्मण इव सच्चिदानन्दमयता वरीवर्ति। अत एव 'ओमिति एतदक्षरम्'[१], ओमिति ब्रह्म[२], तद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्[३], इत्याद्याः श्रुतयः, 'गिरामस्म्येकमक्षरम्'[४] इत्याद्याः स्मृतयश्च स्वरसतः सङ्गच्छन्ते।

सर्वेषां स तु नामानि कर्माणि च पृथक्-पृथक्।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे।।[५]

इति मनूक्तेश्च वेदयते = आख्याति अनेन नामकर्मादिकमिति वेद इत्येवमाख्यानार्थकाद् विद्धातोरपि चुरादिपठितात् करणव्युत्पत्तिर्वेदशब्दो निष्पद्यते।

अपौरुषेयो वेदः

'वेदः शिवः शिवो वेदः[६], वेदो नारायणः साक्षात्'[७] इत्यादिवचनान्यपि वेदब्रह्मणोर्नित्यशब्दार्थयोस्तादात्म्यं प्रतिपादयन्ति।

'ईश्वराः स्वयमुद्भूताः.......तस्मान्महर्षयः' इति[८] वायुपुराणवचनात् साक्षात्कृतधर्मभिर्महर्षिभिः कल्पादौ पूर्वकल्पत एव विद्यमानस्य वेदस्य साक्षात्कारो विहित इति निश्चीयते। भृगुवसिष्ठादीनां काले वेदशब्दराशौ शाखा-प्रशाखाभेदो नोदेति स्म। तैरवरकालिकेभ्योऽसाक्षात्कृतधर्मभ्यो मुनिभ्यो मन्त्रोपदेशः कृतः। अथ गच्छता कालेन ह्रसितमेधेभ्यः शिष्येभ्यस्तदुपदेष्टुं शाखाप्रभेदो विहितस्तेन वेदव्यास इति संज्ञा समजायत। यथाह तत्रभवान् यास्कः—'साक्षात्कृतधर्माण ऋषयो बभूवुः।......इमं ग्रन्थं समाम्नासिषुः, वेदं च वेदाङ्गानि च'[९] इति।

भगवान् व्यासोऽप्याह—

पराशरात् सत्यवत्यामंशांशकलया विभुः।
अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम्[१०]।।

---

१. छान्दोग्योपनिषद्, १.१.१;
२. तैत्तिरीयोपनिषद्, ८.१३७।
३. काठकोपनिषद्, १.२.१६;
४. श्रीमद्भगवद्गीता, १०.२५।
५. मनुस्मृतिः, १.२१;
६. स्कन्दमहापुराणम्, काशीखण्डः।
७. विष्णुपुराणम्, पृ. १८१;
८. वायुपुराणम्, ५९.८२.८.३।
९. निरुक्तम्, १.६.२०;
१०. द्रष्ट. श्रीमद्भागवतमहापुराणम्-१.४.१४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

त एव ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा।
शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन्[१]।।

करुणामूलौ निगमागमौ

अथ परमकारुणिको भगवान् शिवः पञ्चकृत्यपरायणो[२] विजयते चिदानन्दैषणाज्ञानक्रियाशक्तिसुनिर्भरः।[३] अखिललोककल्याणकृदसौ देवाधिदेवः पञ्चभिर्मुखैर्निगमागमानुपादिदेश। तत्रास्य सद्योजातमुखाद् ऋग्वेदः, वामदेवमुखाद् यजुर्वेदः, अघोरमुखात् सामवेदः, तत्पुरुषमुखाद् अथर्ववेदः, ईशानमुखाद् आगमः[४] प्राकट्यमुपजगाम। सर्वैरिभिर्वेदैरागमैश्च भगवन्महिमैव निभृतं स्तूयते।

दर्शनानां त्रेधा विभागः

वेदप्रामाण्येन प्रवृत्तानां दर्शनानां नामधेयम्—वैदिकं दर्शनमिति। आगमप्रामाण्येन प्रवृत्तानां दर्शनानां नामधेयम्—आगमिकं दर्शनमिति। तर्कयुक्त्युपपत्तिमुखेन प्रवृत्तानामुभयविलक्षणानां दर्शनानां नामधेयं तु अवैदिकं (अश्रौतं) दर्शनमिति।

तत्र वैदिकं दर्शनं षोढा भिद्यते—सांख्यम्,[५] योगः,[६] न्यायः,[७] वैशेषिकम्,[८] पूर्वमीमांसा[९], वेदान्तः[१०] (उत्तरमीमांसा) चेति। अवैदिकं दर्शनं

---

१. द्रष्ट. श्रीमद्भागवतमहापुराणम्, १.४.१९।

२. अतः सृष्टिः स्थितिर्ध्वंसस्तिरोभावोऽप्यनुग्रहः। इति पञ्चसु कर्तृत्वमावहञ्छिव उच्यते।।
(पूर्णता-प्रत्यभिज्ञा, १.४९)

३. स्वातन्त्र्यशक्तिः प्रथमा तदीया ह्यानन्दरूपेण विभासमाना।
इच्छा द्वितीयास्ति चमत्कृतिर्या चिच्छक्तिरेतस्य प्रकाशतैव।।
आमर्शरूपापि च ज्ञानशक्तिः क्रियापि सर्वाकृतिरूपतैव।
स्थिता प्रभोः सूक्ष्मतया परायामन्यत्र चाप्यक्रमशः स्फुरन्ती।।
इत्येवं शक्तिभिर्युक्तः पञ्चभिः परमेश्वरः।
इच्छाज्ञानक्रियाशक्त्यैवास्ति युक्तः स वस्तुतः।। (पूर्णता-प्रत्यभिज्ञा, १.५२-५४)

४. परस्पराविरुद्धार्थाः शिवोक्ता निगमागमाः।
अल्पबुद्धिभिरन्योन्यं विरोधः परिकल्प्यते।। (सूक्ष्मागमः, शुभाशीर्वचनं, पृ. १)

५. सर्वदर्शनसङ्ग्रहः, पृ. ६१७-६४८; ६. स.द.सं., पृ. ६४८-७३९।

७. स.द.सं., पृ. ४४९-५१२; ८. स.द.सं., पृ. ३९१-४४८।

९. स.द.सं., पृ. ५१३-५७१।

१०.(क) वेदान्तसारः, पृ.सं. १; 'वेदान्तो नाम उपनिषत् प्रमाणम्'।

(ख) सर्वदर्शनसंग्रहः, पृ. ७४०-८९१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

त्रेधा—चार्वाकदर्शनम्,[१] जैनदर्शनम्,[२] बौद्धदर्शनञ्चेति।[३] बौद्धदर्शनस्य विनेयभेदाच्चत्वारः प्रभेदा भवन्ति—सौत्रान्तिकदर्शनम्, वैभाषिकदर्शनम्, माध्यमिकदर्शनम्, योगाचारदर्शनं चेति।[४]

आगमप्रभेदः

आगमिकं दर्शनं तु अतिविशालं विद्यते। तत्प्रभेदो यथा—

१. वैष्णवागमदर्शनम्—क. वैखानसागमः, ख. पाञ्चरात्रागमः।

२. शाक्तागमदर्शनम्

३. शैवागमदर्शनम्—पाशुपत-कालामुख-कापालिक-शैवसिद्धान्त-वीरशैव-कौल-क्रम-प्रत्यभिज्ञा-दर्शनानि।

४. स्मार्ततन्त्रम्

५. बौद्धतन्त्रम्

६. जैनतन्त्रम्

७ पौराणिकतन्त्रम्

८. सौरतन्त्रम्

९. गाणपत्यतन्त्रम्

१० स्कान्दतन्त्रञ्चेति।

निषेधशेषो ब्रह्मवादः, विश्वरूप ईश्वराद्वयवादः

तत्र वैदिकदर्शनानामङ्गाङ्गिभावं समर्थयन्ति विद्वांसो मनीषिणः। एवञ्च यानि सांख्यादीनि पञ्चदर्शनानि, यानि च विभिन्नानि वेदान्तदर्शनप्रस्थानानि, तेषां समेषां शाङ्करे अद्वैते अङ्गरूपता आस्थीयते। तद्वद् अवैदिकानां समेषां दर्शनप्रस्थानानां विज्ञानाद्वैतवादे शून्याद्वैतवादे वा अङ्गरूपता आस्थीयते। तद्वदेव समेषामागमिकदर्शनप्रस्थानानां प्रत्यभिज्ञादर्शनस्य यः किल ईश्वराद्वैतवादः (परमाद्वैतवादः), तत्रैव अङ्गिरूपता नितरामास्थीयते सदसद्विवेचकैर्धीधनैः।

सम्प्रति आस्तिकदर्शनेषु शिरोरत्नायमानमद्वैतवादम्, आगमिकदर्शनेषु शिखामणिरूपमीश्वराद्वैतवादं चाधिकृत्य किमपि तुलनात्मकमध्ययनं विधीयते।

१. स.द.सं., पृ. ३-२५; २. स.द.सं., पृ. १०४-१७९।
३. स.द.सं., पृ. २६-१०३।
४. चतुर्णां प्रस्थानानां सिद्धान्तश्चकास्ति, क्रमशो बाह्यार्थानुमेयवादः, बाह्यार्थप्रत्यक्षवादः, शून्यवादः, विज्ञानवादः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वेदान्तप्रस्थानानि

वेदान्तदर्शने विभिन्नैराचार्यैर्विभिन्नान् वादान् सिद्धान्तयद्भिर्भिन्नानि भाष्याणि ग्रथितानि राजन्ते।[१] तद्यथा—

१.	जगद्गुरुशङ्कराचार्यः	शारीरकभाष्यम्	अद्वैतवादः
२.	भास्कराचार्यः	भास्करभाष्यम्	औपाधिकभेदाभेदवादः
३.	रामानुजाचार्यः	श्रीभाष्यम्	विशिष्टाद्वैतवादः
४.	मध्वाचार्यः	पूर्णप्रज्ञभाष्यम्	द्वैतवादः
५.	निम्बार्काचार्यः	वेदान्तपारिजातभाष्यम्	द्वैताद्वैतवादः
६.	श्रीकण्ठाचार्यः	शैवभाष्यम्	शैवविशिष्टाद्वैतवादः
७.	श्रीपत्याचार्यः	श्रीकरभाष्यम्	वीरशैवविशिष्टाद्वैतवादः
८.	श्रीवल्लभाचार्यः	अणुभाष्यम्	शुद्धाद्वैतवादः
९.	श्रीविज्ञानभिक्षुः	विज्ञानामृतभाष्यम्	अविभागाद्वैतवादः
१०.	श्रीबलदेवविद्याभूषणः	गोविन्दभाष्यम्	अचिन्त्यभेदाभेदवादः

परमद्वैतवादसिद्धान्तस्यैव पार्यन्तिकी अङ्गिरूपता मनीषिभिरास्थीयते। अस्मिन् वादे दृश्यभूतस्य जगतोऽज्ञानोपादानकत्वमङ्गीक्रियते।[२] अज्ञानम्, माया, अविद्येत्यादिकं पर्यायतया आस्थीयते। अशेषविशेषप्रत्यनीकं चिन्मात्रं ब्रह्मैवात्र परमार्थः।

ब्रह्मणः स्वरूपलक्षणं तटस्थलक्षणञ्च

स्वप्रकाशं नित्यशुद्धबुद्धमुक्तस्वभावं स्वतः सिद्धं सकृद्विभातञ्च[३] तत्। तदेतद् ब्रह्म सर्वेषामस्माकमात्मा विद्यते। एतस्य स्वरूपलक्षणमुक्तम्—'सत्यं ज्ञानमनन्तं ब्रह्म' इति।[४] तटस्थलक्षणं तु 'यतो वा इमानि भूतानि जायन्ते,

---

१. प्रबन्धकुसुमाञ्जलिः, पृ.सं. ५६।

२. द्रष्टव्यम्, अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्। तदुक्तम्—
'सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः। अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदाहृतः'॥ इति।
(वेदान्तसारः, पृ.सं. २०६)

३. मुण्डकोपनिषद्, १.१.६; ४. तैत्तिरीयोपनिषद्, २.१.१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति' इति।[१] तदेतत् सूत्रितं 'जन्माद्यस्य यतः' इति[२]। निरुपाधिकं ब्रह्म निराश्रयं निर्विषयं सन्मात्रस्वरूपञ्च भवति। स्वप्रकाशस्यास्य स्वरूपप्रथने अन्यानपेक्षता भवति। सत्यस्यास्य ब्रह्मणस्त्रिकालाबाध्यता च भवति। यश्च भोक्ता यद् वा भोक्तव्यं तत् सर्वं भेदप्रपञ्चात्मकं ब्रह्मणि आश्रितया अविद्यया[३] परिकल्पितं भवति। सैषा अविद्या अनादिः सत्त्वासत्त्वाभ्यामनिर्वचनीया अभावभिन्ना यत्किञ्चिद् भावरूपा भवति।[४] यदुक्तम्—

अनादिषट्कम्

जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा।
अविद्या तच्चितोर्योगः षडस्माकमनादयः।।[५]

न हि अव्यक्तामिमामनाद्यविद्यां विना त्रिगुणात्मकस्य जगत उत्पत्तिः सम्भवति। यदुक्तम्—

अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका या।
कार्यानुमेया सुधियैव माया यया जगत् सर्वमिदं प्रसूयते।।[६]

बन्ध-मोक्षौ

एतस्य सकार्यस्य अज्ञानस्यैव जीवान् प्रति बन्धरूपता दर्शनेषु व्याख्यायते। ततो मुक्तिस्तु आत्मसाक्षात्कारात्मकं ब्रह्मज्ञानं विना न सम्भवति। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'[७], 'आत्मनो वा अरे दर्शनेन श्रुत्या मत्या विज्ञानेनेदं सर्वं विज्ञातं भवति'[८] तथा 'तमेव विदित्वातिमृत्युमेति'[९], 'आत्मान्वेष्टव्यः'[१०], 'न स पुनरावर्तते'[११] इत्यादिश्रुतावात्मज्ञानस्य मुक्तिहेतुत्वश्रवणात्।

---

१. तै.उ., ३.१; २. ब्रह्मसूत्रम्, १.१.२।
३. 'आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः'।। (सङ्क्षेपशारीरकम्, १.३१९)
४. वेदान्तसारः, अज्ञानन्तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधिभावरूपं किञ्चिदिति, पृ. ८६।
५. अद्वैतसिद्धिः बालबोधिनीसहिता, प्रथमपरिच्छेदः, भाग-२, पृ. १०३०।
६. विवेक-चूड़ामणिः, श्लोक-सं. ११०; ७. बृहदारण्यकोपनिषद्, २.४.५।
८. बृहदा.उप. २.४.५; ९. श्वेताश्वतरोपनिषद्, ६.१५, ३.८।
१०. छा.उप., उद्धृतम्—ब्रह्मसूत्र-शाङ्करभाष्यम्, पृ.सं. १८३।
११. उद्धृतम्, वेदान्तपरिभाषा, पृ.सं. १।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अस्याश्च अविद्याया अनिर्वचनीयता आस्थीयते। अनिर्वचनीयत्वं नाम सत्त्वप्रकारकप्रतीत्यविषयत्वे सति असत्त्वप्रकारकप्रतीत्यविषयत्वे सति सदसत्त्वप्रकारकप्रतीत्यविषयत्वस्वरूपम्। यदुक्तं वार्त्तिककृता—

अविद्याया अविद्यात्वमिदमेव तु लक्षणम्।
यत् प्रमाणासहिष्णुत्वमन्यथा वस्तु सा भवेत्।।[१]

चित्सुखमुनिनाप्युक्तम्—

प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं नयत्।
गाहते तदनिर्वाच्यमाहुर्वेदान्तवेदिनः।।[२]

तदेवमधिष्ठानभूते ब्रह्मणि तद्विषयिण्या अविद्यया अध्यस्तं जगत् मिथ्याभूतमाभाति। ब्रह्मज्ञानेन अधिष्ठानसाक्षात्कारे सति अविद्यासहितस्य जगतो निवृत्तिर्बाधो वा भवति। अत आरोप्याधिष्ठानयोर्न कश्चन सम्बन्धो भवितुमर्हति। यदुक्तं वार्त्तिककृता—

'निःसङ्गस्य ससङ्गेन कूटस्थस्य विकारिणा।
आत्मनोऽनात्मना योगो वास्तवो नोपपद्यते[३]।।' इति।

सर्वबाधावधिभूतं ब्रह्म अध्यस्तस्य जगत आंशिकेनापि दोषेण गुणेन वा न युज्यते। यदुक्तं भाष्यकृता—'तत्रैवं सति यत्र यदध्यस्तं तत्कृतेन दोषेण गुणेन वाणुमात्रेणापि न सम्बध्यते' इति।[४]

सङ्क्षेपशारीरककृताप्युक्तम्—'मृगवारिपूरपरिवारवती न नदी तथोषरभुवं स्पृशती'ति।[५]

यद्यपि ब्रह्म एकमस्ति, तथापि मायाद्युपाधिवशाज्जीवेश्वरभावं स्वीकरोति। यदुक्तम्—

'एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्'[६]।।

---

१. बृहदा.भा.वा. १८१; २. चित्सुखी, १.१३।

३. भाष्यवार्त्तिकम्, उद्धृतम्-अद्वैतरत्नरक्षणम्, पृ.सं. ४५।

४. भाष्यवार्त्तिकम्, उद्धृतम्-अद्वैत., पृ.सं. ४५।

५. सङ्क्षेपशारीरकम्, उद्धृतम्—अद्वैत., पृ.सं. ४५।

६. संक्षेपशारीरकम्, १२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पञ्चदशीकृतापि—

मायाख्यायाः कामधेनोर्वत्सौ जीवेश्वरावुभौ।
यथेच्छं पिबतां द्वैतं तत्त्वं त्वद्वैतमेव हि॥[१]

जीवनानात्वं प्रतिकर्मव्यवस्था च

प्रस्थानभेदेन अविद्योपाधिकस्य अन्तःकरणोपाधिकस्य वा चैतन्यस्य जीवरूपता आस्थीयते। यदुक्तम्—

'जीवो हि नाम चेतनः शरीराध्यक्षः प्राणानां धारयिता'।[२]

'अस्ति आत्मा जीवाख्यः शरीरेन्द्रियपञ्जराध्यक्षः कर्मफलसम्बन्धी'।[३]

'मन उपाधिकश्च जीवः'।[४]

अन्तःकरणनानात्वात् तदुपाधिकजीवनानात्वमिव अविद्यैक्यात् तदुपाधिकजीवैकत्वञ्च सङ्गच्छते। एतेन प्रतिकर्मव्यवस्थाऽप्युपपद्यते। शुद्धसत्त्वप्रधाना माया इत्युच्यते मलिनसत्त्वप्रधाना अविद्येति। उभयत्र व्यामोहजनकत्वं समानं भवति। इह जीवब्रह्मणोरभेद इष्यते। यतो हि उपक्रमोपसंहारादिषड्विधतात्पर्यग्राहकैर्लिङ्गैः श्रुतेरद्वैते ब्रह्मणि तात्पर्यमवसीयते। यदुक्तम्—

'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये'[५]॥ इति।

आभासावच्छेदप्रतिबिम्बसिद्धान्ताः

मायामाश्रित्य पुष्यमाणस्याद्वैतस्योपपत्तये विवरणकृतः प्रतिबिम्बसिद्धान्तमातिष्ठन्ते, वार्त्तिककृत आभाससिद्धान्तम्, भामतीकृतस्तु अवच्छेदसिद्धान्तम्।

'तमेव विदित्वा अतिमृत्युमेति, नान्यः पन्था विद्यते अयनाय'[६] इत्यादिश्रुत्या ब्रह्मात्मसाक्षात्कारेण बन्धो विलीनतां याति मुक्तिश्चावाप्यते। परमेषा अद्वैतवासना ईशानुग्रहं विना दुर्लभा भवति। यदुक्तम्—

---

१. पञ्चदशी, ६.२३६;
२. ब्रह्मसूत्रशाङ्करभाष्यम्, १.१.६।
३. ब्र.सू.शा. भाष्यम्, १.१.७;
४. ब्र.सू.शां. भाष्यम्, ३.१.१४।
५. अद्वैतरत्नरक्षणम्, पृ.सं. ४८;
६. श्वेताश्वतरोपनिषद्, ६.१५, ३१८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'ईश्वरानुग्रहादेषा पुंसामद्वैतवासना।
महाभयकृतत्राणा द्वित्राणां यदि जायते'[१]।।

जगतोऽभिन्ननिमित्तोपादानं ब्रह्म

सोऽयं मिथ्याभूतः प्रपञ्चोऽविद्यायाः परिणामो भवति ब्रह्मणस्तु विवर्तः। अत एव एतन्नये अभिन्ननिमित्तोपादानकत्वं ब्रह्मणः स्वीक्रियते। तदुक्तम्—'कारणसलक्षणोऽन्यथाभावः परिणामः, तद्विलक्षणो विवर्तः'।

'विवर्तस्तु प्रपञ्चोऽयं ब्रह्मणोऽपरिणामिनः।
अनादिवासनोद्भूतो न सारूप्यमपेक्षते'[२]।।

ज्ञानं ब्रह्मरूपमेव न तु तद्धर्मः। श्रुतिषु ज्ञानसुखाभिन्नत्वस्य ब्रह्मणि प्रतिपादनात्। यथोक्तम्—'विज्ञानमानन्दं ब्रह्म'[३], 'को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्'[४], 'अत्रायं पुरुषः स्वयं ज्योतिर्भवति'[५], 'विज्ञानघन एव'[६], 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते'[७], 'सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायाम्'[८], 'भारूपः सत्यसङ्कल्पः'[९] इत्यादि।

श्रुतिभिन्नानां तु व्यावहारिकं प्रामाण्यम्

अत्र यद्यपि प्रत्यक्षादीनि षट् प्रमाणानि स्वीक्रियन्ते, तथापि श्रुतिभिन्नानां प्रत्यक्षादिप्रमाणानां द्वैतग्राहित्वाद् व्यावहारिकं प्रामाण्यमिष्यते। ततश्च विरोधपरिहारः सुकरः। अयमाशयः—घटः सन्, पटः सन्नित्येवं प्रत्यक्षेण द्वैतसत्यत्वं प्रमीयते। 'नेह नानास्ति किञ्चन'[१०] इत्यादिश्रुत्या तु द्वैतप्रपञ्चस्य अद्वैतब्रह्मणोऽतिरिक्ततया सत्यत्वं प्रतिषिध्यते। तदनयोः श्रुति-तदितरप्रमाणयोर्विरोधपरिहाराय अद्वैतश्रुत्यनुगुणं व्यावहारिकप्रामाण्यमेव प्रत्यक्षादीनां स्वीक्रियते।

मोक्षस्वरूपम्

एतन्मते मोक्षो नाम अविद्यानिवृत्त्युपलक्षित आनन्द इत्यभ्युपगम्यते। अविद्याया निवृत्तिरात्मतत्त्वज्ञानेन भवति।[११] सत्यामविद्यानिवृत्तौ तु

---

१. खण्डनखण्डखाद्यम्; १.२५; २. सि.ले. सङ्ग्रहः, पृ. ३१।
३. बृहदारण्यकोपनिषद्, ३.९.२८; ४. तैत्तिरीयोपनिषद्, २.७।
५. बृहदारण्यकोपनिषद्, ४.३.९; ६. बृहदारण्यकोपनिषद्, २.४.१२।
७. तै.उ. ३.६; ८. तै.उ. २.१.१।
९. छान्दोग्योपनिषद्, ३.१४.२; १०. बृहदारण्यकोपनिषद्, ४.४.१९।
११. शाङ्करभाष्यम्, भामती, पृ.२१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आत्मस्वरूपभूत आनन्दः स्वयमेव प्रकाशते। आनन्दस्य आत्मरूपत्वे प्रमाणं तु श्रुतिरेव—'विज्ञानमानन्दं ब्रह्म'[1] इति। सिद्धान्ते अभावानामधिकरणात्मकत्वं स्वीक्रियते। अत एव अविद्यानिवृत्तिरपि आत्मस्वरूपानतिरिक्तैव भवतीति अविद्यानिवृत्तिमादाय द्वैतापत्तिर्नापद्यते।

जीवन्मुक्तिः

'न तस्य प्राणा उत्क्रामन्ति'[2], 'विमुक्तश्च विमुच्यते'[3], 'अत्र ब्रह्म समश्नुते'[4] इति च श्रुत्या प्राप्तब्रह्मसाक्षात्कारस्य अशरीरभावसहकृता जीवन्मुक्तिः प्रतिपादिता भवति।

जीवब्रह्मणोरभेदः

अद्वैतवादे जीवो ब्रह्मणेऽनन्यः सर्वव्यापी विभुरास्थीयते। यतो हि श्रुतिषु अविकृतस्यैव परमात्मनः शरीरे प्रवेश आम्नायते, अथ च मुक्तस्य ब्रह्माभेदः प्रतिपाद्यते। तद्यथा—'तत्सृष्ट्वा तदेवानुप्राविशत्'[5], 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते' इति।[6] 'ब्रह्म वेद ब्रह्मैव भवतीति' च।[7]

ननु जीवस्य विभुत्वाङ्गीकारे तस्य उत्क्रान्तिगत्यागत्यः कथमुपपद्येरन्—इति जिज्ञासायाः समाधानं भगवता ब्रह्मसूत्रकृता 'उत्क्रान्तिगत्यागतीनाम्'[8] इति सूत्रे विहितम्। प्रपञ्चितं चैतद् भगवता भाष्यकृता, भामतीकृत्प्रभृतिभिश्चेति।

सोऽयमद्वैतवादो जगत्प्रपञ्चं न्यक्कृत्य वेदान्तसिद्धान्ते प्रतिष्ठाप्यते।

आगमिकः स्वातन्त्र्यमूलोऽद्वैतवादः

अथ ईश्वराद्वैतवादः सर्वाभ्युपगममुखेन व्यवहारोपपत्तिमङ्गीकुर्वतां भोगश्च मोक्षश्च करस्थ एवेति आगमिनां स्वातन्त्र्यसिद्धान्तः पुरस्क्रियते। तद्यथा—पराख्यसूत्रे सुस्पष्टमुच्यते शिवात्प्रवृत्तस्य ज्ञानस्य आत्मभेषजरूपता—

ज्ञानमेतत् शिवक्ष्मोत्थं संगृहाणात्मभेषजम्।
परिणामसुखं स्वादु विशेषगुणदर्शकम्[9]।। इति।

---

१. बृहदारण्यकोपनिषद्, ३.९.२८;
२. बृ.उ., ४.४.६।
३. काठकोपनिषद्, २.२.१;
४. कठोपनिषद्, २.६.१४।
५. तैत्तिरीयोपनिषद्, २.६;
६. तैत्तिरीय आरण्यक, ३.१२.७।
७. मुण्डकोपनिषद्, ३.२.९;
८. ब्र.सू. २.१.१९।
९. द्रष्ट., स्वच्छन्दतन्त्रम्, ११.१४६-१४७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अयमेवार्थ: शिवधर्मोत्तरेऽपि समर्थ्यते—

व्याधीनां भेषजं यद्वत् प्रतिपक्ष: स्वभावत:।
तद्वत्संसारदोषाणां प्रतिपक्ष: शिव: स्मृत:[१]।। इति।

शिवात्प्रवृत्तस्य आगमज्ञानस्य अमृतरूपता सुखप्रदता च समर्थिता ज्ञानधर्मोत्तरे—

शिवज्ञानामृतं पीत्वा विचरस्व यथासुखम्[२]।। इति।

पदार्थत्रयम्

आगमिकसिद्धान्तसमर्थने त्रयाणां पदार्थानामवधारणा विधीयते। पति: पशु: पाश इति च। यत्र च स्रोतोभूतं मृगेन्द्रागमवचनमास्ते।[३]

तत्र पति: शिव:, स चैकोऽनादिरनन्तश्च बन्धुमुक्तिव्यवस्थामुत्तीर्ण:। अणुसंज्ञिता: प्राणिन: पशुपदेनोच्यन्ते। येन पाशित: पशुर्भवति स पाश: पञ्चविध:—मल:, तिरोधानशक्ति:, महामाया, माया, कर्म चेति।

पति: शिव:

शैवागमे पतिपदार्थो भगवान् शिव:। एष एव मायादेश्चेतनस्यापि प्रवर्तक आस्ते। समग्रां सृष्टिमसावेव तनुते। यदुक्तम्—

अचेतनस्य मायादे: प्रवर्तकतया पति:।
सिद्ध: सर्वार्थकृत् कर्त्ता व्यापक: सततोदित:।। इति।

'सृष्टिरूपकार्यस्य कर्तृत्वं पत्युरेव, न तु पशोर्नापि पाशस्य'[४] इति।

असौ पति: सर्वज्ञ:, अनादि:, मलवर्जित:, शिवसंज्ञश्च राजते। ज्ञानशक्त्यासौ सर्वं विजानाति, अथ च क्रियाशक्त्यासौ जगद् रचयति।

जगत्कर्त्तुर्देहराहित्यम्

यद्यपि जगत: कर्त्ता शिव: शरीरं धृत्वा प्रपञ्चं निर्मातीति प्रतिभाति, अथापि तस्य भौतिकशरीरसम्बन्धो नोचित:। ततश्च बैन्दवं तदीयं शरीरमभ्युपगन्तव्यमिति चेत्, अत्रोच्यते—शिवशरीरं बिन्दूपादानकं चेदभ्युपगम्यते तर्हि बिन्दौ क्षोभं विना तस्योपादानता नोपपत्तिमञ्चति। अथ क्षोभ: स्वत इष्यते

---

१. शिवधर्मोत्तरम्, द्र. पूर्णता प्रत्यभिज्ञा, का. १.१५८।
२. ज्ञानधर्मोत्तरम्, द्र. नेत्रतन्त्रम्, १६.८१-८२।
३. विश्वसारोत्तरसूत्रम्, द्रष्ट. श्रीतन्त्रालोक:, १.१०४।
४. वायवीयसंहिता, सू. २०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शिवतो वा? स्वतः क्षोभस्वीकारे आत्माश्रयो नाम दोषः। शिवतः क्षोभस्वीकारे तु क्षोभक्रियां प्रति शिवशरीरमभ्युपेयम्। तदर्थसाधको बिन्दुरुपादानभूतः स्वीकार्यः। तत्रापि उपादाने क्षोभक्रियार्थं पुनः शरीरान्तरकल्पना आवश्यकीति एवं क्रमेण अनवस्था दुरवस्था भवेत्।

यद्युच्यते सृष्ट्यर्थं स्वीकृते शरीरे अचलमूर्तिकृतः क्षोभ इष्यते, न शरीरान्तरमपेक्ष्यत इति, तर्हि अन्ते रण्डाविवाहश्चेदादावेव कुतो न ही ति न्यायेन जगतः सृष्ट्यर्थं शरीरावधारणमपि वृथैव, अचलमूर्त्तेरेव परमेश्वरस्य सृष्टिक्रियास्वपि शरीरं विनैव कारणत्वोपपत्तेरिति।

अतश्च यथा स्वशरीरस्पन्दादौ आत्मनः कर्तृत्वं भवति स्वातन्त्र्येण तथा सृष्ट्यादिक्रियास्वपि शरीरं विनैव कारणत्रितयराहित्येन प्रभोः शिवस्य कर्तृत्वं नोपपत्तिमञ्चति। एतत्सिद्धान्तसमर्थनाय उक्तमपि—'अदेहस्यापि कर्तृत्वं स्वदेहप्रेरणे यथा'[१] इति।

जगत्कर्त्तुः करणराहित्यम्

यथा च शरीरं विनैव प्रभोः जगत्कर्तृत्वं न विरुध्यते, तथैव इन्द्रियाणां शरीराधिष्ठानकतया इन्द्रियाभावोऽपि ईश्वरस्य, पश्यत्यचक्षुरित्यादिश्रुतेः। करणस्य सकर्तृकत्वमवश्यमभ्युपेतव्यम्, न तु कर्तुः सकरणकत्वमवश्यमभ्युपेयम्। अत एव अयस्कान्तमणिः कर्तृभूतो लोहाकर्षणक्रियायामक्षरहितोऽपि न प्रभवति। एवञ्च नेदमनुमानं पत्युः जगत्कर्तृत्वे करणसापेक्षतामनिवार्यां साधयितुं पर्याप्तम्—'पतिकर्तृका जगदुत्पत्त्यादिक्रिया यत्किञ्चित्करणावश्यसापेक्षा क्रियात्वात् छिदादिक्रियावदिति। यथा च कालस्य न शरीरं न वा किञ्चिदिन्द्रियमथापि तस्यामूर्तस्य जन्यमात्रं प्रति कर्तृत्वं सर्वशास्त्राविरुद्धमिष्यते' तथैवामूर्तस्यापि जगत्कर्तुः शिवस्य शरीरेन्द्रियादिकं विनैव केवलमिच्छाशक्त्या करणभूतया जगदुत्पत्त्यादिक्रियासम्पादकत्वमिष्यताम्। यदुक्तम्—

> यथा कालो ह्यमूर्तोऽपि दृश्यते फलसाधकः।
> एवं शिवो ह्यमूर्तोऽपि कुरुते कार्यमिच्छया॥[२]

विश्वसिद्धौ स्वतन्त्रस्य शिवस्यैव हेतुता विद्यते। यदुक्तम्—'चितिः स्वतन्त्रा विश्वसिद्धिहेतुः'[३] इति, 'नर्तक आत्मा' इति च।[४]

१. द्रष्ट., ई.प्र.वि.विमर्शिनी, खं. १, पृ. २०९।
२. किरणसूत्रम्; ३. प्रत्यभिज्ञाहृदयम्, सूत्रम्-१; ४. द्रष्ट.पू.प्र.का. २.४४२-४४३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वप्ने यथैकदेहस्थोऽनेकदेहं प्रपश्यति।
पुत्रान् यथा पितानेकान् तथा पश्यञ् शिवः स्थितः[१]।। इति च।

शैवागमे स्वातन्त्र्यमूलिका प्रतिबिम्बवादावधारणा

सांख्यदर्शने प्रकृतेः परिणामभूतं जगत्, सैव च कर्त्री इति परिणामवादस्य अवधारणा विद्यते। इयमेव अवधारणा सिद्धान्तशैवमते आद्रियते। अत एव श्रीकण्ठाचार्येण विवर्तवादस्य खण्डनं युक्त्या विधाय परिणामवादस्य मण्डनं विहितम्। **समसत्ताककार्यापत्तिर्विकार** इति परिणामलक्षणं जागर्ति, अथ **विषमसत्ताककार्यापत्तिर्विवर्त** इति विवर्तलक्षणं चकास्ति। संवित्प्रकाशकृता भगवति शिवे जगत उपादानकारणता विवर्तकारणता चाभ्युपगम्यते। उभयी येयं कारणता तस्या उपपत्तये भगवतः शिवस्य देहपरिग्रहोऽपि तेन समर्थ्यते। यदुक्तम्—

विवर्तेऽप्यतथारूपस्तथा भासि त्वमच्युत।
परिणामे स एव त्वं सुवर्णमिव कुण्डले[२]।। इति।

तत्रभवान् अभिनवगुप्तपादस्तु ईश्वरप्रत्यभिज्ञाविमर्शिन्यां विवर्तवादस्य परिणामवादस्य चावधारणां प्रत्याख्याति, स्वीकुरुते च स्वातन्त्र्याधारितां प्रतिबिम्बवादस्यावधारणाम्।

पञ्चमन्त्रतनुः शिवः

ईशः, तत्पुरुषः, अघोरः, वामः, अजश्चेति पञ्चभिर्मन्त्रैः[३क] पञ्चमन्त्रतनुः शिवः पञ्चकृत्यपरायणो जगतः स्वामी जयति। सृष्टिः, स्थितिः, ध्वंसः, तिरोभावः, अनुग्रहश्चेति शिवस्य पञ्चकृत्यानि भवन्ति। एभिः शिवो जगतः सृष्टिं स्थितिं ध्वंसं च लीलया सम्पादयन् स्वरूपतिरोधानरूपं निग्रहं स्वरूपप्रथनरूपं प्रत्यभिज्ञानसंज्ञकमनुग्रहमपि विदधाति। यदुक्तम्—

जगज्जन्मस्थितिध्वंसतिरोभावविमुक्तयः।
कृत्यं सकारकफलं ज्ञेयमस्यैतदेव हि[४]।। इति।

---

१. संवित्स्वातन्त्र्यम्, श्लोक-सं. ३६२।
२. संवित्प्रकाशः, द्रष्ट., श्रीतन्त्रालोकविव. ३.४६७।
३. (क) उद्धृतम्-दर्शनबिन्दुसङ्ग्रहे, पृ.सं. ७८।
पञ्चमन्त्राः—सद्योजातं प्रपद्यामि, वामदेवाय नमः, अघोरेभ्योऽथ घोरेभ्यः, तत्पुरुषाय विद्महे, ईशानः सर्वविद्यानाम्'।
४. उद्धृतम्—सारस्वती सुषमा, पृ.सं. ३४, वर्षे ३९, अङ्केषु १-४ (विवरणम्)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वातन्त्र्यशक्तिर्मुख्यमैश्वर्यम्

आगमे मुख्यं तत्त्वं परमाद्वैतभूतमास्ते परमशिवः। सोऽयं चिद्घनः संवित्स्वभावो विलसति। स्वातन्त्र्यं तदभिन्ना शक्तिः। तदिदं परमात्मनो मुख्यमैश्वर्यम्। सैवेयम् आनन्दशक्तिः। यदुक्तम्—

'तयोर्यद् यामलं रूपं स संघट्ट इति स्मृतः।
आनन्दशक्तिः सैवोक्ता यतो विश्वं विसृज्यते[१]॥' इति।

'आनन्दः स्वातन्त्र्यम्'[२] इति च।

स्वातन्त्र्यं नाम विमर्शः, चित्, चैतन्यं, स्फुरत्ता, सत्ता, सारः, हृदयं, स्पन्दः, शक्तिदशा, स्वरसोदिता, प्रतिभा, परावाग् इति च उच्यते। यदुक्तम्—

न शिवेन विना देवी न देव्या च विना शिवः।
नानयोरन्तरं किञ्चिच्चन्द्रचन्द्रिकयोरिव॥
न शिवः शक्तिरहितो न शक्तिर्व्यतिरेकिणी।
शिवः शक्तस्तथाभावान् इच्छया कर्तुमीहते॥
शक्तिशक्तिमतोर्भेदः शैवे जातु न वर्ण्यते[३]॥

गुप्तपादेन इयमनुत्तरा कुण्डली कौलिकीति चोच्यते। तद्यथा—

अनन्यापेक्षिता यास्य विश्वात्मत्वं प्रति प्रभोः।
तां परां प्रतिभां देवीं सङ्गिरन्ते ह्यनुत्तराम्[४]॥
अकुलस्यास्य देवस्य कुलप्रथनशालिनी।
कौलिकी सा परा शक्तिरवियुक्तो यया प्रभुः[५]॥

सैषा समर्थिता भगवता उत्पलदेवेन—

चितिः प्रत्यवमर्शात्मा परा वाक् स्वरसोदिता।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परात्मनः[६]॥

---

१. श्रीतन्त्रालोकः, ३.६८।
२. पूर्णताप्रत्यभिज्ञा, १.५२, स्वातन्त्र्यशक्तिः प्रथगा तदीया ह्यानन्दरूपेण विभासमाना।
३. शिवदृष्टिः, ३.२.३;　४. श्रीतन्त्रालोकः, ३.६६।
५. श्रीतन्त्रालोकः, ३.६७;　६. ईश्वर-प्रत्यभिज्ञा, ११५.१३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सा स्फुरत्ता महासत्ता देशकालाविशेषिणी।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः[१]॥

अनयैव शक्त्या शिवः परिचीयते। तत एवास्या अभिधानं भवति शैवीमुखमिति। यदुक्तम्—

शक्त्यवस्थाप्रविष्टस्य निर्विभागेन भावना।
तदासौ शिवरूपी स्याच्छैवीमुखमिहोच्यते[२]॥
यथाऽऽलोकेन दीपस्य किरणैर्भास्करस्य च।
ज्ञायते दिग्विभागादि तद्वच्छक्त्या शिवः प्रिये[३]॥

निरपेक्षं जगत्कारणत्वं शिवस्य

घटः कार्यम्, कुलालो निमित्तकारणम्, दण्डचक्रादिः सहकारिकारणम्, कपालो मृत्पिण्डो वा समवायिकारणमिति नैयायिकाः। आगमिका जगत्प्रपञ्चं प्रति कार्यकारणभावं कथं व्यवस्थापयन्तीति चेदुच्यते। जगतः सृष्ट्यादिः कार्यम्, पतिपदार्थः शिवो निमित्तकारणम्, शक्तयोऽस्य स्वभावभूताः सहकारिकारणम्। बिन्दुस्तूपादानकारणमिति वितत्य प्रपञ्चितं पौष्करसंहितायाम्[४] पराख्यसूत्रे[५] चेति।

आगमिका वेदान्तिवत् परमेश्वरस्य जगत्सृष्ट्यादिकं प्रति अभिन्ननिमित्तोपादानत्वं नाङ्गीकुर्वते।

प्रकाश-विमर्शौ

परमशिवः स्वस्वातन्त्र्यमहिम्ना स्वात्मन्येव स्वाभिन्नं विचित्रं विश्वं स्वस्माद् अन्योन्यं च भिन्नमिवोद्भासयति। वस्तुतः शक्तिशक्तिमतोरभेदेऽपि स्वात्मकवेद्यांशप्राधान्यविवक्षायां विमर्शादिशब्देन वेदकांशप्राधान्यविवक्षायां तु तस्यैव प्रकाशशब्देन व्यवहारः। यथोक्तम्—'स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति'[६] इति।

---

१. ई.प्र.का., १.५.१४; २. विज्ञानभैरवः, श्लो. २०।
३. विज्ञानभैरवः, श्लो. २१।
४. उद्धृतम्, सारस्वती सुषमा, वर्षे-३९, अङ्केषु-१-४, पृ.सं. ३४।
५. उद्धृतम्, तत्रैव।
६. प्रत्यभिज्ञाहृदयम्, सूत्र-सं. २।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वच्छः स्वच्छन्दश्च प्रकाशः

भागवतं विश्वं प्रतिबिम्बभूतं शक्तेः, बोधसुन्दरो भगवाँश्च विश्वभावप्रतिबिम्बसहिष्णुः प्रकाशो विश्वोत्तीर्णतया प्रथेते। प्रतिबिम्बस्वीकारादपि शिवो दर्पणवन्निर्मलः, न तु समलः। बोधाभ्युपगत-चित्रज्ञानवद् एकानेकस्वरूपोऽपि बोधमहेश्वर एक एव। एष प्रकाशः स्वचमत्कारसारः स्वेच्छंया स्वात्मभित्तौ अभेदेन परामृशन् स्वसंविदुपादानमेव विश्वमाभासयति। विश्वस्य आभासनमेव निर्मातृत्वं भगवत इति परामर्श एव दर्पणप्रकाशादेः प्रकाशमहेश्वरस्य वैलक्षण्यं प्रतिपादयति। यदुक्तम्—

अन्तर्विभाति सकलं जगदात्मनीह
यद्वद्विचित्ररचना मुकुरान्तराले।
बोधः पुनर्निजविमर्शनसारयुक्त्या
विश्वं परामृशति नो मुकुरस्तथा तु[१]॥

शुद्धाध्वपञ्चकम्

परमशिवो विश्वोत्तीर्णो विश्वात्मकश्चास्ते। प्रकाशैकघनस्यास्य अखिलमभेदेनैव स्फुरति। परमशिवाद् अन्यत् किमपि वस्तुतो ग्राह्यं ग्राहकं च नास्ति। इत्थं परमेश्वरापेक्षया स्वाङ्गनिर्मिते भावराशौ न काचिद् भेदभ्रान्तिः। मायाप्रमात्रपेक्षया तु योऽयं भेदावभासः, एषा पूर्णत्वाख्यातिरूपा भ्रान्तिः अपूर्णख्यातिर्भेदप्रथा भवति। परमशिवस्य स्वस्वरूपरूपा याः शक्तयः—चिदानन्दैषणाज्ञानक्रियारूपाः शिवादितत्त्वदशामधिशेरते—शिवः, शक्तिः, सदाशिवः, ईश्वरः, शुद्धविद्या चेति। सर्वप्रमातृणामन्तःपूर्णाहन्ताचमत्कारमयं सर्वतत्त्वोत्तीर्णं महाप्रकाशवपुर्यच्चैतन्यम्, एतदेव शिवतत्त्वम्। चिद्रूपस्य विश्वं भवामीति परामृशतो विश्वभावस्वभावमयी संविदेव सर्वभावानां बीजभूमिः—शक्त्यवस्था। महेशस्य महाशून्यभूमौ 'अहमिदम्' इत्यभेदेन पूर्णाहन्तामयो ज्ञानप्रधानः क्रियागौणश्चमत्कारः सदाशिवदशा। इदन्ताप्राधान्येन अहन्तागुणीकारेण 'अहम्-अहम्', 'इदमिदम्' इति चमत्कारो बोधसारत्वाद् भगवतो विद्यातत्त्वं शुद्धम्। तुर्यातीतमनुत्तरम्, तुर्यरूपतया तत्त्वपञ्चकतया गीयते। परमशिवः कर्ता, सदाशिवेश्वरभूमौ अहमिदमिति प्रकाशः शुद्धवेदनरूपः करणम्, मायाधरान्ततत्त्वसर्गः कार्यमिति कर्तृकरणकार्यरूप एक एव स्वात्ममहेश्वरो विजृम्भते।

---

१. विवृतिविमर्शिनी, तं.सा., पृ. १९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परमशिवस्य स्वातन्त्र्यशक्तिस्ततो न भिद्यते सोऽयं परमाद्वैतवादः। यदुक्तम्—'तथातथाभासमानत्वमपि वस्तुतो न किञ्चित्, अपि तु तदभेदाख्यातिमात्रं एतदिति'[१]।

'संवित्स्वभावः परमशिव एव भगवान् स्वातन्त्र्यादेव प्रकाशते'[२] इति।

'नानावैचित्र्यसहस्रैः स्फुरति'[३] इति।

पत्युस्तिस्रोऽवस्थाः

शिवो जगदुत्पत्त्यादिवर्जितः शान्तो निष्कलस्तिष्ठति। यथा—घटं प्रति वनस्थदण्डे योग्यतारूपकारणता स्वीक्रियते, तथैव निष्कले शिवे जगत्सृष्ट्यादिकरणयोग्यता। सेयं योग्यस्य शिवस्य 'शक्त' इति संज्ञा प्रथते।

या तु जगत्सृष्ट्यादिकं प्रति शिवस्य उन्मुखता भवति, सोऽयं सदाशिवाख्या सकलनिष्कलावस्था। उन्मुखस्य शिवस्य च 'उद्युक्त' इति संज्ञा प्रथते।

जगत्सृष्ट्यादिक्रियायां प्रवर्तमानस्य शिवस्य ईश्वराख्या स्थूलावस्था भवति। तत्र शिवस्य 'प्रवृत्त' इति संज्ञा प्रथते। यदुक्तम्—

शक्तोद्युक्तप्रवृत्तश्च कर्त्ता त्रिविध उच्यते।
शक्तेः प्रवृत्तिभेदेन भेदस्तस्योपचारतः[४]।। इति।

पशुर्जीवः

न्यायदर्शने पदार्थस्य सप्तविधत्वं स्वीक्रियते। तत्र प्रथमः पदार्थो द्रव्यम्। तच्च नवविधम्। यदुक्तम्—'पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव'[५] इति। तत्र अष्टमं द्रव्यमात्मा। स द्विविधो भवति। जीवः परमात्मा चेति। परमेश्वर एकः सर्वज्ञश्च भवति। तद्भिन्नो जीवः प्रतिशरीरं भिन्नो भवति, अथापि विभुरिति स्वीक्रियते। तदेवं जन्यज्ञानगुणाधिकरणं जीव इति **नैयायिकाः**। चैतन्यविशिष्टदेह एव आत्मेति **चार्वाकाः**। प्रतिक्षणं भिद्यमानो नश्वर आत्मेति **क्षणभङ्गवादिनो बौद्धाः**। शरीरव्यापी मध्यमपरिमाणो जीव इति जैनाः। एकस्यैवात्मनोऽस्तित्वं प्रतिप्राणिशरीरं भेदेन व्यपदिश्यत **इत्यद्वैतिनः**।

---

१. श्रीतन्त्रालोकः, विव. नवमाह्निकम्; २. द्र., ई.प्र.वि., खं. ३, पृ. २५।
३. प्रत्यभिज्ञाहृदयम्, सू.सं. ३; ४. मृगेन्द्रसूत्रम्, द्र., श्रीतन्त्रालोकः, १०.१७।
५. तर्कसङ्ग्रहः, पृ.सं. १।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अणुपरिमाण इति **विशिष्टाद्वैतिनोऽभ्युपयन्ति। सांख्यास्तु** पुरुषाख्यस्य जीवस्य शुद्धबुद्धत्वं पुष्करपलाशवन्निर्लेपत्वं चाङ्गीकुर्वन्ति। तदीयप्रेरणां विनैव प्रकृतिकर्तृका सृष्टिर्भवति। यदुच्यते—

'वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य'[१]।

तदेवं सांख्यनये पुरुषस्य न प्रेरकत्वं नापि प्रेर्यत्वं भवति। प्रकृतिश्च अव्यक्तनाम्नी न कस्यापि कार्यम्, अपि तु सर्वकारणमनादिश्च। यदुक्तम्—मूलप्रकृतिरविकृतिरिति[२]। परमेतद् आगमिभ्यो न रोचते।

मूलप्रकृतिर्नाविकृतिः

तथा हि—अव्यक्तं कार्यमाचैतन्ये सत्यनेकत्वात्। यद् आचैतन्ये सत्यनेकं तत्सर्वं कार्यम्, यथा घटः। यन्न कार्यं तदाचैतन्ये सत्यनेकं न भवति, यथात्मा। आचैतन्ये सत्यनेकं चाऽव्यक्तं तस्मात् कार्यमिति। यदुक्तम्—

अचेतनमनेकात्म सर्वं कार्यं यथा घटः।
प्रधानं च तथा तस्मात् कार्यं नात्मा तु चेतनः[३]॥

दृश्यमानं सम्पूर्णं जगत् सुखदुःखमोहात्मकं विद्यते, विषमं चैतत्। कार्यरूपं चैतज्जगत् तादृशमेव हेतुं कल्पयेत्। स च हेतुरव्यक्त इत्याख्यायते सांख्यैः। तदपि सत्त्वरजस्तमोमयं सुखदुःखमोहहेतुरवसीयते। तच्चाचेतनं नानारूपम्। अत एव घटादिवदसौ प्रकृतिरपि प्रधानाख्या कार्यमेव भवितुमर्हति। स च हेतुर्निशाख्या माया सिद्ध्यति। एतावता मूलप्रकृति-र्विकृतिर्न भवतीति सांख्यराद्धान्तोऽपास्तो भवति।

प्रत्यभिज्ञानये मायास्वरूपम्

अथ केयं माया इति चेदुच्यते—मीयते = परिच्छिद्यते धरान्तः प्रमातृप्रमेयप्रपञ्चो यया सा माया, मोहयति विश्वमिति वा माया।

---

१. सांख्यकारिका, ५९।
२. सां.का. ३।
३. श्रीतन्त्रालोकः, ९.१५३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परमं यत्स्वातन्त्र्यं दुर्घटसम्पादनं महेशस्य।
देवी मायाशक्तिः स्वात्मावरणं शिवस्यैतत्[१]।।

मायास्वीकारपारतन्त्र्यात् सर्वज्ञत्व-सर्वकर्तृत्वमयोऽपि बोधः सर्वज्ञत्वादिगुणापहस्तनेन अख्यातिरूपमाणवं मलमापन्नः घटाकाशवत् पूर्णरूपाच्चिदाकाशाद् अवच्छेद्य परिमितीकृतः सन् पुंस्तत्त्वमुच्यते। सोऽयं मायायाः पाल्यः पाश्यश्च पशुः पाशानां भाजनम्, तत्त्वषट्कवेष्टितं पुंस्तत्त्वमित्याख्यायते।

तदेवं माया शैवागमे कलादिधरणीप्रान्तं यज्जगत् तत्प्रति उपादानकारणभूता स्वीक्रियते। किन्तु कलादीनां जनने अधिष्ठातृभूतेन ईश्वरेण मायादौ क्षोभः क्रियते। यदुक्तम्—'तेनेशः क्षोभयेदेनां क्षोभोऽस्याः सूतियोग्यता'[२] इति।

अत्रेदमवधेयम्—कलादीनां धरान्तानां कार्याणामुत्पत्तेः प्रागपि मायात्मजडकारणरूपेण सत्त्वमिष्यते। सोऽयं सत्कार्यवादो निभृतमुपपादितः सांख्याचार्यैः।

'असदकरणादुपादानग्रहणात् सर्वसम्भवाऽभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्'[३]।। इति।

मायाक्षोभफलम्

तदेवमीश्वरक्षोभिता माया कलादीन् जनयति। कलादयश्च भोग्यभूता भवन्ति। माया स्वयं जाड्याञ्चिता ततश्च नास्या भोग्यसृष्टौ किमपि स्वार्थम्, सङ्घातपरार्थत्वात्। नाऽपि क्षोभकस्य ईश्वरस्य किमपि स्वार्थम्, तस्य शुद्धबोधकरूपत्वात्, आप्तकामत्वाच्च। अत्रेयं जिज्ञासा स्वरसतो जागर्ति, किमर्थं मायायां क्षोभः, मायायाः प्रसवो वेति। तत्रैवं प्रत्यभिज्ञादार्शनिकाः समादधते—'ये किल अनादिभूता नानाविधाः पुमांसो बद्धा भोक्तारोऽणवः,

---

१. परमार्थसारः, कारिका-सं. २८।

२. 'इह क्षोभः समाख्यातः संविन्निष्ठैव ज्ञेयता।
क्षोभणापि च सैवास्ति ततो येयं बहिष्कृतिः।।
अन्तःस्थितस्य विश्वस्य बीजांशस्य सिसृक्षुता।
क्षोभोऽनिच्छे यदिच्छाया भासनं क्षोभणा च तत्।।'
(द्रष्टव्यम्-पूर्णता-प्रत्यभिज्ञा, १.४९२-४९३)

३. सांख्यकारिका, ९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तेषां भोग्यसमर्पणार्थमेव मायायां क्रियमाणः क्षोभः, मायायाः कलादेः प्रसूतिश्च सार्थक्यं भजत इति।

कञ्चुकषट्कम्

अत्रेदमवधेयम्—मायातः कला जन्यते। कलातो हि तत्त्वविस्तरो भवति। यद् यस्य केनचिद्‌रूपेण कारणात्मना सूक्ष्मतया वर्तते तत्रैव तस्य सत्त्वं भवति, स्थूलस्य घटस्य उत्पत्तेः प्राग् मृद्रूपेण अवस्थानात् मृदि एव घटस्य सत्त्वं भवति न तु कुम्भकारे। एवमेव कलादीनामुत्पत्तेः प्राग् मायात्मनैव जडात्मना सत्त्वमभ्युपेयम्, अतश्च मायाया एव जाड्यं न तु तदधिष्ठातुरीश्वरस्य कुलालस्येवेत्यायाति।

प्रभोर्ज्ञानक्रियाशक्ती सङ्कुचिते, पशोर्विद्या-कले उच्येते। 'अधुनैव जानामि, अधुनैव' करोमि इति ज्ञानक्रियास्वरूपेण भावानपि तथा कलयन् अवच्छिनत्ति च इत्येषोऽस्य कालः[१]। किञ्चिदेव—इत्यवच्छिन्नमेव करोति, घटमात्रकरणाय प्रभवति, न पटादौ—इत्यणोः कलातत्त्वम्[२]। नियतात् कारणात् नियतं कार्यं यदर्थयते यथा वह्नेरेव धूम इति नियमेनाश्वमेधादेव स्वर्गफलमिति नियमेन पुण्यापुण्यैरात्मा नियम्यते, तदस्य नियतितत्त्वम्[३]। 'सर्वात्मना' इति या इयमपूर्णम्मन्यता, सर्वं मम इदमुपयुज्यते भूयासम्, मा कदाचिन्न भूवम् इत्येतत् पशो रागतत्त्वम्[४]। किञ्चिदेव घटादिकं जानामि पुरोवर्ति, न पुनर्दूरव्यवहितं वस्तु—इति विद्यातत्त्वम्[५]।

भावस्वभावः प्रकाशः प्रकाशसंविदोरभेदः

सत्त्वरजस्तमसां सुखदुःखमोहात्मकं सामान्यं रूपम्—अङ्गाङ्गिभावो यत्र नोपलभ्यते, सा मूलकारणं प्रकृतिः। जाग्रदादिका अवस्थाभेदा ग्राह्यग्राहक-प्रपञ्चरूपाः सर्वे विशेषाः परमात्मनः स्वस्वभावस्य चैतन्यमहेश्वरस्यैव,

---

१. मायीयं यच्च कर्तृत्वं क्रियया रूषितं पशोः। भावाभावावभासात्मक्रमरूपाच्च कालतः।।
करोम्यहं करिष्यामीत्याद्यात्मन्यवभासते। ततः कालपरिच्छिन्नकर्तृत्वप्रविभासकम्।।
कालतत्त्वमिदं प्रोक्तं कञ्चुकान्तर्गतं पुनः।। (पूर्णता-प्रत्यभिज्ञा, २.५३४, ५३५, ५३६)

२. 'तत्सर्वकर्तृता सा सङ्कुचितकतिपयार्थमात्रपरा।
किञ्चित्कर्तारममुं कलयन्ती कीर्त्यते कला नाम।। (षट्त्रिंशत्तत्त्वसन्दोहः, श्लोक-सं. ८)

३. 'नियतिर्नियोजयत्येनं स्वके कर्मणि पुद्‌गलम्'। (मालिनीविजयोत्तरतन्त्रम्, १.२९)

४. 'रागोऽपि रञ्जयत्येनं स्वभोगेष्वशुचिष्वपि'। (मालिनीविजयोत्तरतन्त्रम्, १.२८)

५. 'सर्वज्ञतास्य शक्तिः परिमिततनुरल्पवेद्यमात्रपरा। ज्ञानमुद्भावयन्ती विद्येति निगद्यते बुधैराद्यैः।।'
(षट्त्रिंशत्तत्त्वसन्दोहः, श्लोक-सं. ९)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सर्वावस्थासु संविदनुगमात्। इत्थं सर्वत्र एकरूपतादर्शनात् प्रमाता सारदृश्वा भवति। भावप्रकाशनेऽन्यस्याप्रकाशरूपस्य बाह्यवासनादेर्हेतोरनुपपद्यमानत्वात् स्वात्मप्रकाश एव स्वतन्त्रः, चित्स्वरूपोऽहमेव प्रकाशे—प्रमातृप्रमेयरूपतया इत्यवास्तवो भेदः प्रथते—इति तात्त्विकप्रथनाभावाद् भ्रान्तेरन्धकारेण रूपणम्। आदौ तावद् एकसंवित्सतत्त्वेष्वपि भावेषु भेदमयं जाड्यापादनमख्यातितिमिरेण कृतम्, यत् स्वात्मनोऽभिन्नानां भावानां ततो भेदेन प्रथनम्—अत एव तिमिरमिव 'तिमिरम्' अख्यातिः[१]। अख्यात्यपहस्तिततचित्स्वरूपेषु विश्ववर्तिष्वपि पदार्थेषु जाड्यमापादितेषु मध्यादुद्धृते व्यतिरिक्ते जडे 'देहप्राणादौ' वेद्यखण्डे कृशोऽहम्, स्थूलोऽहम्, क्षुधितोऽहम्, सुखी अस्मि, न किञ्चिद् अहम्—इति प्रमातृतया अनात्मभूते 'आत्ममानित्वम्' अताद्रूप्ये ताद्रूप्यप्रतिपत्तिः—एतद् अतिवैशसम्[२]।

अनुत्तरमहेश्वरस्य षट्त्रिंशत्तत्त्वरूपता

तदित्थं परमशिव एव स्वस्वातन्त्र्यवशाद् विभिन्नां दशामधिशय्य तत्तत्पदव्यवहारभाग् भवतीति षट्त्रिंशत्तत्त्वविभागोऽप्यत्र। षट्त्रिंशत्तत्त्वानि त्रिषु भागेषु विभक्तानि भवन्ति त्रिकशास्त्रे—

१. शिवतत्त्वम् = शिवशक्त्यात्मकम्।
२. विद्यातत्त्वम् = सदाशिवेश्वरशुद्धविद्या-तत्त्वत्रयात्मकम्।
३. आत्मतत्त्वम् = अवशिष्टमेकत्रिंशत्तत्त्वात्मकम्।

मलत्रयावृतः शिव एव पशुः

स्वेच्छागृहीताणवमायीयकार्ममलत्रयः शिवोऽङ्गीकृतकञ्चुकपञ्चकवशाद् नानाविधसङ्कोचभावमधिगतो जीवोऽणुः संसारीत्यादिभिर्नामधेयैर्व्यवह्रियमाणो बद्धो भोक्ता सम्पद्यते। यदुक्तम्—

एष प्रमाता मायान्धः संसारी कर्मबन्धनः।
विद्याभिज्ञापितैश्वर्यश्चिद्घनो मुक्त उच्यते[३]।।

स्वाङ्गरूपेषु भावेषु प्रमाता कथ्यते पतिः।
मायातो भेदिषु क्लेशकर्मादिकलुषः पशुः[४]।।

---

१. 'अज्ञानतिमिरयोगाद् एकमपि स्वस्वभावमात्मानम्। ग्राह्यग्राहकनानावैचित्र्येणावबुध्यते।।
(पर.सा., का.सं. २५)

२. तिमिरादपि तिमिरमिदं गण्डस्योपरि महानयं स्फोटः।
यदनात्मन्यपि देहप्राणादावात्ममानित्वम्।। (परमार्थसारः. कारिका-सं. ३१)

३. ईश्वरप्रत्यभिज्ञा. ३.२.२; ४. ईश्वरप्रत्यभिज्ञा, ३.२.३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मायागृहीतसङ्कोचः शिवः पुंतत्त्वमुच्यते।
अयमेव हि संसारी जीवो भोक्तैव दृश्यते[१]।।

सत्त्वकर्तृत्वपूर्णत्वनित्यत्वान्यस्य शक्तयः।
तत्सङ्कोचात् सङ्कुचितः कलाद्यात्मतया मतः[२]।।

बन्धमोक्षौ न वास्तवौ

ईदृशसङ्कोचभाव एव बन्धः। सोपायाद् आणवशाक्तशाम्भवाख्याद् अनुपायाद्वा समावेशवशाद् विगलितसङ्कोचभावोऽभिव्यक्तस्वस्वरूपप्रथनात्मकः पूर्णात्मतालाभो मोक्षः। यदुक्तम्—

'मोक्षो हि नाम नैवान्यः स्वरूपप्रथनं हि सः'[३]।

मोक्षस्य नैव किञ्चिद् धामास्ति न चापि गमनमन्यत्र।
'अज्ञानग्रन्थिभिदा स्वशक्त्यभिव्यक्तता मोक्षः'[४]।।

चिच्छक्तिरेव वस्तुत एतन्नये प्रमाणम्। यदुक्तम्—

न चक्षुः शब्दसंवित्तौ न श्रोत्रं रूपवेदने।
सर्वत्र ग्राहिका संवित् सैव मानमतो मतम्[५]।।

एवञ्च अविद्यारागादिना कलुषिता विषयाभिमुखी संशयादिविनिर्मुक्ता चिच्छक्तिः प्रमाणम्। प्रमाता तु आत्माभिमुखी चिच्छक्तिरिति प्रमाणप्रमात्रोर्विवेकः। प्रमाणं त्रिविधम्—प्रत्यक्षमनुमानं शब्दश्चेति। यदुक्तम्—'प्रत्यक्षमनुमानञ्च सहशब्देन शाङ्करे'[६] इति।

पाशपञ्चकम्

स्वेच्छाप्रोद्भूतपाशप्रभावेणैव शिवः पशुर्भवति। स एव पुनः पाशमुक्तः सन् सदाशिवो भवति। पाशः पञ्चविधो भवति—मलः, तिरोधानशक्तिः, महामाया, माया, कर्म चेति।

मलः—मलिनीकरोति = दृक्क्रियात्मकं तेज आच्छादयतीति मलः। अयम् = अज्ञानात्मा अनादिः पशुत्वापादको भवति[७]। अस्य अष्टौ पर्यायाः प्रोक्ताः। यथा—

---

१. अनु.प्र.प., श्लोक-सं. २२; २. अनु.प्र.प., श्लोक-सं. २३।
३. परमार्थसारः, कारिका-सं. ६०; ४. उद्धृतम्, भूमिका, पूर्णताप्रत्यभिज्ञा, पृ.सं. १२।
५. पौष्करे-१.१५; ६. दर्शनसर्वस्वम्, प्रास्ताविकम्, पृ.सं. ९।
७. विवरणं द्रष्टव्यम्, पूर्णताप्रत्यभिज्ञा-२.४४८, ४४९, २५२, २५३।
'इत्याद्यन्वर्थसंज्ञाभिस्तत्र तत्र प्रकीर्तितम्। स्वरूपं गोपयन्तीयं मात्रा भेदं शिवात् पशोः।। दर्शयन्ती सुषुप्तत्वमिवाधत्ते पशौ मलम्। आणवं मलमख्यातिरस्तु किन्त्वभिलाषिता।।'

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'मलोऽज्ञानं तमोऽज्ञत्वं तिरस्कारकरस्तथा।
पतिः पशुरविद्येति मलपर्यायवाचकाः[१]।।'

मायावन्मलोऽप्यकारणकत्वाद् अनादिर्भवति। अस्य भिन्नाः शक्तयो भवन्ति। ततश्च एकमुक्तौ सर्वमुक्तिर्नापद्यते। मलस्य सप्तविधं कार्यं भवति। कार्यकारणयोरभेदान्मलस्य सप्तविधत्वमुच्यते। यथा—

मोहो मदश्च रागश्च विषादः शोष एव च।
वैचित्यं चैव हर्षाख्यः सप्तैते सहजा मलाः[२]।।

प्रकारान्तरेण मलं द्विविधम्—बौद्धं पौरुषेयञ्चेति[३]।

तिरोधानशक्तिः—मलशक्तयो यदधीना भवन्ति सा पारमेश्वरी तिरोधानशक्तिः। अस्या मुख्यरूपेण पाशरूपता[४] नास्ति।

महामाया—इयं शुद्धाध्वन उपादानकारणं भवति। इमां केचन विद्याङ्गम्, अपरे तु मायाङ्गं स्वीकुर्वन्ति[५]। शुद्धविद्या वागीश्वरी मातृका कुण्डलिनी परिग्रहशक्तिरिति च महामायापर्यायाः। कालदेशाध्वनां जननीं महामायामाहुराचार्याः।

माया—प्रलये यस्यां सर्वं जगत् माति अथवा सर्वं जगत् यतो मयति सा माया[६]। यदुक्तम्—

---

१. सुप्रभेदागमः, उद्धृतम्—सारस्वती सुषमा, पृ. ३७, वर्षे-३९, अङ्केषु १-४।

२. तत्त्वत्रयनिर्णयः, श्लोक-सं. १८।

३. पौरुषं पुरुषस्थं तद् बौद्धं बुद्धिस्थमेव च।
तत्त्वतो मायिकं सर्वं वैविध्यं कार्यनामतः।।
पौरुषं हि मलं यत्स्याद् दीक्षा तस्य निवर्तिका।
किन्तु दीक्षापि नो तावद् यावद् बौद्धं न नश्यति।।
सङ्कोचाध्यवसायात्माऽज्ञानं यद् बुद्धिसंस्थितम्। तदुच्छेदाय बौद्धी स्यादसङ्कुचितचेतना।।
तात्त्विकस्वस्वभावस्याज्ञानमेव ह्यनिश्चयः। अनात्मन्यात्मगर्वो यः स विपरीतनिश्चयः।।
इमे एव मले द्वे हि बुद्धिस्थे परिकीर्तिते। शास्त्रजेऽध्यवसायात्मज्ञाने सति विनश्यतः।।'
(पूर्णताप्रत्यभिज्ञा-१.१६४, १६५, १६८, १७०, १७१)

४. तेन स्वरूपस्वातन्त्र्यमात्रं मलविजृम्भणम्। मलादीनां च केषाञ्चिद् संविद्विश्रान्तिमन्तरा।।
नोपपन्ना यतः सत्ताऽतोऽत्र हेतुर्महेश्वरः। इति सृष्टौ मलं कर्म मात्रां चापेक्ष्य वर्तते।।
(पूर्णताप्रत्यभिज्ञा, २.४५३-४५४)

५. भेदाख्यमायिकमलाभावाद् विद्याङ्गभूतेयम्। वाऽज्ञानमलसद्भावान्मायैवेयं महामाया।।
(पूर्णताप्रत्यभिज्ञा, १.१६२)

६. ग्राह्यमण्डलतद्ग्राहिनानारूपावमर्शिनी। 'माया' पूर्णत्वसम्भोगप्रच्युतिक्षोभकारिणी।।
भेदोद्भावनसामर्थ्यमिदन्तोल्लेखनेन यत्। सैव 'माया' समाख्याता न तु वस्त्वन्तरात्मिका।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मायातत्त्वं जगद्बीजमविनाश्यशिवात्मकम्।
विभ्वेकमकलं सूक्ष्ममनाद्यव्ययमीश्वरम्[१]।।

कर्म—अनेन पञ्चमेन पाशेनापि पशुर्बध्यते। कर्म द्विविधं भवति—धर्मात्मकमधर्मात्मकं च। अर्थतस्तस्य त्रैविध्यं भवति—जातिप्रदम्, आयुःप्रदम्, भोगप्रदञ्च। यथोक्तं महामुनिना—'सति मूले तद्विपाको जात्यायुर्भोगाः'[२] इति।

तदेवं पाशः पञ्चविधो भवति। मलादिः कर्मान्तः। मृगेन्द्रतन्त्रे[३] महामायां विना पाशश्चतुर्विधः प्रोच्यते। स्वायम्भुवागमे[४] तु तिरोधानशक्तिमपि विहाय त्रिविधः पाशः स्वीक्रियते—मलं कर्म माया चेति[५]। मुक्तौ पत्युर्ज्ञानमेव कारणम्[६], तदुपकारकन्तु पशुपाशयोर्ज्ञानमिति त्रिविधः पदार्थः षट्त्रिंशत्तत्त्वात्मको[७] भवति।

तत्तदर्थप्रवृत्ताभिः संज्ञाभिरभिधीयते। कार्यतो नामतो भेदो मायाया अधुनोच्यते।।
वैषम्यमधिगच्छन्ती जननौन्मुख्यभागियम्। 'मायाग्रन्थिः' समाख्याता मायाविलपदाभिधा।।
अव्यक्तस्य कलायाश्च जननी या गुहा स्मृता। साऽव्यक्तकलयोस्तत्त्वं 'तत्त्वरूपे'ति कथ्यते।।
इदं तत्त्वमिदं नेति भ्रमसंशयदायिनी। मायाशक्तिः समाख्याताऽभिन्ने भेदावभासिनी।।
इत्थं माया त्रिधा ख्याता नामकार्यविभेदतः। ग्रन्थिस्तत्त्वं च शक्तिश्च यद्यप्येकैव वस्तुतः।।
(द्रष्टव्यम्, पूर्णता-प्रत्यभिज्ञा-१.१३४, १४५, १४८-१५२)

१. उद्धृतम्—सारस्वती सुषमा, वर्षे-३९, अङ्केषु-१.४।

२. योगसूत्रम्—२.१३।

३. मलादीनां च केषाञ्चिद् संविद्विश्रान्तिमन्तरा। नोपपन्ना यतः सत्ताऽतोऽत्र हेतुर्महेश्वरः।।
इति सृष्टौ मलं कर्म मायां चापेक्ष्य वर्तते। शिवेच्छैवेति संसिद्धं सिद्धान्तं परमामृतम्।
अतः सृष्ट्यादिकृत्येऽस्ति मलादेरप्यपेक्षणम्।। (द्रष्टव्यम्, पूर्णताप्रत्यभिज्ञा, २.४५३-४५५)

४. 'अनादिमलमेवेदं पशुत्वं परिकीर्तितम्। स्वेच्छयैवोद्गतं भाति स्वेच्छयैव विनश्यति।।
(द्रष्टव्यम्, पू.प्र.का. २.४७०)

५. 'वृत्ते स्वरूपसङ्कोचे आणवेन मलेन वै। भिन्नस्य प्रथनं यत्तन्मायीयमिति संज्ञितम्।।
अबोधरूपदेहादेः कर्तुर्भिन्नप्रथावतः। धर्माधर्मस्वरूपं च मलं कार्मं प्रकीर्तितम्'।।
(द्रष्टव्यम्, पू.प्र.का. ४.४७३-४७४)

६. 'यथा स्थितस्तथैवास्स्व मा गा बाह्यमथान्तरम्। केवलं चिद्विकासेन विकारनिकराञ्जहि।।
स ह्यखण्डितसद्भावं शिवतत्त्वं प्रपश्यति। यो ह्यखण्डितसद्भावमात्मतत्त्वं प्रपद्यते।।'
(द्रष्टव्यम्, पू.प्र. १.२५७-२६३, २७०)

७. 'शिव-शक्ति-सदाशिवेश्वर-शुद्धविद्या-माया-कला-विद्या-राग-नियति-काल-पुरुष-प्रकृति-बुद्ध्यहंकार-मनः-श्रोत्र-त्वक्-चक्षु-जिह्वा-घ्राण-वाक्-पाणि-पाद-पायूपस्थ-शब्द-स्पर्श-रूप-रस-गन्ध-आकाश-वायु-वह्नि-सलिल-भूमय इत्येतानि षट्त्रिंशत् तत्त्वानि'।
(पूर्णता-प्रत्यभिज्ञा, पृ.सं. १४९)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नाशिवं विद्यते क्वचित्

एष संविदद्वयवादः। अत्र शक्तिशक्तिमतोरभेदः। पराशक्तिः परात्मनः शिवान्न भिद्यते। षट्त्रिंशत्तत्त्वमध्ये न सा दशा या शिवो न भवेत्। सोऽयं विश्वमयः। विश्वोत्तीर्णोऽप्ययमेवाच्युतो विद्यते यं परशिवमाहुर्गुप्तपादाः। यदुक्तम्—

सर्वो ममायं विभव इत्येवं परिजानतः।
विश्वात्मनो विकल्पानां प्रसरेऽपि महेशता[१]॥

इति वा यस्य संवित्तिः क्रीडात्वेनाखिलं जगत्।
स पश्यन् सततं युक्तो जीवन्मुक्तो न संशयः[२]॥

तस्माच्छब्दार्थचिन्तासु न सावस्था न या शिवः[३]॥

शिवाशिवयोरत्र नितरामभेदः स्वीकार्यो भवति।

श्री-स्वात्म-गुरु-शिवाभेददृष्टिमाहात्म्यम्

तदेवं स्वात्ममहेश्वर एव विश्वमयो विश्वोत्तीर्णश्च विराजते, परं यावद् एवं प्रभुं तदनुग्रहेण साधको गुरुरूपतया न पश्यति, तावद् असौ प्रभुः स्वात्मतया नास्य प्रत्यभिज्ञायते। यथाहुः श्रीगुरवः—

नित्यं निरावरणमप्रतिमस्वरूपं शम्भुं स्वभावविमलं हृदि संस्फुरन्तम्।
पश्यन्ति नैव कृतिनः सुकृतैर्भवन्तं यावद्भवान्न गुरुरूपतया विभाति[४]॥

जगत्सृष्टौ शिवस्वार्थोत्प्रेक्षा

परशिवं ध्यायतो यत्सुखं जायते तद्ध्यायिन एव विजानन्ति। तदेव सुखमनुभवितुं या लिप्सा, तद्वान् शिवो जगत्सृष्ट्वा देहवान् भवतीत्यहम्मन्ये।

त्वामनुस्मरतो नित्यं देहिनो यत्सुखं विभो।
मन्ये तल्लिप्सया सृष्ट्या जगद् भवसि देहवान्[५]॥

सदागमैश्च नैगमैः सुधामयं शुभावहं, सुदर्शनैकसंविदाप्यभीप्सितं चिरन्नवम्।
तदेतदद्वयद्वयप्रथं सदाशिवं गुरुं, तदैक्यगं स्वयम्प्रभं सदात्मकं भजेऽन्वहम्[६]॥

●

१. सर्वो ममायं विभव इत्येवं परिजानतः।
विश्वात्मनो विकल्पानां प्रसरेऽपि महेशता॥ (प्रत्यभिज्ञाहृदयम्, पृ.सं. ६७)
२. स्पन्दकारिका, २.३०; ३. स्पन्दकारिका, २.२९।
४. संवित्स्वातन्त्र्यम्, श्लोक-सं. ४७६; ५. संवित्स्वातन्त्र्यम्, श्लोक सं. २५।
६. मम शिवस्तुतौ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

षट्त्रिंशत्तत्त्वसन्दोहविमर्शः

डॉ. हरेरामत्रिपाठी
उपाचार्यः, सर्वदर्शनविभागे
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य,
नयी-दिल्ली

* * *

दृश्यते आत्मसाक्षात्कारः क्रियते वा तत्त्वसाक्षात्कारः क्रियतेऽनेनेति व्युत्पत्त्या आत्मसाक्षात्कारसाधनं तत्त्वसाक्षात्कारसाधनं वा दर्शनशास्त्रं भवति। तत्र प्राच्यप्रतीच्यभेदेन दर्शनशास्त्रं द्विविधं भवति। प्राच्यदर्शनशास्त्रमेव भारतीयदर्शनमिति। नास्तिकास्तिकभेदेन भारतीयदर्शनस्य द्वैविध्यं शास्त्रकारैः प्रतिपादितम्। तत्र यद्यपि नास्तिकदर्शनं चार्वाकजैनबौद्धभेदेन त्रिविधमथ च न्यायवैशेषिकसांख्ययोगपूर्वमीमांसोत्तरमीमांसाभेदेन आस्तिकदर्शनस्य षड्विधत्वं लोके विश्रुतमस्ति, तथापि माधवाचार्यैर्भारतीयदर्शनस्य षोडशविधत्वं सर्वदर्शनसङ्ग्रहे निरूपितम्। चार्वाकबौद्धार्हतरामानुजपूर्णप्रज्ञनकुलीयपाशुपतशैवप्रत्यभिज्ञारसेश्वरौलूक्याक्षपादजैमिनिपाणिनिसांख्यपातञ्जलशाङ्करदर्शन-भेदात्। तेष्वन्यतमानि दर्शनानि नकुलीयपाशुपतशैवप्रत्यभिज्ञादर्शनानि सन्ति। एतानि दर्शनानि माहेश्वरसम्प्रदायेऽन्तर्भूतानि भवन्ति। दार्शनिकदृष्ट्या माहेश्वरसम्प्रदायः चतुर्विधः—पाशुपतदर्शनं, शैवदर्शनं, वीरशैवदर्शनं, प्रत्यभिज्ञादर्शनञ्चेति। गुर्जरप्रदेशे महाराष्ट्रप्रदेशे च पाशुपतदर्शनस्य, तमिलदेशे शैवदर्शनस्य, कर्णाटके वीरशैवदर्शनस्य, काश्मीरप्रदेशे प्रत्यभिज्ञादर्शनस्य च प्रचारः प्रसारश्चासीत्। तत्रापि प्रत्यभिज्ञादर्शनं प्रामुख्यं भजते। प्रत्यभिज्ञादर्शनमेव त्रिकशब्देनाभिधीयते। द्विनवतिरागमेषु सिद्धानामशालिन्यागमानां प्रमुखत्वात्, परापरपरापराणां त्रिकाणां निरूपितत्वाद्वाऽस्य दर्शनस्य नाम त्रिकदर्शनमिति। प्रत्यभिज्ञादर्शनस्य सर्वे ग्रन्थकाराः काश्मीरदेशीया एवासन्। अस्य दर्शनस्य प्रचारः प्रसारश्च काश्मीरदेश एवासीदत एवेदं दर्शनं काश्मीरशैवदर्शनमिति नाम्ना ख्यातमभूत्। काश्मीरशैवदर्शने षट्त्रिंशत्तत्त्वानि स्वीकृतानि सन्ति। यद्यपि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काश्मीरशैवदर्शनस्यानेके आचार्या विश्वविश्रुताः सन्ति, तथापि सोमानन्दः, वसुगुप्तः, कल्लटः, उत्पलः, अभिनवगुप्तः, रामकण्ठः, क्षेमराजः, योगराजः, सुभट्टदत्तः, जयरथः, भास्करकण्ठः, वरदराजप्रभृतयश्चाचार्याः प्रमुखाः विद्यन्ते। उक्ताचार्याणां कृतयोऽधोलिखिताः सन्ति—

(क) सोमानन्दः[१]

१. शिवदृष्टिः; २. परात्रिंशिका।

३. परात्रिंशिकातात्पर्यटीका; ४. शाक्तविज्ञानम्।

(ख) वसुगुप्तः[२]

१. शिवसूत्रम्; २. स्पन्दकारिका। (अत्र विदुषां विवादो विद्यते)

३. स्पन्दामृतम्; ४. श्रीमद्भगवद्गीताया वासवीटीका।

५. सिद्धान्तचन्द्रिका।

(ग) कल्लटः[३]

१. स्पन्दकारिका; २. स्पन्दनिर्णयः।

(घ) उत्पलदेवः[४]

१. शिवस्तोत्रावली (एकविंशतिशिवस्तोत्राणां सङ्ग्रहः)।

२. ईश्वरप्रत्यभिज्ञा; ३. ईश्वरप्रत्यभिज्ञावृत्तिः।

४. सिद्धित्रयी; ५. सिद्धित्रयीवृत्तिः।

(ङ) अभिनवगुप्तः[५]

१. अनुत्तराष्टिका; २. भट्टतौतकृतस्य काव्यकौतुकस्य विवरणम्।

३. क्रमस्तोत्रम्; ४. घटकर्परकुलकवृत्तिः।

---

१. काश्मीरेतिहासः—हनुमत्प्रसादशास्त्री श्री ला.ब.शा.रा.सं. विद्यापीठ, नईदिल्ली, २०२४ संवत् पृ.स. २६८।
२. काश्मीरेतिहासः, पृ.सं. २६५।
३. तदेव, पृ.सं. २१५।
४. तदेव, पृ.सं. २१३।
५. तदेव, पृ.सं. २०६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

५. तन्त्रवटधानिका; ६. तन्त्रसारः।
७. तन्त्रालोकः; ८. देहस्थदेवताचक्रस्तोत्रम्।
९. ध्वन्यालोकलोचनम्; १०. नाट्यलोचनम्।
११. परमार्थचर्चा; १२. परमार्थद्वादशिका।
१३. परमार्थसारः; १४. परात्रिंशिकाविवरणम्।
१५. प्रकरणस्तोत्रम्; १६. प्रत्यभिज्ञाविमर्शिनी बृहतीवृत्तिः।
१७. प्रत्यभिज्ञाविमर्शिनी लघुवृत्तिः; १८. बोधपञ्चदशिका।
१९. भगवद्गीताटीका; २०. भारतीयनाट्यशास्त्रटीका।
२१. भैरवस्तोत्रम्; २२. महोपदेशविंशतिः।
२३. मालिनीविजयवार्तिकम्; २४. अनुभवविवेचनम्।
२५. क्रमकेलिः; २६. प्रकरणविवरणम्।
२७. प्रकीर्णविवरणम्; २८. पूर्वपञ्चाशिका।
२९. कथामुखतिलकम्; ३०. लघ्वी प्रक्रिया।
३१. भेदवादविवरणम्; ३२. तत्त्वाध्वप्रकाशिका।
३३. शिवदृष्ट्यालोचनम्; ३४. पर्यन्तप्रकाशिका[१]।
३५. परमार्थचर्चा; ३६. रहस्यपञ्चदशिका।
३७. तन्त्रोच्चयः; ३८. पुरूरवोविचारः।
३९. पदार्थप्रवेशनिर्णयटीका; ४०. देवीस्तोत्रविवरणम्।
४१. शिवशक्त्यविनाभावस्तोत्रम्; ४२. बिम्बप्रतिबिम्बवादः।
४३. अनुत्तरतत्त्वविमर्शिनीवृत्तिः।

---

१. कान्तिचन्दपाण्डेयानुसारेण पर्यन्तप्रकाशिकामारभ्यानुत्तरतत्त्वविमर्शिनीपर्यन्तं दश ग्रन्था अभिनवगुप्तस्यैव सन्ति। (काश्मीरेतिहासः, पृ.सं. २००)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(च) रामकण्ठः[१]

१. स्पन्दविवरणसारमात्रम्; २. मतङ्गतन्त्रव्याख्या।

३. श्रीमद्भगवद्गीतायाः शैवसम्प्रदायानुगामिनी व्याख्या।

(छ) क्षेमराजः[२]

१. स्वच्छन्दोद्योतः; २. नेत्रोद्योतः।

३. ध्वन्यालोकलोचनोद्योतः; ४. स्पन्दसन्दोहः।

५. स्पन्दनिर्णयः; ६. प्रत्यभिज्ञाहृदयम्।

७. शिवसूत्रविमर्शिनी; ८. स्तवचिन्तामणिवृत्तिः।

९. उत्पलस्तोत्रावलीटीका; १०. भैरवानुकरणस्तोत्रम्।

११. पराप्रवेशिका; १२. साम्बपञ्चाशिका-टीका।

१३. क्रमसूत्रव्याख्या; १४. परमार्थसङ्ग्रहवृत्तिः।

१५. बोधविलासः; १६. परमार्थसारटीका।

(ज) योगराजः[३]

१. परमार्थसारवृत्तिः।

(झ) सुभट्टदत्तः[४]

१. तन्त्रालोकवृत्तिः।

(ञ) जयरथः[५]

१. अलङ्कारसर्वस्वविमर्शिनी; २. हरचरितचिन्तामणिकाव्यम्।

३. पृथ्वीराजविजयालङ्कारविमर्शिनी; ४. तन्त्रालोकप्रकाशः।

५. तन्त्रसारविवेकः।

---

१. काश्मीरेतिहासः, पृ.सं. २५२; २. तदेव, पृ.सं. २१३।

३. तदेव, पृ.सं. २७७; ४. तदेव, पृ.सं. ३७९।

५. तदेव, पृ.सं. २३३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(ट) भास्करकण्ठः[१]

१. प्रत्यभिज्ञाविमर्शिनी-व्याख्या; २. लल्लावाक् अनुवादः।

३. योगवासिष्ठव्याख्या; ४. हर्षेश्वरस्तवः।

(ठ) वरदराजः[२]

१. शिवसूत्रवार्तिकम्।

(ड) **अज्ञातकर्तृकः**—'षट्त्रिंशत्तत्त्वसन्दोहः'।

(ढ) **राजानकानन्दः**—षट्त्रिंशत्तत्त्वसन्दोहविवरणम्।

(ण) **महेश्वरानन्दः**—महार्थमञ्जरी तस्य टीका च।

(त) **शितिकण्ठः**—महानयप्रकाशः।

(थ) **पुण्यानन्दनाथः**—कामकलाविलासः।

(द) **स्वतन्त्रानन्दनाथः**—मातृकाचक्रविवेकः।

(ध) **मातुलनयः**—शिवसूत्रम्।

(न) **चक्रपाणिनाथः**—भावोपहारः।

काश्मीरशैवदर्शनस्य ग्रन्थेष्वन्यतमो ग्रन्थः षट्त्रिंशत्तत्त्वसन्दोहो विद्यते। काश्मीरशैवदर्शने षट्त्रिंशत्तत्त्वानि स्वीकृतानि सन्ति। षट्त्रिंशत्तत्त्वानां स्वरूपं षट्त्रिंशत्तत्त्वसन्दोहे निरूपितं विद्यते। तत्र षट्त्रिंशत्तत्त्वानि अधोलिखितानि सन्ति।

[३]शिवः, शक्तिः, सदाशिवः, ईश्वरः, शुद्धविद्या, माया, कला, विद्या, रागः, कालः, नियतिः, पुरुषः, प्रकृतिः, बुद्धिः, अहङ्कारः, मनः, श्रोत्रम्, त्वक्, चक्षुः, जिह्वा, घ्राणम्, वाक्, पाणिः, पादः, पायुः, उपस्थः, शब्दः, स्पर्शः, रूपम्, रसः, गन्धः, आकाशः, वायुः, वह्निः, सलिलम्, भूमिश्च।

कश्मीरशैवदर्शनं स्वतन्त्रशिवाद्वयदर्शनशब्देनाभिधीयते। परमेश्वरः शिवः स्वतन्त्रचिद्घनसंवित्स्वभावः स्वातन्त्र्याख्यया च शक्त्या सदाशिवमारभ्य

---

१. काश्मीरेतिहासः, पृ.सं. २७९; २. तदेव, पृ.सं. २७८।

३. पराप्रवेशिका, पृ.सं. ६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पृथिवीपर्यन्तं सर्वाणि तत्त्वानि सृजति। अत्र जिज्ञासा जायते यद् यथा सांख्ये मूलप्रकृतितो[१] बुद्धेः, बुद्धितोऽहङ्कारस्य, अहङ्कारत एकादशेन्द्रियाणाम्, पञ्चतन्मात्राणाञ्च, पञ्चतन्मात्रतः पञ्चमहाभूतानाञ्चोत्पत्तिर्भवतीति क्रमो विद्यत इति, तथैव काश्मीरशैवदर्शने क्रमोऽस्ति न वा? तत्र राजानकानन्दोऽत्र ब्रवीति यत्—'वस्तुतः [२]क्रमराहित्येऽपि उद्भावयन्, अनाख्यत्वेऽपि स्वेच्छयैव स्वात्मभित्तौ तत्तच्छिवादितत्त्वाभिख्यामवभासयति'। षट्त्रिंशत्तत्त्वेषु मध्ये प्रथमं तत्त्वं शिवो विद्यते। अनादेरनन्तस्य शिवस्य स्वरूपं निरूपयन्नाह षट्त्रिंशत्तत्त्वसन्दोहकारः—

यदयमनुत्तरमूर्तिर्निजेच्छयाखिलमिदं जगत्स्रष्टुम्।
पस्पदेन स स्पन्दः प्रथमः शिवतत्त्वमुच्यते तज्ज्ञैः[३]।।

परमेश्वररोऽनुत्तरमूर्तिशिवः स्वस्वातन्त्र्यशक्त्या इदं जगत् सृजति। तत्र यः स्पन्दोऽर्थात् क्रिया यस्य स प्रथमः शिवस्तत्त्वमिति। आचार्यक्षेमराजः पराप्रवेशिकायां प्रारम्भेऽवदद् यत् [४]'परमेश्वरः प्रकाशात्मा प्रकाशश्च विमर्शस्वभावः'। शिवतत्त्वस्य लक्षणप्रसङ्गे तत्रैव विद्यते यत्—[५]'शिवतत्त्वं नाम इच्छा-ज्ञान-क्रियात्मककेवलपूर्णानन्दस्वभावरूपः परमशिव एव'। अत्र केचन वदन्ति सर्वप्रमातृणामन्तःपरिस्फुरणात् पूर्णाहन्ताचमत्कारमयं सर्वतत्त्वोत्तीर्णं सकलतत्त्वराशिगतसृष्टिसंहारशतसहस्रप्रतिबिम्बनसहिष्णुमहाप्रकाशवपुः शिवतत्त्वमिति। अनुत्तरप्रकाशपञ्चाशिकायामाद्यनाथैर्निगद्यते यद् 'अकृत्रिमाहमामश-'प्रकाशैकघनः शिवः'[६]। शिवस्येच्छा एव शक्तिरस्ति। सा च शक्तिः स्वच्छा विश्वस्य निमित्तकारणं स्वान्तर्निलीनत्वात् शिवाभिन्ना अपि वर्तते। अत एव षट्त्रिंशत्तत्त्वसन्दोहे उक्तम्—

इच्छा सैव स्वच्छा सन्ततसमवायिनी सती शक्तिः।
सचराचरस्य जगतो बीजं निखिलस्य निजनिलीनस्य[७]।।

आचार्यक्षेमराज उक्तवान् 'अस्य जगत्स्रष्टुमिच्छां परिगृहीतवतः परमेश्वरस्य प्रथमस्पन्द एवेच्छाशक्तितत्त्वम्। केचन वदन्ति तस्यैव

१. सांख्यकारिका-प्रकृतेर्महान् ततोऽहङ्कारः;
२. षट्त्रिंशत्तत्त्वसन्दोहः, पृ.सं. १।
३. तदेव, पृ.सं. १;
४. पराप्रवेशिका, पृ.सं. १।
५. तदेव, पृ.सं. ६;
६. अनुत्तरप्रकाशपञ्चाशिका, पृ.सं. १।
७. षट्त्रिंशत्तत्त्वसन्दोहः, पृ.सं. २।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वस्वातन्त्र्यमाहात्म्याद् बहिरुल्लिलसिषया परानन्दचमत्कारोद्रेकाद् अहमिति परामर्शः शक्तितत्त्वम्। अत्र आद्यनाथैरुच्यते[१] 'इच्छैव सा परिम्लाना शक्तितत्त्वमुदञ्चयन्'। यदा शिवः स्वेच्छया स्वात्मनि अहमित्यंशे इदमंशमुल्लासयति, अथ च निखिलजीवानामुपरि अनुग्रहकरणरतस्तदा स सदाशिवः। 'जगदात्मतया समाच्छाद्य निवसन् स एव निखिलानुग्रहरतः सदाशिवोऽभिहितः' इति तत्त्वसन्दोहः। स्वेच्छया शक्त्या विश्वमाच्छाद्याहन्तया स्थितं सर्वानुग्रहतोद्यतं सदाशिव इति आद्यनाथः। अत्र केचन कथयन्ति यद् यदा परमेश्वरः शुद्धचिन्मात्राधिकरणे एवाहमित्यंशे इदमंशमुल्लासयति, तदा तस्या प्रोन्मिलितमानचित्रकल्पभावराशिविषयत्वेन अस्फुटत्वाद् इच्छाप्रधानं सदाशिवतत्त्वम्। विश्वं निर्माय तमिदन्तया पश्यन्नेव शिव ईश्वरो भवति, अत एव तत्त्वसन्दोहकारो वदति 'विश्वं पश्चात् पश्यन् इदन्तया निखिलमीश्वरो जातः'[२]।

अस्य ग्रन्थस्य विवरणावसरे राजानक आह 'क्रमावभासनाद् विश्वस्य शुद्धसंविन्मात्राधिकरण एव स्फुटतया परामृश्यमाणस्य अहमंशेऽभिषेचनात् स एव परमेश्वर ईश्वरतत्त्वदशामधिश्रयति'[३]। 'स एवेश्वरतत्त्वं स्यात्पश्यन्विश्वमिदन्तया'[४] इति। अङ्कुरितं जगदहन्तया वृत्त्या स्थितमीश्वरतत्त्वमिति। ईश्वरस्य स्वरूपं केचन शैवा इत्थं वदन्ति—स्फुटीभूते च इदमंशे यदाहमंशं निषिञ्चति तदा ज्ञानशक्तिप्रधानमीश्वरतत्त्वम्[५]। सदाशिवे ईश्वरे चाहमित्यस्य विमर्शस्य समानत्वेऽपि इदमंशस्य भानमीश्वरे स्पष्टतया भवति। इदन्तांशे यो भेदो विद्यते तत्राहमंशस्य स्फुरणाद् उभयत्र अभेदबुद्धिरेव शुद्धविद्या। अत एव 'सा भवति शुद्धविद्या येदन्ताहन्तयोरभेदमतिः'[६]। यद्वा प्ररूढभेदस्य इदन्तांशस्य समधृततुलापुटन्यायेन अहमंशस्फुरणायां शुद्धविद्यातत्त्वम्। 'इदन्ताहन्तयोरैक्यमिति विद्या निगद्यते'[७]। अत्राचार्यक्षेमराजोऽपि वदति 'अहन्तेदन्तयोरैक्यप्रतिपत्तिः शुद्धविद्या' इति। अन्ये तु भेदाद्वैतवादिनामिव ईश्वरस्य यः परामर्शस्तत् क्रियाशक्तिप्रधानं विद्यातत्त्वम्।

---

१. अनुत्तरप्रकाशपञ्चाशिका, पृ.सं. ३;
२. षट्त्रिंशत्तत्त्वसन्दोहः, पृ.सं. ४।
३. षट्त्रिंशत्तत्त्वसन्दोहविवरणम्, पृ.सं. ४;
४. अनुत्तरप्रकाशपञ्चाशिका, पृ.सं. ४।
५. पराप्रवेशिका, पृ.सं. ७;
६. षट्त्रिंशत्तत्त्वसन्दोहः, पृ.सं. ४।
७. अनुत्तरप्रकाशपञ्चाशिका, पृ.सं. ४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शिवस्य स्वातन्त्र्यापरपर्याया माया वा स्वस्वरूपेषु भावेषु भेदप्रथा माया। 'माया विभेदबुद्धिर्निजांशे जातेषु निखिलजीवेषु'[१] इति षट्त्रिंशत्तत्त्वसन्दोहकार:।

यद्वा भिन्नभिन्नप्रथात्मकमायीयमलेन स्वाङ्गकल्पेष्वपि जडवेद्यवर्गेषु विभिन्नतया बुद्धिरेव माया इति। शिवोऽविकारी विद्यते, तथापि स्वशक्तीनां यदा स सङ्कोचं करोति तथा दारिद्र्यादियुक्तत्वाद् अशुभभावमाप्नोति, तदा पुरुष इति तस्य संज्ञेति। अत एव तत्त्वसन्दोहकारो निरूपयति[२]—'स तया परिमितमूर्तिः सङ्कुचितसमस्तशक्तिरेष पुमान्' इति। क्षेमराजैरत्र निरूप्यते—'यदा तु परमेश्वरः पारमेश्वर्या मायाशक्त्या स्वरूपं गृहीत्वा सङ्कुचितग्राहकतामश्नुते, तदा पुरुषसंज्ञा, अयमेव मायामोहितः कर्मबन्धनसंसारी इति'। मायागृहीतसङ्कोचः शिवः पुरुष इति आद्यनाथो वदति। किञ्चित्कर्तृत्वकारणत्वे सति मायात्वं[३] पुरुषस्य लक्षणम्। काश्मीरशैवदर्शने पुरुषस्य अपरं नाम अणुरिति। अस्मिन्मते परमेश्वरस्य बह्व्यः शक्तयो भवन्ति। तत्रापि सर्वकर्तृत्वस्य, सर्वज्ञत्वस्य, तृप्तेः, नित्यत्वस्य, स्वातन्त्र्यस्य च प्रामुख्यं वर्तते। एतत्पञ्चकं शुद्धाशुद्धभेदेन द्विविधम्। परमेश्वरस्य विषयतया शुद्धं जीवविषयतया अशुद्धम्। एताषां शक्तीनां यदा सङ्कोचो भवति, तदा यथाक्रमं कला, विद्या, रागः, कालः, नियतिश्चेति तत्त्वानामुत्पत्तिर्भवति। पुरुषस्य किञ्चित्कर्तृताहेतुत्वं कला यद्वा यया सर्वं कर्तुमसमर्थः किञ्चिदेव घटादिकं करोतीति।

यद्वा किञ्चित्कर्तारममुं कल्पयन्ती कीर्त्यते कला नाम इति [४]सन्दोहकारो निगदति। महेश्वरस्य सर्वज्ञत्वशक्तिः सङ्कुचितीभूय किञ्चिज्ज्ञेयमात्रपरत्वेन ज्ञानोत्पादनाद् विद्यापदवाच्या भवति, विद्यया एव बुद्धिदर्पणे प्रतिफलिता भावा विविच्यन्ते। किञ्चिज्ज्ञताहेतुत्वं विद्याया [५]लक्षणमिति आद्यनाथः। किञ्चिज्ज्ञत्वकारणत्वं विद्या इति माहेश्वराचार्यो वदति[६]। अभिष्वङ्गत्वं रागस्य लक्षणम्। विषयेषु महेश्वरस्य या नित्यता शक्तिः, सा तस्या यदा सङ्कोचो भवति, तदा अण्वादीनां त्रुट्यादिक्रमाभासनस्वरूपः कालतत्त्वम्। यद्वा परिच्छेदकरत्वं[७] कालस्य लक्षणम्। अत एव क्षेमराजो निरूपयति—'कालो हि

---

१. षट्त्रिंशत्तत्त्वसन्दोहः, पृ.सं. ५;
२. तदेव, पृ.सं. ५।
३. अनुत्तरप्रकाशपञ्चाशिका, पृ.सं. ४;
४. षट्त्रिंशत्तत्त्वसन्दोहः, पृ.सं. ६।
५. अनुत्तरप्रकाशपञ्चाशिका, पृ.सं. ४;
६. पराप्रवेशिका, पृ.सं. ९।
७. अनुत्तरप्रकाशपञ्चाशिका, पृ.सं. ४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भावानां भासनाभासनात्मकानां क्रमोऽवच्छेदको भूतादिः'[१]। महेश्वरस्य स्वातन्त्र्यशक्तिरेवास्य परप्रमातुः सङ्कुचत् नियतितत्त्वमर्थात् शिवस्य या स्वातन्त्र्यशक्तिरस्ति तस्य सङ्कोचो भवति। सा च शक्तिर्नियतिं प्राप्नोति। अत एव षट्त्रिंशत्तत्त्वसन्दोहे उक्तम्—

यास्य स्वतन्त्रताख्या शक्तिः सङ्कोचशालिनी सैव।
कृत्याकृत्येष्ववशं नियतममुं नियमयन्त्यभून्नियतिः[२]॥

ममेदं कर्त्तव्यं न इदं कर्त्तव्यमिति नियमेन यद् हेतुस्तन्नियतितत्त्वमिति यद्वा नियतात् कारणात् नियतमेव कार्यं भवति। तस्मिन् कार्ये यत् कारणं तदेव नियतिः। कलाविद्यारागकालनियत्य एताः पञ्च पुरुषस्य स्वरूपस्यावरकत्वात् कञ्चुकमिति पदेनोच्यते। महत्तत्त्वमारभ्य पञ्चमहाभूतानां मूलकारणं प्रकृतितत्त्वम्। सांख्यदर्शने यथा सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः[३], तथैवात्रापि स्वीक्रियते। अत एव महेश्वराचार्यैर्निगद्यते—'सत्त्वरजस्तमसां साम्यावस्था अविभक्तरूपा'[४]।

'प्रकृतिर्गुणसाम्यं स्यादहङ्कारादिजन्मभूः'[५] इति आचार्याद्यनाथ इति। 'सत्त्वादिकसाम्यरूपिणी तु सती। बुद्ध्यादिसामरस्यस्वरूपचितात्मिका मता प्रकृतिः'[६] इत्यपि तस्य स्वरूपमेव निर्वक्ति। यद्वा गुणानामविभागावस्था प्रकृतितत्त्वम्। मूलप्रकृतित एव प्राकृतिकसर्गस्यारम्भो भवति षट्त्रिंशत्तत्त्वसन्दोहकारो वदति यज्जगतो मूलतत्त्वं[७] शिवमारभ्य पञ्चमहाभूतपर्यन्तेषु सर्वेषु प्रमातृवर्गेषु ज्ञानक्रियाशक्ती एव मुख्यमुपकरणं विद्येते। ते सङ्कोचं गृहीतवत्यौ ईश्वरशुद्धविद्ये भवतः, तदपेक्षया सङ्कुचिते विद्याकले अत्यन्तसङ्कुचिते बुद्धीन्द्रियाणि कर्मेन्द्रियाणि च प्राप्नुतः। क्रियायाः सङ्कोचसीम्नि भूतसूक्ष्मादि इति बोध्यम्। पुरुषस्य रजःपरिणामिनी इच्छाशक्तिः अहमिति अभिमानस्वरूपा अहङ्कार इति। इच्छास्य रजोरूपाहङ्कृतिरासीदहंप्रतीतिकरी। यद्वा 'अहं[८] ममेदमित्येतद्बुद्धिहेतुरहङ्कृतिः'

---

१. पराप्रवेशिका, पृ.सं. ९।
२. षट्त्रिंशत्तत्त्वसन्दोहः, पृ.सं. ८, कारिका १२।
३. सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः—सांख्यसूत्रम्।
४. पराप्रवेशिका, पृ.सं. १०;
५. षट्त्रिंशत्तत्त्वसन्दोहः, पृ.सं. ९।
६. तदेव, पृ.सं. १०;
७. तदेव, पृ.सं. ११, कारिकांशः १५।
८. अनुत्तरप्रकाशपञ्चाशिका, पृ.सं. ४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इति आचार्याद्यनाथः। अथवा ममेदं न मम इदमित्यभिमानसाधनत्वमहङ्कारस्य लक्षणम्। बुद्धेः स्वरूपं निरूपयन्नाह सन्दोहकारः—'ज्ञानेऽपि सत्त्वरूपा निर्णयबोधस्य कारणं बुद्धिः'[१] अथवा 'सत्त्वपरिणामिनी ज्ञानशक्तिरेव अर्थाध्यवसायलक्षणा बुद्धिः'। 'बुद्धिरध्यवसायस्य कारणं निश्चयात्मनः'[२] इति अनुत्तरप्रकाशपञ्चाशिकाकारोऽपि वदति। शिवस्य क्रिया तमोमयस्वरूपा विकल्पस्य साधनं मन इति। विकल्पकरणत्वं मनसो लक्षणमिति।

आद्यनाथोऽपि ब्रवीति यत् सङ्कल्पस्य कारणत्वे सति विकल्पस्य कारणत्वं मनसो लक्षणमिति। सङ्कल्पसाधनत्वं मनसो लक्षणमिति क्षेमराजः[३]। सन्दोहकारः प्रतिपादयति यत् शिव एव सङ्कुचितो भूत्वा वामादिपञ्चदेवरूपेण[४] भासते। अतो ज्ञानशक्त्युपरञ्जनप्रधानत्वात् पञ्चज्ञानेन्द्रियाणि क्रियाशक्त्युपाधिप्राधान्यात् कर्मेन्द्रियाणि चोत्पद्यन्त इति। तत्रैव विवरणकारोऽप्याह—'शक्तिपञ्चकोपादानात् करणानां पञ्चधात्वं बोध्यमिति'। यथा न्यायनये ज्ञानेन्द्रियाणां स्वरूपं विद्यते, तथैव शैवदर्शनेऽपि षट्त्रिंशत्तत्त्वसन्दोहदिशा ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां लक्षणमित्थं विद्यते। ज्ञानकरणत्वं ज्ञानेन्द्रियाणां सामान्यं लक्षणम्। क्रियासाधनत्वं कर्मेन्द्रियाणां सामान्यं लक्षणम्। शब्दज्ञानकरणत्वं श्रोत्रस्य लक्षणम्। स्पर्शज्ञानकरणत्वं[५] त्वगिन्द्रियस्य, रूपज्ञानकरणत्वं चक्षुषः, रसज्ञानकरणत्वं रसनायाः, गन्धज्ञानकरणत्वं घ्राणस्य च लक्षणं भवति। एवं वचनक्रियाकरणत्वं वाचः[६], आदानक्रियाकरणत्वं पाणेः, गमनक्रियाकरणत्वं पादस्य, विसर्गक्रियाकरणत्वं पायोः, आनन्दक्रियाकरणत्मुपस्थस्य च लक्षणानि भवन्ति।

एवञ्च[७] गन्धवत्त्वं पृथिव्याः, सांसिद्धिकद्रवत्वं जलस्य, उष्णस्पर्शवत्त्वं तेजसः, अरूपस्पर्शवत्त्वं वायोः, शब्दवत्त्वमाकाशस्य च लक्षणानि शैवदर्शनदिशा बोध्यानि भवन्ति। अत्र तत्त्वानामुत्तरोत्तरं व्याप्यव्यापकभावो

---

१. षट्त्रिंशत्तत्त्वसन्दोहविवरणम्, पृ.सं. १०।

२. अनुत्तरप्रकाशपञ्चाशिका, पृ.सं. ४।

३. षट्त्रिंशत्तत्त्वसन्दोहः, पृ.सं. १०।

४. वामादिपञ्चभेदः स एव सङ्कुचितविग्रहो देवः। ज्ञानक्रियोपरागप्राधान्याद्विविधविषयोऽभूत्॥ (षट्त्रिंशत्तत्त्वसन्दोहः, पृ.सं. ११)

५. श्रोत्रं चक्षुः स्पर्शनजिह्वाघ्राणानि बोधकरणानि। शब्दस्पर्शौ रूपं रसगन्धौ चेति भूतसूक्ष्माणि।

६. श्रोत्रादिकरणवेद्याः शब्दाद्यास्तानि वेदकान्येषाम्। वचनकरी वागासीत् तदेव पाणिः स्यात् करणभूत आदाने (षट्त्रिंशत्तत्त्वसन्दोहः, पृ.सं. १२)।

७. गमनविसर्गानन्दत्रितये पादादिकं करणम्। गन्धवती भूमिः स्यादपि सांसिद्धिकद्रवस्तेजः। (षट्त्रिंशत्तत्त्वसन्दोहः, पृ.सं. १२ 'कारिका २०)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भवति। [१]पृथिवी व्याप्या जलमारभ्य शिवान्तं व्यापकानि पञ्चत्रिंशत्तत्त्वानि। शिवस्य सर्वत्र अनुगतत्वात् पञ्चत्रिंशत्तत्त्वापेक्षया व्यापकमेव तत्त्वम्। जडाजडवर्गाणां तत्त्वानां सृष्टिरस्मिन् दर्शने क्रमतो वा अक्रमतोऽपि भवति। अत एव श्रीमद् राजानकानन्दः कथयति यद्[२] 'अशुद्धे पुनरध्वनि परमेश्वर एव स्वात्मप्रच्छादनक्रीडया अघोरभट्टारकभूमिं मन्त्रमहेश्वररूपां गृहीत्वा दुर्घटसम्पादन-सामर्थ्येन मायाशक्त्या स्वतोऽन्योन्यतश्च भिन्नम् अणूनां भोगभूतये कलादिक्षित्यन्तं जडाजडवर्गं क्रमतोऽक्रमतोऽप्यवभासयति'। अत एव काश्मीरशैवदर्शनस्य सृष्टिक्रमो निरूप्यते—

शिवः
|
शक्तिः
|
सदाशिवः
|
ईश्वरः
|
शुद्धविद्या
|
माया

(सर्वकर्तृत्वम्)	(सर्वज्ञत्वम्)	(तृप्तिः)	(नित्यत्वम्)	(स्वातन्त्र्यम्)
कला	विद्या	रागः	कालः	नियतिः

रागः
|
पुरुषः
|
प्रकृतिः
|
बुद्धिः
|
अहङ्कारः

एकादशेन्द्रियाणि	पञ्चतन्मात्राणि
पञ्च ज्ञानेन्द्रियाणि (श्रोत्रचक्षुःघ्राणरसनात्वगाख्यानि)	(पृथिव्यप्तेजोवाय्वाकाशानि)
पञ्च कर्मेन्द्रियाणि (वाक्पाणिपादपायूपस्थाख्यानि)	
मनः	पञ्चमहाभूतानि

१. षट्त्रिंशत्तत्त्वसन्दोहविवरणम्, पृ.सं. १३, पंक्तिः, ८-९।

२. बोधपञ्चदशिकाकारिका, १२-१३, पृ.सं. ३-४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काश्मीरशैवदर्शने एतेषां तत्त्वानां व्युत्क्रमेण लयो जायते, पुनः एकमेव तत्त्वं शिव एवावशिष्टो भवति। अत एव तत् शिवाद्वयदर्शनशब्देनाभिधीयते। आगमाद् वा गुरोर्यद्वा शास्त्रात् परमेशत्वस्य ज्ञानं वा षट्त्रिंशत्तत्त्वानां ज्ञानं भवति, ततः परमेशत्वस्य प्राप्तिरेव मोक्षः। प्रबुद्धानां पूर्णत्वमेव जीवन्मुक्तिः। अत्र पुरुष एव पशुरिति। शिवः कलादिना कञ्चुकेन आवृतोऽयं शक्तिदारिद्र्यमनुभूय कलादिमुखेनैव स्ववैभवात् प्रतिवितीर्णकिञ्चिदंशः पशु-रित्युच्यते। पुरुषस्यैवापरं नाम अणुसंज्ञेति। स चाणुः किञ्चिदेव कर्तुं समर्थो भवतीति शम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भक्तिप्रपत्त्योः स्वरूपविवेचनम्

डॉ. जयप्रकाशनारायणत्रिपाठी

उपाचार्यः, वेदान्तविभागे

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणस्याम्

***

तत्र सर्वदर्शनानां शेखरायितमुकुटमणिरिव देदीप्यमाने चिदचिद्विशिष्टविशिष्टाद्वैतदर्शने भक्तिर्योगीन्द्राणां परमोपास्या, अस्य शास्त्रस्य मन्थनरूपेणोद्भूता नवनीतसमा भक्तिरत्र पथि साधकपुङ्गवानां सर्वश्रेष्ठा। सा च भक्तिस्तत्र तत्र शास्त्रेषु विविधपक्षरूपेणास्ति किल विवेचिता। सेवार्थकभज्धातोः स्त्रियां क्तिन्प्रत्यये कृते सति भक्तिशब्दो निष्पद्यते[१]। क्तिन्प्रत्ययो भावार्थे करणार्थे वाङ्गीक्रियते। भावे क्तिन्प्रत्यये सति निष्पन्नभक्तिशब्दस्य भजनं सेवनं भक्तिरित्यर्थ आयाति। सेवनञ्च दृढरागतोऽल्परागतोऽरागतो वा सम्भवति। अतोऽस्यां निष्पत्तौ रागस्य प्राधान्यमिति नियमेन वक्तुं न शक्यते। अनया च व्युत्पत्त्या शास्त्रविहितकर्मणां सर्वेषामनुष्ठानं भक्तिशब्देन द्योत्यते। करणे क्तिन् क्रियते चेत्, तर्हि भज्यतेऽनयेति व्युत्पत्त्या प्रीतेः प्राधान्यमायाति, प्रीत्यैव भगवतः सेव्यमानत्वात्। येऽप्रीत्याऽल्पप्रीत्या वा भगवत्सेवनं कुर्वन्ति, तेषां दृढतररागाभावात् सर्वदा सेवनं न सम्भवति। प्राक्तनसंस्कारवशात् म्रियमाणोऽपि गजेन्द्रो भगवन्तं प्रेम्णा स्तौति—

सोऽन्तः सरस्युरुबलेन गृहीत आर्तो
दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम्।
उत्क्षिप्य साम्बुजकरं गिरमाह कृच्छ्रान्
नारायणाखिलगुरो भगवन्नमस्ते[२]॥

प्रीतेः प्राधान्यादेव तैलधारावदविच्छिन्नस्मृतिः सम्भाव्यते। स्वप्नादिष्वपि दृढतररागाद् भगवदनुध्यानसम्भवात्। प्रेमप्रधाना भक्तिरेवानिमित्ता भक्तिरुच्यते। अत एवोच्यते व्यासेन—

---

१. पा.सू. ३/३/९४; २. श्रीमद्भागवते-८/३/३२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे।
कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः[१]॥

उपनिषच्छास्त्रसर्वस्वभूते गीताशास्त्रे च द्वादशाध्याये भक्तियोगस्योपपादनं सम्यग्रूपेण दरीदृश्यते। यद्यप्यत्र कर्मयोगज्ञानयोगसहिता बहवो योगाः सन्ति खलु प्रतिपादिताः, तथापि भक्तियोगं महता समारोहेणोपपादयन् भगवान् श्रीकृष्णोऽर्जुनं प्रति समुपदिशति—

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः[२]॥

एवञ्च बहून्यत्र वचांसि भक्तियोगेनोपदिष्टानि। तथा हि—

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः[३]॥

एवञ्च श्रीमद्भागवते त्रयो योगा भगवत्प्राप्तिसाधनभूता वर्णिताः—

योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया।
ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कश्चन[४]॥

इति ब्रुवता भगवता श्रीकृष्णेन। युज्यतेऽनेनेति योग इति व्युत्पत्त्या योगशब्दो जीवपरमात्मनोर्योगं (मेलनं) बोधयति। ज्ञानमेव योगो ज्ञानयोगः, भक्तिरेव योगो भक्तियोगो कर्म एव योगः कर्मयोग इति च समासः। योगशब्दोऽस्मिन्नर्थे विवक्षितो वर्तते। अत्र ज्ञानपदेन जगदादिकारणभूतस्य ब्रह्मणः शास्त्रप्रतिपादितं ज्ञानं विवक्षितम्। विशिष्टाद्वैतमते परमात्मनोऽज्ञानादेव बन्धः प्रतिपादितः, तज्ज्ञानाच्च मोक्षो भवति। अत्र च—

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्[५]॥

इति वचनमप्यनुकूलम्। भक्त्या भगवन्तं ज्ञात्वा विशत इति कथनेन भगवति प्रवेशात् संसारान्मोक्ष इति सूच्यते। तदनन्तरं विशत इति कथनेन भगवतः

१. श्रीमद्भागवते-१/७/१०;
२. भगवद्गीतायाम्-१२/१७।
३. तत्रैव-१२/२०;
४. श्रीमद्भागवते-११/२०/६।
५. गीता. १८/५५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्त्वज्ञानात् प्राक् न विशत इत्यर्थाल्लभ्यते। अतो भगवतस्तत्त्वज्ञानात् प्राक् संसारो भवतीत्यर्थलाभः स्पष्ट एव भवति।

श्रीमद्भागवत एव ज्ञानस्य कर्मणां भक्तेश्चाधिकारिणो निरूपिताः—

निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु।
तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम्।।

यदृच्छया मत्कथादौ जातश्रद्धश्च यः पुमान्।
न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिजः[१]।।

एतेन ज्ञायते यद् येषां हृदये नित्यं कामना उद्भवन्ति, ते कर्मयोगाधिकारिणः। फलत्यागपुरस्सरं कर्म कुर्वाणाः सिद्धिं प्राप्नुवन्ति जनकादिवत्। ये त्वत्यन्तं विरक्ता इहामुत्रार्थफलभोगविरागवन्तस्तेषां ज्ञानयोगः सिद्धिदः। ये च प्राक्तनसंस्कारवशाद् भगवत्कथादिष्वनुरक्ता नात्यन्तं विरक्ताः, न वाऽत्यन्तमशक्तास्तेषां भक्तियोगः सिद्धिदो भवति। इयञ्च भक्तिः श्रीमद्भागवतेऽविच्छिन्नमनोरागरूपा—

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ[२]।।

लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे[३]।।

श्रीमद्भागवत एतद्वचनात्पूर्वं सात्त्विकराजसतामसवृत्तेः स्वरूपं वर्णितं वर्तते। अविच्छिन्नमनोवृत्तिप्रवाहरूपेयं निर्गुणा भक्तिः। अत एव भगवता पुरत उच्यते—

स एव भक्तियोगाख्यः आत्यन्तिक उदाहृतः।
येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते[४]।।

फलकामनाशून्यैरेवाविच्छिन्नमनोवृत्तिप्रवाहरूपा भक्तिः प्राप्तुं शक्यते। इयञ्च परा भक्तिरुच्यते, ईश्वरकृपया च लभ्यते। पराभक्तिश्च 'योगेश्वर! ततो मे त्वं दर्शयात्मानमव्ययम्'[५] इत्यनेन निरूपिता। तत्रैव च भक्तिशब्दो मुख्यवृत्तिः।

---

१. भागवते-११/२०/७-८;　　२. तत्रैव-३/२९/११।
३. तत्रैव-३/२९/१२;　　४. तत्रैव-३/२९/१४।
५. गीता. ११/४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्तुतिनमस्कारश्रद्धादिषु च भक्तिशब्दो लक्षणया प्रयुज्यते। स्तुत्यादीनि च भक्तिजनकत्वाद् भक्तिसाधनानि साधनभक्तिशब्देनाभिधीयन्ते। परप्रेमरूपाऽविच्छिन्नमन:प्रवाहभूता भक्ति: साध्या भक्तिरुच्यते। न्यायसिद्धाञ्जने निरूपितं यत् शास्त्रेषु ज्ञानवेदनध्यानादिशब्दवाच्यो भक्तिरूपज्ञानविशेष एव मोक्षस्य हेतुरिति[१]। ब्रह्मसूत्रे—'प्रयाणान्तमोङ्कारमभिध्यायीत', 'आवृत्तिरसकृदुपदेशात्'[२] इत्यादिश्रुतिसूत्रैर्वर्णिता मोक्षोपायभूता भक्तिर्विशिष्टाद्वैतमते भगवद्विषयिका परमा प्रीतिरेव।

भक्तिश्च साधनभक्तिफलभक्तिभेदाद् द्विविधा। विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षरूपसप्तसाधनजन्या साधनभक्ति:। फलभक्तिस्त्वीश्वरकृपाजन्या। साधनभक्तिजनकानि विवेकादीनि स्वरूपप्रतिपत्तये निरूप्यन्ते—

(१) विवेक:—तत्र विवेको नाम जात्याश्रयनिमित्ताददुष्टादन्नात्कायशुद्धि:। अन्नस्य दुष्टता त्रिप्रकारिका भवति। दुष्टेनान्नेन मनो दुष्टं भवति, जातिदुष्टमदनीयं लसुनादिकमुच्यते। पतितानामाततायिनामन्नमाश्रयदुष्टमन्नमुच्यते। विजातीयाशुद्धद्रव्यसम्पर्केण मक्षिकादिसम्पर्केण चान्नं निमित्ततो दुष्टमन्नमुच्यते। एतादृशस्यान्नस्य वर्जनेन कायशुद्धिर्भवति, मनश्च शुद्ध्यति। शुद्धे च मनसि भक्तिरुत्पद्यते। तदुक्तं छान्दोग्योपनिषदि—

'आहारशुद्धौ सत्त्वशुद्धि:, सत्त्वशुद्धौ ध्रुवा स्मृति:'[३]। अस्य च वाक्यस्यायमर्थ:—शुद्धाहारस्य ग्रहणेनान्त:करणस्य शुद्धिर्भवति, अन्त:करणस्य शुद्धौ चाविच्छिन्नस्मृतिध्रुवास्मृतिपदवाच्या भवति भक्तिरूपा।

(२) विमोक:—काम्यविषयेष्वासक्त्यभावो विमोक उच्यते। अत एव श्रुतावुच्यते 'शान्त उपासीत'[४]। आसक्त्यभावे कामानामुपशान्तावेव मन: शान्तं भवति। अत: कामाभाव एव मन उपासनयोग्यं भवति।

(३) अभ्यास:—मुमुक्षुजनानां कल्याणानामाश्रयभूतस्य श्रीभगवतो दिव्यमङ्गलविग्रह एव ध्यानस्यालम्बनभूत:। दिव्यविग्रह एव आरम्भणशब्दवाच्य:, तस्य च संशीलनं पुन: पुन: अभ्यासोऽभ्यासपदेनोच्यते। तदुक्तम्—'आरम्भणसंशीलनं पुन: पुन: अभ्यास:'। अत एव गीतायां भगवतोक्तम्—'सदा तद्भावभावित:'[५]।

---

१. न्यायसिद्धाञ्जने, जीवपरिच्छेदे; २. ब्रह्मसूत्रे-४/१/१।
३. छा. उ. ७/२६; ४. तत्रैव-३/१४।
५. गीता. ८/६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(४) क्रिया—स्वशक्त्या पञ्चयज्ञानामनुष्ठानं क्रियोच्यते। पञ्चयज्ञाश्च मनुस्मृतावेवमुक्ताः—

अध्यापनं ब्रह्मयज्ञः पितृयज्ञश्च तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्[१]॥

श्रुतावपि—'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन'[२]। मुण्डकोपनिषदि च—'क्रियावानेष ब्रह्मविदां वरिष्ठः'[३]।

(५) कल्याणम्—सत्यभाषणं मनसा वाचा कायेन च समानरूपेण व्यवहरणमार्जवं जीवेषु दयादानमहिंसा चेति सर्वेषां पालनं कल्याणशब्देनोच्यते। एषाञ्च पालनं मुमुक्षूणां कृत आवश्यकम्। अत एव श्रुतावुच्यते—'सत्येन लभ्यः'[४]। अर्थात् स परमात्मा सत्येन प्राप्यो भवति।

(६) अनवसादः—अनवसादो दैन्याभावः। देशकालयोर्वैपरीत्ये शोकप्रदमृतप्रियादीनां स्मृतावपि अवसादाभावोऽनवसाद उच्यते। अतो मुमुक्षुभिर्दैन्यं परित्यज्य सर्वदा परमात्माऽऽश्रयणीयः। श्रुतावप्युच्यते—'नायमात्मा बलहीनेन लभ्यः'[५]। अस्यार्थः—अवसादग्रस्तो बलहीनः पुरुषः परमात्मानं न प्राप्नोति।

(७) अनुद्धर्षः—देशकालयोरानुकूल्ये सति प्रियवस्तूनां स्मृत्यादौ च सन्तुष्ट्यभावोऽनुद्धर्ष उच्यते। मुमुक्षुर्यदि स्वसम्पत्त्यादिभिः सन्तुष्टो भवति, तर्हि भक्तिविमुखो भवति। अत एव श्रीमद्भागवते कुन्त्योच्यते—

जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान्।
नैवार्हत्यभिधातुं वै त्वामकिञ्चनगोचरम्[६]॥

भक्तेस्त्रीणि पर्वाणि, परभक्तिः, परज्ञानं, परमभक्तिरिति शब्दैरुच्यन्ते।

(१) परभक्तिः—प्रीतिरूपतामापन्नो दर्शनसमानाकारो मोक्षकारणभूतः स्मृतिसन्तान एव परभक्तिरुच्यते।

(२) परज्ञानम्—श्रीभगवतः परिपूर्णसाक्षात्कार एव परज्ञानमुच्यते। स च साक्षात्कारः प्रेममयभगवद्ध्यानादत्युत्कण्ठायुक्तादीश्वरकृपातो भवति। अत्र चात्युत्कण्ठायुक्तस्य भक्तस्य पुनः पुनः प्रार्थनं कारणं भवति।

---

१. मनु.स्मृ.-३/७०; २. बृ. उ.-६/४/२२।
३. मु. उ.-३/१/४; ४. तत्रैव-३/१/५।
५. तत्रैव-३/२/४; ६. भागवते-१/८/२६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(३) परमभक्तिः—परमभोगस्य श्रीभगवतः साक्षात्कारानन्तरं भगवतः प्राप्तये योत्कण्ठा भवति, सैव परमभक्तिरुच्यते। परमभक्तिरेव श्रीभगवतः साक्षात् प्राप्तिकारणं भवति। इयं त्रिपर्वा भक्तिः प्रपत्तेरङ्गभूता भवति।

श्रीमद्भागवते नवधा भक्तिर्वर्णिता—

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्[१]।।

इति वदता प्रह्लादेन। तत्र श्रवणं नाम भगवद्गुणगाथायाः श्रवणम्। सा च सर्वधर्मेभ्यो गरीयसी। यतो हि परमात्मनो गुणानुवादश्रवणेन तत्प्राप्तिरवश्यं भवति। अत एवोच्यते भागवतमाहात्म्ये—

श्रवणं सर्वधर्मेभ्यो वरमन्ये तपोधनाः।
वैकुण्ठस्थो यतः कृष्णः श्रवणादेव लभ्यते[२]।।

दुर्वृत्तोऽजामिलस्तु नारायणशब्दोच्चारणेनैव यमपाशाद् विमुक्तः। तदुक्तम्—

अशेषसंक्लेशशुभं विधत्ते गुणानुवादश्रवणं मुरारेः।
कुतः पुनस्तच्चरणारविन्दपरागसेवारतिरात्मलब्धा[३]।।

कीर्तनं नाम तारस्वरेण भगवच्चरित्रकीर्तनम्। कीर्तनेन च भगवत्प्राप्तिः। उच्यते च श्रीमद्भागवते—

सङ्कीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसः।
प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्को भ्रमिवातिवातः।।

इत्थं हरेर्भगवतो रुचिरावतारवीर्याणि बालचरितानि च शन्तमानि।
अन्यत्र चेह च श्रुतानि गृणन् मनुष्यो शक्तिं परापरमहंसगतौ लभेत[४]।।

श्रीमद्भगवद्गीतायां तु कीर्तनासक्तो भक्तः सर्वश्रेष्ठोऽभिहितः—

य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः[५]।।

---

१. श्रीमद्भागवते-७/५/२३; २. तत्रैव-६/७६।
३. तत्रैव-३/७/१४; ४. तत्रैव-११/३१/२८।
५. श्रीमद्भगवद्गीता-१८/६८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः।
भविता न च मे तस्मादन्यः प्रियतरो भुवि[१]॥

भगवतश्चरितस्य चरणारविन्दयोश्च स्मरणात्मिका भक्तिः स्मरणभक्तिः, कल्याणकारिणी उक्ता भागवते—

अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि शमं तनोति च।
सत्त्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तम्[२]॥

विष्णुसहस्रनामस्तोत्रे तु स्मरणस्य माहात्म्यमुक्तम्—

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात्।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे[३]॥

गीतायामपि स्मरणभक्तेर्भगवत्प्रापकत्वमुक्तम्—

अनन्यचेताः सततं यो मां स्मरति नित्यशः।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः[४]॥

पादसेवनं नाम भगवत्परिचर्या। तस्या माहात्म्यमुक्तं भागवते—

यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः।
सद्यः क्षिणोत्यन्वहमेधती सती यथा पदाङ्गुष्ठविनिःसृता सरित्[५]॥

धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः।
एकमेव हरेस्तत्र कारणं पादसेवनम्[६]॥

अर्चनं नाम पूजा। पाषाणादिनिर्मिताया भगवन्मूर्तेः पूजनमर्चनभक्तिः। तस्या माहात्म्यमुक्तं भागवते—

श्रीविष्णोरर्चनं ये तु प्रकुर्वन्ति नरा भुवि।
ते यान्ति शाश्वतं विष्णोरानन्दं परमं पदम्॥

वन्दनं नाम स्तुतिपुरस्सरं नमस्क्रिया। यथा श्रीमद्भागवते श्रीकृष्णजन्मप्रसङ्गेऽन्यत्रापि च नमस्क्रियाः स्तुतयश्च दृश्यन्ते—

---

१. गीतायाम्-१८/६९;
२. भागवते-१२/१२/५४।
३. विष्णुसहस्रनामस्तोत्रे;
४. गीतायाम्-८/१४।
५. भागवते-४/२/३१;
६. तत्रैव-४/८/४१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितञ्च सत्ये।
सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः[१]॥

दास्यं नाम कर्मसमर्पणम्। दासृ-दाने-धातोः दासशब्दो निष्पद्यते, दासते ददातीति दासः। भगवद्भक्तस्याकिञ्चनत्वात् त्यक्तसर्वविभवत्वात् स्वीयं मन एव ददाति, अतस्त्यक्तसर्वैषणस्य फलेच्छाया अभावात् सर्वकर्मार्पणं दास्यमिति सूचितं भवति। अत एव गीतायामुच्यते भगवता—

यत्करोषि यदश्नासि यज्जुहोसि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्[२]॥

सख्यं नाम तद्विश्वासादिः (इति श्रीधरस्वामी)। अत्र भगवत्सखिरूपेण भक्तहृदये मधुरस्य प्रेम्णो विकासो जायते। सख्यभक्तिर्नन्दगोपादीनां वर्तते। अत एवोक्तं भागवते—

अहो भाग्यमहोभाग्यं नन्दगोपव्रजौकसाम्।
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम्[३]॥

आत्मनिवेदनम्—स्वशरीरसमर्पणम्। यथा विक्रीतस्य गवाश्वादेर्भरण-पालनादिचिन्ता न क्रियते, तथैव तस्मै देहं समर्प्य देहविषयकरक्षणपोषणचिन्तावर्जनमात्मनिवेदनम् इति श्रीधरस्वामी। एवं भगवत्यात्मसर्वस्वसमर्पणमात्मनिवेदनभक्तिः। आत्मनिवेदनद्वारा भक्तानां शारीरिकी वाचनिकी मानसी च सर्वाश्चेष्टा भगवद्भावमय्यो भवन्ति। भक्तः स्वीयं सर्वं वस्तुजातं भगवदर्थं मनुते। अत एवोक्तं श्रीमद्भागवते—

स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने।
करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये[४]॥
घ्राणञ्च तत्पादसरोजसौरभे श्रीमत्तुलस्यां रसनां सदर्पिते।
पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिनन्दने[५]॥

एवं वर्णितासु नवविधास्वासु भक्तिष्वेकाऽपि विधा यस्य वर्तते, स भक्तो भगवन्तमाप्नोति, संसारार्णवञ्चोत्तरति। प्रह्लादादिषु च सर्वा अपि विधा दृश्यन्ते,

---

१. श्रीमद्भागवते-१०/२/२६; २. गीतायाम्-९/२७।
३. श्रीमद्भागवते-१०/४/३३; ४. तत्रैव-९/४/१८।
५. तत्रैव-९/४/१९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अतस्तेषामुद्धारादिविषये नैव शङ्कनीयम्। पद्मपुराणे च भगवद्भक्तियुक्तानां भक्तानामेवं माहात्म्यं वर्णितं वर्तते—

निखिलभुवनमध्ये निर्धनास्तेऽपि धन्या
निवसति हृदि येषां श्रीहरेर्भक्तिरेषा।
हरिरपि निजलोकं सर्वथातो विहाय
प्रविशति हृदि तेषां भक्तिसूत्रोपनद्धः[१]॥

प्र उपसर्गपूर्वकात् पद्-गताविति धातोर्भावे क्तिन्प्रत्यये कृते सति प्रपत्तिशब्दस्य निष्पत्तिर्भवति, सर्वे गत्यर्था इति सिद्धान्तात्। पद्धातोः ज्ञानार्थकत्वात् प्रपत्तिशब्देन प्रकृष्टस्य निश्चयात्मकस्य ज्ञानस्य बोधो भवति। प्रपत्तेः स्वरूपं यतीन्द्रमतदीपिकायामुक्तम्—न्यासविद्या प्रपत्तिः[२]। सा च—

अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम्।
तदेकोपायता याच्ञा प्रपत्तिश्शरणागतिः[३]॥

प्रपत्तेश्चाङ्गपञ्चकमुच्यते—

आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम्।
रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा॥
आत्मनिक्षेपकार्पण्यम्............॥ इति।

एतदङ्गपञ्चकयुक्ता प्रपत्तिरेतद्देहावसाने मोक्षप्रदा। अन्तिमप्रत्ययनिरपेक्षा सकृत्कर्तव्या न्यासश्शरणागतिरित्यादिशब्दवाच्या ज्ञानविशेषरूपा।

भगवान् सदा ममानुकूलो भवेदिति सङ्कल्पनं सर्वदा चिन्तनमानुकूल्यस्य सङ्कल्प उच्यते। भगवान् कदापि प्रतिकूलतां न भजेदित्येवंरूपेण चिन्तनं प्रातिकूल्यस्य वर्जनस्य सङ्कल्पः। श्रीभगवानवश्यमेव मां रक्षिष्यतीति विश्वासो रक्षणस्य विश्वासः। अस्य विश्वासस्य फलमर्जुनेन महाभारतयुद्धे लब्धमिति स्वयमेवोच्यते तेन—

---

१. पद्मपुराणे-३७/३।
२. यतीन्द्रमतदीपिका, पृ. १५४।
३. प्रसन्नपारिजाते, स्वरूपपद्धतिः-२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यद्दोष्णिषु मा प्रणिहितं गुरुभीष्मकर्णद्रौणिं त्रिगर्तशलसैन्धवबाह्लिकाद्यैः।
अस्त्राण्यमोघमहिमानि निरूपितानि नो पस्पृशुर्नृहरिदासमिवासुराणि[१]॥

सौत्ये वृतः कुमतिनाऽऽत्मद ईश्वरो मे यत्पादपद्ममभवाय भजन्ति भव्याः।
मां श्रान्तवाहमरयो रथिनो भुविष्ठं न प्राहरन्यदनुभावनिरस्तचित्ताः[२]॥

स्पष्टमेवार्जुनो वक्ति यद् यथा नरहरिदासस्य प्रह्लादस्योपरि असुराणामस्त्राणि निष्फलान्यभूवन्, तथैव ममाप्युपरि द्रोणादीनामस्त्राणि निष्फलान्यभूवन्। श्रीभगवानेवैको रक्षक इत्येवंरूपो द्रढीयान् विश्वासः। भगवतो गोप्तृत्वेन वरणं रक्षितृत्वेन स्वीकरणं भवति। प्रह्लादस्य द्रढीयसा विश्वासेनावर्जितो विष्णुर्नृसिंहरूपेण स्तम्भादवततार। तदुक्तं भागवते—

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः।
अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम्[३]॥

श्रीभगवतो रक्षकत्वं स्वीकृत्य स्वस्य तस्मिन् समर्पणं दैन्यप्रदर्शनञ्चात्मनिक्षेपकार्पण्यशब्देनोच्यते। आत्मनिवेदनरूपा नवमी भक्तिरियमेव। एतेन ज्ञायते यद् भक्तेः पराकाष्ठा प्रपत्तिरेव। प्रपत्तेरेवं माहात्म्यमूरीचकार भगवान् रामः। अत एव तैरुच्यते—

सकृदेव प्रपन्नाय तवास्मीति च याचते।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम[४]॥

'शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्'[५] इति शब्दोच्चारणपूर्वकप्रपत्तिङ्गताय सुहृदेऽर्जुनाय शिष्यभूताय गीतामृतमुपायनीकुर्वाणो भगवान् श्रीकृष्णः प्रपत्तिफलं दर्शयन् वक्ति—

'कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति'[६]॥ इति।

●

१. भागवते-१/१५/१६;　　२. तत्रैव-१/१५/१७।
३. तत्रैव-७/८/१८;　　४. वाल्मीकिरामायणम्-८.३३।
५. गीतायाम्-२/७;　　६. तत्रैव-९/३१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्राच्यदृष्ट्या भूगर्भशास्त्रस्य समीक्षणम्

डॉ. सदानन्दशुक्लः
उपाचार्यः, ज्यौतिषविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणस्याम्

❋❋❋

"ॐ पुरुष एवेदं सर्व्वं यद्भूतं यच्च भाव्यम्"[1]।

इति यजुर्वेदोक्तपुरुषसूक्तमन्त्रानुसारेण इदं-तत्त्वेन दृश्यमानं कृत्स्नं जगत् पुरुषरूपमेव। तस्मात् श्रीमद्भागवतस्य पञ्चमस्कन्धान्तर्गतषड्विंशाऽध्याये चत्वारिंशश्लोके—

भूद्वीपवर्षसरिदनिद्रनभःसमुद्रपातालदिङ्नरकभागणलोकसंस्था ।
गीता मया तव नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम ।।

इत्युक्त्या यत्किञ्चिद् दृश्यते तत्सर्वं भगवतः स्थूलं वपुरिति निश्चितम्। तत्र रचनाप्रकारस्तु आत्मनः सकाशादाकाशः सम्भूतः, आकाशाद् वायुः वायोरग्निः, अग्नेरापः, अद्भ्यः पृथ्वी, पृथिव्या औषधयः, इत्यादिक्रमोऽद्वैतवेदान्तनये। तत्र पञ्चीकरणप्रक्रियामादायैव महाभूतानां सृष्टिः स्वीक्रियते[2]।

सांख्यनये तु प्रकृतेर्महान्, ततोऽहङ्कारः, तस्मात् पञ्चतन्मात्राणि, एकादश इन्द्रियाणि मनांसि च, पञ्चतन्मात्राभ्यः पञ्चमहाभूतानि पञ्चकर्मेन्द्रियाणि एतानि सर्वाणि चित्संयोगाद् जायन्ते। प्रकृतिस्तु जडरूपा अव्यक्तपदेनोच्यते। महदादयस्तु सप्त प्रकृतिविकृतिपदेन गृह्यन्ते। पञ्चज्ञानेन्द्रियपञ्चकर्मेन्द्रियाणि मनः पञ्चमहाभूतानि च विकृतिपदेन गृह्यन्ते। पुरुषस्तु प्रकृतिविकृतिभिन्नः। पुरुषसंयोगाद् एतेषां समुत्पत्तिः। उपासनाजगति प्रकृतिश्चिन्मयी; किन्तु सांख्यनये सा जडरूपा[3]।

आधुनिकनये तु प्रकृतिर्जडरूपैव तेषां विभिन्नपदार्थानां साहचर्यात् सृष्टिः सञ्जायते, तेनैव चैतन्योत्पत्तिः। केषाञ्चित् मते चैतन्यस्य विभिन्नसत्ता स्वीक्रियते।

---

१. पुरुषसूक्तस्य द्वितीयो मन्त्रः।
२. श्रीमद्भागवते-५.२६.२४।
३. सांख्यकारिकायां तृतीयश्लोकात् सप्तमश्लोकं यावत्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्र विचारसरण्यां प्राच्यमते सृष्टेः क्रमिकविकासे आत्मनः सकाशाद् आकाशस्योत्पत्तौ ब्रह्माण्डगोलके अवस्थितचैतन्यस्य विकासव्यवस्थायां विराड्रूपत्वात्[१] 'स एकाकी नारमत', 'बहु प्रजायेयेति स्याम'[२] इति इच्छाशक्त्या सङ्कल्पाद् वा सृष्टिः समुद्भूता। तत्र प्रथममाकाशपरमाणूनां संयोगाद् आकाशस्य रचना, ततस्तस्मिन् शून्ये वायुपरमाणूनां संयोगाद् वायो सृष्टिः, तत्र वायुप्रचलनवेगात् तैजसपरमाणूनां संयोगात् तेजसः प्रादुर्भावः, तदनन्तरं जलीयपरमाणूनां वाष्पीकरणात् तेषां संयोगाद् जलोद्गमः, ततस्तस्य दार्ढ्यात् पृथ्वीपरमाणूनां संयोगात् पृथिव्या उद्गमोऽभवत्[३]।

किन्तु जलस्य प्राचुर्याद् भूभागस्य तस्मिन् जले निमज्जनाद् आधाराभावाद् भुवि स्थितानां जनानां प्रादुर्भावासम्भवात् तेन परमात्मना क्रोडरूपं धृत्वा जलान्तरे गत्वा समुद्राधस्ताद् स्वकीयस्थूणाग्रेण तत्र स्थितां मृत्तिकामुद्धृत्य सा समुद्रस्य एकस्मिन् स्थले स्थापिता; किन्तु तेन कार्येण आधारप्राप्तावपि न तत्र योगक्षेमौ भवत इति विचार्य पृथ्ववतरं धृत्वा तेषु समतलीकरणेन नगरग्रामकृषियोग्यता च सम्पादिता। अत एव प्रथनात् पृथ्वी, धारणाद् धरा धात्री वा निगद्यते। तेन प्राच्यवाङ्मये समतलरूपा पृथ्वी निगद्यते। **आधुनिकास्तु** तस्या अण्डाकारतां स्वीकृत्य उपरि अधोभागे च समतलत्वं मन्यन्ते। प्राच्यवाङ्मयेऽपि प्रथमं क्रोडरूपेण (वाराहरूपेण) भगवता समुद्रादुद्धृत्य पृथ्व्याः संस्थापनात् तस्यास्तदेव रूपं भवति। किञ्च अस्माकं वाङ्मयेऽपि न केवलं पृथिव्याः; अपि तु विश्वस्य ब्रह्माण्डसंज्ञादानात् तस्य अण्डाकारत्वं सुस्पष्टम्।

आधुनिकनये अस्मिन् ब्रह्माण्डे सौरग्रहान्तर्गत एव पृथिव्या ग्रहणम्। अतो ग्रहरूपेण अस्यापि ग्रहणं भवति। इयं तु पूर्वं सूर्यमण्डलवत् तप्ताङ्गाररूपा, एवं कालक्रमेण अस्याः शैत्ये समायाते सति अस्माकं स्थितियोग्यता समायाता। अस्माकं नये तु भूगोलखगोलयोर्मध्ये योजकसूत्रमन्तरिक्षम्; किन्तु **आधुनिकनये** तु अन्तरिक्षभागोऽपि भूभाग एव। अयं भागः पृथिव्या बहिर्भागः। ततः परं पृथिव्याः कठिनभागः, यस्योपरि अस्माकं स्थितिः। अयं भागः ३० किलोमीटरतः ३५ किलोमीटरपरिमाणं यावद् अधो विद्यते। तत्र मध्ये मध्ये जलस्रोत आदिकमपि वर्तते। एतेषां

---

१. तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यां प्रथमानुवाकेऽस्ति।

२. तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यां षष्ठेऽनुवाके।

३. अद्वैतवेदान्तनये प्रथममपञ्चीकृततन्मात्राणां सृष्टिः, ततः पञ्चीकरणप्रक्रियया पञ्चमहाभूतानां सृष्टिः। वैशेषिकन्यायदृशा तु परमाणूनां संयोगात् सृष्टिः। तत्तु ईश्वरसङ्कल्पवशादिति भेदः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्थितिर्न सामान्यक्रमेण; अपि त्वावरणक्रमेण भाषायां 'परत दर परत'-रूपेण कथ्यते। ततः परं २९०० किलोमीटरं यावद् द्रवीभूतभागः, अतीवतप्ताङ्गारवत्, ततः १३७० किलोमीटरं यावत् तप्तलौहवद् घनत्वभागोऽतीवकठिनः, अनेनैव चुम्बकीयधर्मेण युक्तत्वात् पृथिव्या गुरुत्वाकर्षणम्। प्रोटीन-लौह-स्वर्ण-रजत-जस्ता-प्रभृत्यष्टोत्तर-संख्याकवस्तूनां पृथिव्यामाक्सीजनादीनाञ्च समावेशः।

भवतु नाम **प्रतीच्यानामाधुनिकानां वा एषा दृष्टिः;** किन्तु विचारसरण्यां भारतीयवाङ्मयात् प्रायो न भेदः। यतो हि तेजसः कार्यपरिणाम एव पृथिवी। अतः पूर्वमस्या अङ्गारावृतत्वरूपस्वीकृतौ न क्षतिः। तेजसः प्रभावाद् जलरूपत्वम्, जलरूपत्वे सति शैत्याधिक्यम्, शैत्याधिक्यात् तस्याः काठिन्ये अद्भ्यः पृथिवीति कथने न सङ्कोचः। **इत्थमुभयनये पृथ्वीसंरचनाप्रकारे ज्ञाते सति कस्मिन् भूभागे केषां जीवानामवस्थितिः**, केषामौषधीनामवस्थितिः, कदा चावस्थितिः, अधोभागे च पृथिव्यामधस्ताच्च केषां द्रव्यानां सम्प्राप्तिरित्यादिविचारः प्रस्तूयते।

पृथिव्या गुरुत्वाकर्षणता ६४०० किलोमीटरपर्यन्तम्। तत्र २५० किलोमीटरं यावद् जीवनाधायकवायुमण्डलम्। यद्यपि एते अन्तरिक्ष एव; किन्तु पार्थिवचुम्बकीयशक्त्या प्रभावितत्वात् केषाञ्चन मते अयं भागः पार्थिवभागोऽपि निगद्यते। यथार्थतया तु धरातलात् शून्यमण्डले पृथिव्या अधस्तात् ३५ किलोमीटरतोऽधोभागे २९०० किलोमीटरं यावद् या दूरता, तत्र २५० किलोमीटरं यावत् शिलांशः, २५० कि.मी. अधस्तात्तु केवलं तरलांशः। ततः परं १३०० कि.मी. यावद् अतिकठिनोऽयस्कांशः (लौहः) अग्निरूपश्चुम्बकीयशक्तिसम्पन्नः। यावन्ति कठिनानि द्रव्याणि खननक्रियया लभ्यन्ते, तानि सर्वाणि पृथिव्या अधस्तात् ३५ कि.मी. यावदेव। एतानि सर्वाणि द्रव्याणि रासायनिकसम्मिश्रणात् तथा उष्मवशाद् अखण्डसीमभ्यः परिवृतानि तिष्ठन्ति। तेषां कठिनावरणानां स्थौल्याद् निर्भिद्य ते पदार्थास्तत्स्थलं विहाय अन्यत्र गन्तुं समर्था न भवन्ति।

तत्र भूण्डले विभिन्नभूभागे भिन्नजलवायुप्रभावाद् भिन्न-भिन्नप्राकृतिकजीवानां फलपुष्पौषधीनां पदार्थानाञ्चावस्थितिर्भवति। तत्र यस्मिन् भागे यस्य भूभागस्य स्वकक्षातो परिभ्रमणक्रमे सूर्यरश्मिभिर्विशेषेण सम्पर्को जायते, तत्र औष्ण्यम्, यत्र च विशेषसम्पर्काभावस्तत्र शैत्यम्। एवमेव विभिन्ने अक्षांशे भिन्न-भिन्नसूर्यकिरणानां तीव्रन्यूनकालिककिरणसम्पर्काद् जलवायु-परिवर्तनद्वारा ऋतुपरिवर्तनम्। तत्र विभिन्नर्तुषु विभिन्नौषधीनां फलानाञ्च तस्मिन् भूभागे समुत्पत्तिर्भवति। बहुस्थलेषु सदा सूर्यकिरणानां विशेषेण सम्पर्काभावाद्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अतीवशैत्यम्, बहुषु स्थलेषु विशेषसम्पर्काभावात् तीव्रौष्ण्यम्, समुद्रतटीयस्थलेषु जलस्य विलम्बेन औष्ण्याधानात् शैत्याधानाच्च तत्रत्यतटवर्तिप्रदेशेषु समशीतोष्णत्वम्। अत उष्णप्रधानस्थले उष्मप्रधानवस्तूनां सङ्ग्रहः, शैत्यप्रधानस्थले शैत्यप्रधानवस्तूनां समुत्पत्तिः, समशीतोष्णस्थले तथाविधवस्तूनामुपलब्धिर्भवति[1]।

किञ्च एतेषां वस्तूनां समुत्पत्तौ न केवलं जलवायुः कारणम्; अपि तु तत्तत्स्थलानां मृद्गुणानामपि कारणत्वमवधार्यम्। कुत्रचित् कृष्णा मृत्तिका, कुत्रचित् श्वेता, कुत्रचित् सिकताप्रधाना, कुत्रचित् सम्मिलिता, कुत्रचिच्च प्रस्तरखण्डोपेता, तत्र विभिन्नस्थलीयमृत्तिकासु विभिन्नगुणावधारणाद् विभिन्नस्थलेषु स्वप्रकृत्यनुसारेण भिन्न-भिन्नवस्तूनां समुत्पत्तिः सञ्जायते। यथा सरसमृत्तिकाप्रधानक्षेत्रेषु गोधूमादीनामन्नानामाम्रादिफलानां हरितशाकादीनां चोत्पत्तिः। सिकताप्रधानक्षेत्रे उर्वारुक-(खरबूज) पटोल-(परवल) कन्दजातीनां (आलू, सकरकन्द) समुद्रतटीयभागे नारिकेलतालखर्जूराणां विशेषेण समुत्पत्तिः। एवमेव विभिन्नस्थलीयजलवायु-मृद्गुणवशाच्च विभिन्नजीवानां फलपुष्पशाकानां प्रादुर्भावो भवति। तेषां गुणेष्वपि तेनैव कारणेन वैषम्यं परिलक्ष्यते। शारीरिकसंरचनायामपि भौगोलिककारणस्य सापेक्षता दरीदृश्यते। अत एव भिन्न-भिंन्न-भागेषूत्पन्नानां जनानां पशुपक्षिणां फलपुष्पादीनाञ्च नैकरूपता।

इत्थं धरातलोपरिभागे यथा जलवायुवशाद् मृद्गुणवशाद् भिन्न-भिन्नस्थलेषु भिन्न-भिन्नजीवानां फलपुष्पशाकान्नानामन्येषां च वस्तूनां समुत्पत्तिर्भवति। एवमेव पृथिव्या अधस्तादपि तत्तत्स्थलेषु तत्रत्यप्रकृतिप्रभावात् पृथिव्या अधःस्थले भिन्न-भिन्नरासायनिकद्रव्यपञ्चमहाभूतसम्मिश्रणवशाद् भिन्न-भिन्नपदार्थानां द्रव्याणां वा लाभो जायते। तत्रत्यप्रकृतिमादायैव भूकम्पनव्यवस्था परिलक्ष्यते। पृथिव्या अधःस्थले उष्माधिक्यात् तत्रत्यजलस्रोतस्सु उत्पन्नवाष्पाणां ऊर्ध्वाभिमुखगमनक्रमे सङ्क्षोभो जायते, तदा भूकम्पनं भवति[2]।

एतत्परकव्याख्यानमेव सिद्धान्तशिरोमणिग्रन्थेऽपि संलक्ष्यते—

पाषाणैः कठिना भूमिर्यत्र तत्र कुरुते बलात्।
वाष्पनिःसरणात्कम्पः शब्दोऽपि सततं भुवि[3]॥

यद्यपि पुराणेषु शेषशिरसि पृथिव्या अवधारणं निगदितम्, तस्य शिरःकम्पने भूसञ्चलनं निरूपितम्; किन्तु तथा सति सम्पूर्णभूमण्डलस्य कम्पनं

१. अर्वाचीनं ज्योतिर्विज्ञानम्।

२. साम्प्रतिकप्रत्यक्षानुभवसिद्धप्रमाणात्।

३. सिद्धान्ततत्त्वविवेकस्य प्रथमभागे, श्लोक-सं. २०६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्यान्नैकदेशस्य। अत एव शेषशिरसि धरावधारणं तु रूपकमात्रम्। यथा शून्ये ग्रहाः स्वकीयचुम्बकीयशक्त्या स्वकक्षे विद्यमानाः परिभ्रमन्ति, तथैवेयं पृथिवी अपि बोध्या। शेषपदेन तु परब्रह्मणो ग्रहणम्। एतत् सर्वं भारतीयवाङ्मयानुसारेण परब्रह्मणो स्थूलं वपुरिति पूर्वमेव निरूपितम्।

'अहमन्नम्, अहमन्नम्, अहमन्नम्, अहमन्नादाः, अहमन्नादाः, अहमन्नादाः' इत्यनेन भोगभोक्तृभयात्मकं ब्रह्म एव संसूच्यते। तथा सति भगवान् क्व प्रतिष्ठित इति प्रश्ने स्वे महिम्नीत्युत्तरात्। परब्रह्मणः स्वे महिम्नि प्रतिष्ठितत्वाद् इदं-तत्त्वेन दृश्यमानं कृत्स्नं जगद् अन्याधारं विहाय स्वे महिम्नि एव तिष्ठति, तदेव स्वशक्तिबलेन स्वकीयचुम्बकीयशक्तिबलेन वा **इदानीन्तनाः स्वीकुर्वन्तीति प्राच्यप्रतीच्यविचारे समीक्षात्मकदृष्ट्या** भाषामात्रजनितभेदोपकथनमथवा भेदाभावमात्रम्। याथार्थ्येन तु न कश्चन भेदः।

उपर्युक्तविचारसरणौ भूकम्पज्ञानेन निश्चितं यत् पृथिव्या अधस्तादपि भौगोलिकजलवायुप्रभावो भवति—

एक एवाग्नेर्बहुधा समिद्ध एकः सूर्यो विश्वमनुप्रभूतः।
एकैवोषा सर्वमिदं विभाति॥ (ऋ. सं. ८/५८/२)

इत्युक्त्या सूर्यस्य एकात्मकत्वं निरूपितम्। तस्या द्वादशात्मकत्वं तु राशिसञ्चारवशाद् बोध्यम्। सूर्योदयसूर्यास्तव्यवस्थापि भूभागस्य परिभ्रमणात् सूर्यस्य वैषम्याद्वा बोध्या। अत एव—

'स वा एष न कदाचनास्तमेति नोदेति तं यदस्तमेतीति मन्यन्तेऽह्न एव तदन्तमित्यात्मानं विपर्यस्ते रात्रिमेवावस्तात् कुरुतेह परस्तादथ यदेनं प्रातरुदेतीति मन्यन्ते' इति ऐतरेयब्राह्मणे निरूपितम्[१]।

मन्त्रेणानेन पृथिव्या निराधारे स्थितिर्गोलवृत्तत्वं च प्रतिपादितम्। एवमेव—

आ प्रा रजांसि दिव्यानि पार्थिवाः श्लोकं देवः कृणुते स्वाधर्मणे।
प्रबाहू अस्राक् सविता सवीमनि निवेशयन् प्रसुवन्नक्तुभिर्जगत्॥
(ऋ.सं. ४/५३/३)

इति मन्त्रेष्वपि एतत्प्रकारभावो लक्ष्यते। ज्योतिषसिद्धान्तग्रन्थे द्वितीयाऽऽर्य-भट्टस्य षोडशाध्याये निगदितम्—

'निजनिजकर्मविपाकैः-------गगने स्वशक्तैः'।

---

१. तदन्तमित्यात्मानं विपर्यस्तेऽहरेवावस्तात् कुरुते रात्रीं परस्तात् स वा एष न कदाचन निम्नोद्यति। (ऐ.ब्रा. १४/६)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इति प्रमाणरूपेण उपस्थापितश्लोकद्वारा वसुन्धराया निराधारत्वप्रतिपादनं संसूचितम्। पृथिव्यामाकर्षणशक्तिर्विद्यत इति विषयमवलम्ब्य तत्रैव—

'आकृष्य शक्तिश्च मही------भाति' इति भास्कराचार्योक्तवचनं निरूपितम्। कमलाकरोक्तसिद्धान्ततत्त्वविवेके मध्यमाधिकारे श्लोक-सं. २०० क्रमे निरूप्यते। यदा अग्न्यम्बुवायुप्रभवा वाष्पा भूपृष्ठाद् गगनं प्रयान्ति, तदा इन्द्रचापरूपं सम्भाव्यते, मानञ्चात्र—

अग्न्यम्बुवायुप्रभवाः सदोर्ध्वं---वाष्पा कुपृष्ठाद् गगनं प्रयान्ति।

बृहत्संहितायामपि ३६ अध्याये चतुस्त्रिंशेऽध्याये च निरूपितम्।

सूर्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः साभ्रे।
वियति धनुःसंस्थाना ये दृश्यन्ते तदिन्द्रधनुः॥

एवमेव अनिष्टफलदाः केतवो गगनमण्डले मेघा भूकम्पनं महामारी उल्कापातादयश्च भूमिपिण्डाद् निर्गताद् वाष्पादेव जायन्ते। सिद्धान्ततत्त्वविवेकस्य प्रथमभागे—

ये केतवोऽरिष्टफलप्रदाः खे, अम्बुदाश्च भूकम्पश्च इहास्ति लोके।
मारी महाख्या करकाप्रपाताद्यं सर्वमित्थं किल वाष्पोऽत्र॥

वाष्पादेव अग्निकणसन्निधानाद् भूमितद्गन्धकादिपरागास्ताारूपाः सुगोलकाग्निकणाश्च यदा ऊर्ध्वं निःसरन्ति, तदा उल्कापदेन तस्य प्रयोगो भवति। यथा—

यदि वेतसोऽम्बुरहिते देशे हस्तैस्त्रिभिस्ततः पश्चात्।
सार्धे पुरुषे तोयं वहति शिरा पश्चिमा तत्र॥
चिह्नमपि चार्धपुरुषे मण्डूकः पाण्डरोऽथ मृत्पीता।
पुटभेदकश्च तस्मिन् पाषाणो भवति तोयमधः॥

(बृ.सं. दकार्गलाध्याये ५-६ श्लोकौ)

अस्माकं प्राच्यवाङ्मयान्तर्गतं बृहत्संहितायां भूगर्भे कुत्र जलं विद्यते, कियति दूरे वा जलं विद्यते, कुत्र स्वादु जलं, कुत्र अस्वादु जलं वा—एतत् सर्वं विस्तृतरूपेण समाहितम्।

यथा—अम्बुरहिते जलवर्जिते देशे अरण्यादिस्थले कुत्र जलमस्ति येन जीवननिर्वाहो भवेदिति जिज्ञासायां सत्यां खातस्थले अर्धपुरुषमितखनने सति पाण्डुवर्णकमण्डूकप्राप्तौ तदनन्तरं पीतवर्णा यदि मृत्तिका स्यात्तदा मृतिकाधः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रथमं पाषाणखण्डो भवति, तदनन्तरं जलप्राप्तिः। एवमेव अम्बुरहिते देशे जम्बुवृक्षसान्निध्ये उत्तरस्यां दिशि त्रिभिर्हस्तैरनन्तरं नरद्वयमितखनने सति जलोपलब्धिजार्यते। तत्र प्रथमं लोहगन्धिका मृत्तिका लभ्यते, ततः पाण्डुरा मृत्तिका, ततो मण्डूकप्राप्तिः, तदनन्तरं जलप्राप्तिः। जम्बुवृक्षात् प्राग् यदि वल्मीकानां स्थितिर्भवेच्चेत् तस्य दक्षिणपार्श्वे हस्तत्रयदूरं स्वादुजलप्राप्तिः। तत्र अर्धपुरुषमितखनने मत्स्यो दृश्यते, ततः पारावतपक्षिवत् पाषाणप्राप्तिः, तदनन्तरं नीलवर्णा मृत्तिका, ततः प्रभूतजलप्राप्तिः। एवमेव उदुम्बरवृक्षसन्निधाने वल्मीकप्राप्तौ पश्चिमायां दिशि त्रिभिर्हस्तैरेव अनन्तरं द्विपुरुषपरिमिते खनने स्वादुजलप्राप्तिः। अत्रार्धपुरुषमितखनने श्वेतसर्पस्य तत्तुल्यवस्तुनो वा प्राप्तिस्ततः अञ्जनोपमपाषाणखण्डप्राप्तिस्तदनन्तरं स्वादुजलप्राप्तिः। एवमेव विभिन्नवृक्षाणां कस्मिन् भागे जलप्राप्तिर्भविष्यतीति बृहद्रूपेण तल्लक्षणज्ञानद्वारा सुतरां ज्ञायते[१]।

यस्मिन् स्थले तृणरहिते प्रदेशे तृणसंयुता मही दृश्यते, तृणसहिते देशे वा तृणवर्जिता भूः, तत्र धनं जलं वा वक्तव्यम्। यत्र सकण्टकानां वृक्षाणां मध्ये अकण्टकानां वृक्षाणां स्थितिः, यत्र वा अकण्टकानां मध्ये सकण्टकानां स्थितिस्तत्रापि तथैव बोध्यम्। जलप्राप्तिवर्णने बृहत्संहितायां १०४ तमे श्लोके निगदितम्। तत्रोक्तं यद् या मही सकणिका ताम्रवर्णा च तत्र कषायं जलं लभ्यते कपिलवर्णायां धरायां क्षारं पयः। अतिपीतवर्णायां लवणं पयः। नीलवसुन्धरायां तु मृष्टं पयो लभ्यते। किञ्च ग्रामस्य दिग्विशेषमादाय कूपस्थितौ इष्टानिष्टफलावाप्तिर्भवतीति। अयं विचारो ज्योतिषशास्त्रे बृहद्वास्तुमालायां जलसिराविवेचने १००-१०१ श्लोकयोः वर्णितः—

आग्नेये यदि कोणे ग्रामस्य पुरस्य वा भवेद् कूपः।
नित्यं स करोति भयं दाहं च समानुषं प्रायः॥
नैर्ऋत्यकोणे बालक्षयं च वनिताभयं च वायव्ये।
दिक्त्रयमेतत्त्यक्त्वा शेषासु शुभावहाः कूपाः॥

तत्र स्वरूपेण निर्देशो वर्तते यद् ग्रामस्य नगरस्य वा अग्निकोणे कूपो भवेच्चेद् भयप्रदः, नैर्ऋत्यकोणे बालविनाशकरः, वायव्यकोणे स्त्रीविनाशः, एतदतिरिक्तदिशासु शुभप्रदः। तेनास्माकं शास्त्रे दिशासम्बन्धेन धराया-मिष्टानिष्टप्रभावज्ञानं भूगर्भीयजलाहरणनिरूपणप्रसङ्गे लभ्यते।

---

१. बृहत्संहितायां दकार्गलाध्याये।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एवमेव भिन्नभिन्नभूभागे भवननिर्माणविषयेऽपि वास्तुशास्त्रदृष्ट्या प्रचुरो विचार: प्राप्यते। तत्र कस्यां स्थितौ इष्टप्राप्ति:, कस्यां स्थितौ अनिष्टफलप्राप्ति:, प्रासादनिर्माणे उत्खननक्रमे अधस्तात् सम्प्राप्तप्रस्तर:, इष्टिका-कच-शल्य-प्रभृतिवस्तूनां प्राप्तौ तस्य इष्टानिष्टफलज्ञानं भूपृष्ठस्य कस्यां दिशि उत्तुङ्गत्वे किं फलम्, नीचत्वे च किं फलमिति सम्यग् विचार: कृत:। इदानीं जलज्ञाने जलरहितस्थाने यथा विचारो जात:, ज्योतिषशास्त्रे तथैव रत्नादिज्ञानेऽपि नक्षत्रकालभूसंस्थानस्थितिं दृष्ट्वा भारतीयवाङ्मये ग्रन्थेषु बहुत्र विचारो जात:।

पुराणादिवर्णनानुसारेण सुमेरोश्चतुर्दिक् मन्दर:, मेरुमन्द:, सुपार्श्व:, कुमुद:, इत्येते चत्वारो पर्वता वर्तन्ते। तत्र आम्र-जम्बू-कदम्ब-वटवृक्षाणां स्थिति:। मेरुमन्दरपर्वतस्थजम्बूवृक्षात् पतितानि परिपक्वजम्बूफलानि रसप्रवाहरूपेण जम्बूद्वीपे सन्ति। तत्र पर्वतभूभागेषु अन्यसम्प्राप्त-रासायनिकद्रव्यसंयोगात् स्वर्णरूपता प्राप्यते। तस्या नद्या: प्रवाहेण क्षोणनदादीनां सम्पर्कात् तस्मिन्नदे स्वर्णकणानां लाभ:। प्रकृतिविक्षोभक्रमेण तस्या धराया इतस्तत: परिभ्रमणाद् अध:स्थलानामुपरि आगमनाद् ऊर्ध्वस्थलानामधोगमनाच्च कालक्रमेण उत्खनने सति तत्र स्वर्णोपलब्धि:। किञ्च धरायां बहुत्र स्थले अयस्कद्रव्याणां तरलरूपेण कठिनरूपेण चावस्थिति:। तत्र बहुत्र पर्वतखण्डे पारसमणिपदभाक् प्रस्तरखण्डोऽपि विद्यते। भौगोलिकपरिवर्तनक्रमे पारसखण्डे तेषु भूगर्भे सम्मिलितेषु तत्रत्यायस्कद्रव्यसंयोगात् तेषामयस्कद्रव्याणां सुवर्णत्वं सम्भाव्यते। एवमेव विभिन्नरासायनिकद्रव्यसंयोगाद् भूगर्भस्थले सम्प्राप्तरजतताम्रप्रभृत्यन्यधातूनामपि सम्प्राप्तिर्बोध्या[१]।

भौगोलिकपरिणामवशात् कुत्रचिद् वनाग्निदाहद्वारा कुत्रचिच्च भूकम्पादिद्वारा उपरिस्थिता बहव: पदार्था भूगर्भे समायान्ति। तत्र कालक्रमेण अतितापसंयोगात् ते शनै: शनै: शीतलतामुपयान्ति, शीतप्रस्ताराङ्गाराकारत्वं गच्छन्ति।

भूगर्भे बहुत्र स्थले अतीवप्रचण्डाग्निस्वरूपम्, अत एव कालक्रमे सङ्क्षोभो यत्र तत्र तत्रत्यभूमिमुद्भिद्य अधोवर्तिलावागन्धादय: प्रचण्डाग्निकणरूपेण नि:सरन्ति पदार्था:। तदेव ज्वालामुखीनाम्ना प्रसिद्धम्।

सा ज्वालामुखी कुत्रचित्सुप्ता कुत्रचिज्जागृता। पृथिव्या भूभागे 'कैल्शियम'-नाम्ना प्रसिद्ध: पदार्थोऽपि प्रस्तरादिखण्डानां रासायनिक-

---

१. श्रीमद्भागवते पञ्चमस्कन्धे षोडशाध्यायत: षड्विंशत्यध्यायं यावत् सृष्टिनिरूपणप्रसङ्गे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

द्रव्यसंयोगाद् अग्नितापसंयोगादेव जायते। अत एव यत्र तत्र धौतप्रस्तरखण्ड-(चूना)स्याप्युपलब्धिः। एवमन्यदप्यूह्यम्। एतेषां द्रव्याणां स्वगर्भे धारणादेव धरित्र्या अपरं नाम वसुन्धरेति शास्त्रे प्रसिद्धम्। एतेषां वस्तूनां तत्तद्भूभागे सम्यक् स्थितिज्ञानं भूपरीक्षणद्वारा लग्नादिविचारद्वारा चास्माकं ज्योतिषशास्त्रे अस्ति[1]।

सुवर्णम्—जगति स्वर्णस्य मुख्योत्पादकस्थलानि दक्षिण-अफ्रीका, संयुक्तराष्ट्रामेरिका, कनाडा, सोवियतरूस, आस्ट्रेलिया, न्यूजीलैण्ड, दक्षिण-अमेरिका, जापान, मैक्सिको, कांगो, रोडेशिया, भारतादयः सन्ति। तथापि विशेषमहत्त्वपूर्णक्षेत्राणि १-विट्वाड्सरेण्ड-दक्षिण-अफ्रीकायां २. होमेस्टेक, दक्षिणकोटा, सियारा, नेवेडा, संयुक्तामेरिकायां, ३. मोरोवेहलो (ब्राजील) ४. पोरकोपाइन, आण्टोरिया कीर्कलैण्ड ओण्टेरिया (कनाडायाम्) ५. कोलार (भारते) विद्यते।

भारतवर्षे उत्पादितस्वर्णस्य नवतिप्रतिशततोऽप्यधिकभागः स्वर्णमयस्फटिकशिलाभिर्लभ्यते। आन्ध्रप्रदेशस्य अनन्तपुरमण्डले रामगिरिनाम्नि स्फटिकशिलासु सर्वतोऽप्यधिकमहत्त्वपूर्णस्थलम्, तथैव राजस्थानप्रान्ते चित्तौडमण्डले पालमानेरक्षेत्रे स्वर्णप्राप्तिसम्भावना अत्यधिका। यतो हि इदं क्षेत्रं पोलारमयस्वर्णक्षेत्रस्य स्वर्णमयशैलानां विस्तारक्षेत्रेषु आयाति। आसामक्षेत्रेऽपि अल्पमात्रायामुत्तरपश्चिमहिमालयक्षेत्रे स्वर्णमयस्फटिकशिलाया उपलब्धिर्भवति। बिहारप्रान्ते छोटानागपुरक्षेत्रे दक्षिणभागे स्वर्णमयस्फटिक-शिलाया उपलब्धिर्भवति। तमिलनाडुराज्ये विभिन्नक्षेत्रेषु स्वर्णशिलाया उपलब्धिर्भवति। तत्र नीलगिरिमण्डलस्य वायनदस्वर्णक्षेत्रं कोयम्बटूरमण्डलस्य गोपीच्चेट्टिपालयमतालुके 'वेन्सिवेट्टा'-पर्वतेषु स्वर्णखनिजानां प्राप्तिः। सेलममण्डले धर्मापुरी-कृष्णगिरि-स्थलेष्वपि स्वर्णप्राप्तिर्भवति। मैसूरराज्यस्य स्वर्णनिक्षेपो भारतवर्षस्य सम्पूर्णोत्पादनस्य नवतिप्रतिशतभाग उपलभ्यते[2]।

रजतम्—विश्वस्य रजतप्राप्तिस्थलानि मैक्सिको, संयुक्तराज्य-अमेरिका, कनाडा, पेरू, आस्ट्रेलिया, चिली, अर्जेन्टाइना, वेल्जियम, कांगो एवं हुडरासः सन्ति। अत्र सम्पूर्णोत्पादनस्य एकोनषष्टितमभागो मैक्सिको, संयुक्तराष्ट्र-अमेरिका तथा कनाडाद्वारा उत्पाद्यते।

भारते तु नगण्याल्पमात्रायामेवोपलब्धिः। तत्र बिहारराज्ये हजारीबाग-मानभूमि-पलामू तथा इदानीन्तनझारखण्डप्रान्तस्य राँचीमण्डले विभिन्नभागेषु

१. श्रीमद्भागवते भुवनकोशवर्णने षोडशाध्यायतः षड्विंशत्यध्यायं यावत्।

२. द्र. 'भूविज्ञान : एक परिचय', पृ. ४४३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

समुपलभ्यते। अस्मिन् प्रान्ते अर्जेन्टाइट-पदार्थस्य उपलब्धिर्भवति। राजस्थानप्रान्तस्य झावरखननेषु जस्ता-शीशा तथा रजतपदार्थाना-मुपलब्धिर्भवति। मैसूरराज्यस्य स्वर्णखनने एवाल्पमात्रायां रजतस्यापि प्राप्तिर्भवति। हिमाचलप्रान्तस्य सतलजघाटीमध्ये चारगांवनामग्रामसन्निकटे प्राकृतिकरजतप्राप्तिर्भवति।

तथैव मध्यप्रदेशस्य ग्वालियरमण्डले विलासपुरमण्डले चिचोलीमण्डले सरगूजामण्डले जबलपुरमण्डले ताम्रनिक्षेपमध्ये अत्यल्पमात्रायां रजतोपलब्धिर्भवति। वङ्गप्रान्तस्य जलपाईगुड़ीक्षेत्रे गैलेना एवमन्यखनिजेषु मध्ये अल्पमात्रायां रजतप्राप्तिर्भवति। इत्थं भारते मुख्यरूपेण कोलारस्वर्णक्षेत्रे, झावरखनने चैव विशेषरूपेण रजतोपलब्धिः[१]।

प्लेटिनम्—द्रव्यं यूरालपर्वतक्षेत्र सोवियतरूसदेशे, संयुक्तराष्ट्र-अमेरिकायां वेल्डजटिले, अफ्रीकायां विशालनिक्षेपरूपेण लभ्यते। अन्याल्पमहत्त्वं क्षेत्रं तु अलास्का-कटांगा-यूथेपियादेशेषु विद्यते। उत्पादनस्य अधिकांशभागस्तु सोवियतरूस एवास्ति। भारते आसामप्रान्ते नोवोदेहिंग-नद्याम्, उडीसाप्रान्ते ब्रह्माणीनद्याम्, बिहारप्रान्ते सिंहभूमिमानभूमिमण्डले प्रवहमानासु नदीसु चात्यल्पमात्रायां प्लेटिनम्पदार्थो लभ्यते। तथैव मध्यप्रदेशस्य जबलपुरमण्डले, महाराष्ट्रप्रान्ते तुगारपर्वतमालायां चात्यल्पमात्रायामस्य पदार्थस्य प्राप्तिर्भवति[२]।

लौहः—लौहद्रव्यस्य अमेरिका - फ्रान्स - वेल्जियम - इंग्लैण्ड- जर्मनी - स्वीडन - रूस - अल्जीरिया - ब्राजील - चीली - वैनेज्वेला - भारत - चीन-देशेषु प्राप्तिर्भवति। भारते सर्वाधिक-लौहनिक्षेपो बिहारप्रान्तस्य सिंहभूमिमण्डले तथा उडीसाप्रान्तस्य पर्वतशृंखलासु विद्यते। तथैव मध्यप्रदेशप्रान्तस्य दुर्ग-जबलपुर-ग्वालियर-मण्डलेषु विद्यते। मैसूरराज्ये चिकमगलूर-साँडलक्षेत्रे हास्पेटक्षेत्र-(किष्किन्धा) रामगिरिक्षेत्रेषु च विद्यते। महाराष्ट्रे चान्दामण्डले रत्नागिरिमण्डले च अयस्कोपलब्धिर्भवति। तमिलनाडुराज्ये सेलमक्षेत्रे त्रिचुरापल्लीक्षेत्रे च अयस्कस्य प्राप्तिर्भवति। एवमेव अल्पमात्रायामान्ध्र-केरल-आसाम-उत्तरप्रदेश-पंजाब-राजस्थान-वङ्गप्रदेशेष्वप्यस्य द्रव्यस्योपलब्धिर्भवति[३]।

मैगनिजम्—द्रव्यस्योपलब्धिः जगति सोवियतरूस-ब्राजील-भारत-दक्षिणाफ्रीका-क्यूबा-मोरक्को-संयुक्तराष्ट्र-अमेरिका-देशेषु विद्यते। भारतवर्षे

१. द्र. भूविज्ञान : एक परिचय, पृ. ४४४।

२. तत्रैव, पृ. ४११;

३. तत्रैव, पृ. ४३३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मध्यप्रदेशराज्यस्य बालाघाट-छिन्दवाड़ा-झाबुआ-क्षेत्रेषु, महाराष्ट्रराज्यस्य नागपुर-भण्डाराक्षेत्रेषु, गुजरातराज्यस्य पञ्चमहलक्षेत्रे, उडीसाराज्यस्य सुन्दरगढमण्डले अस्योपलब्धिर्भवति[१]।

निकल:—निकलद्रव्यस्य प्राप्ति: वेस्टइण्डीज-आण्टोरिया-न्यूकैलीडोनिया-फिनलैण्ड-नीदरलैण्ड-ग्रीस-सोवियरूस-देशेषु भवति। भारते तु अत्यल्पमात्रायामस्योपलब्धि:। तत्रापि राजस्थानराज्ये, जम्बूकश्मीरराज्ये, केरलराज्ये, बिहारराज्ये, च उडीसाराज्ये, मध्यप्रदेशराज्ये, ताम्रायस्कमध्ये अस्योपलब्धि:[२]।

क्रोनियम्—द्रव्यस्य प्राप्ति: दक्षिणाफ्रीका-पूर्वी यूराल-(रूस-सोवियत) टर्की-क्यूबा-फिलिपाइन-भारत-यूगोस्लाविया-प्रभृतिदेशेषु भवति। तत्र भारते आन्ध्रप्रदेशस्य कृष्णानदीक्षेत्रे, मैसूरराज्यस्य चितलदुर्ग, कादूर, मैसूर-सिमोगक्षेत्रे, बिहारराज्यस्य सिंहभूमिक्षेत्रे, महाराष्ट्रराज्यस्य भण्डारा-रत्नागिरिक्षेत्रे, तमिलनाडुराज्यस्य सेलमक्षेत्रे, उडीसाराज्यस्य केवेंझर-ढेकानल तथा कटकक्षेत्रे अस्ति। खननदृष्ट्या मैसूर-महाराष्ट्र-बिहार-उडीसाराज्यानां निक्षेपो महत्त्वपूर्ण:[३]।

मेलिवडेनम्—द्रव्यस्य प्राप्ति: क्लामेम्स-कोलेरेडो-संयुक्तराज्य-अमेरिका, मैक्सिको-चीन-कनाडा-नार्वे-देशेषु विद्यते। तत्र सर्वतोऽप्यधिकं संयुक्तराष्ट्रामेरिकायाम्, भारते तु नगण्यतया अस्योपलब्धि:। आन्ध्रप्रदेशस्य गोदावरीमण्डले, आसामप्रदेशस्य खासीपर्वतमालायाम्, केरलराज्ये टोवालाक्षेत्रे, बिहारराज्ये सिंहभूमिक्षेत्रे, राजस्थानराज्ये किसनगढक्षेत्रे, मैसूरराज्ये कोलारक्षेत्रे अस्योपलब्धि:[४]।

टाइटेनियम्—द्रव्यस्योपलब्धि: वर्जीनिया-सेनफोर्ट-संयुक्तराष्ट्र-अमेरिका-भारत-नार्वे-देशेषु विद्यते। अमेरिकाया: प्रथमं स्थानं भारतस्य द्वितीयं स्थानम्। तत्र भारतस्य आन्ध्रप्रदेशे उडीसा-बिहार-महाराष्ट्रराज्येषु विशेषरूपेण अस्योपलब्धिस्थलम्[५]।

टंगस्टेन—द्रव्यस्य प्राप्ति: जगति संयुक्तराष्ट्र-अमेरिका-कनाडा-चीन-दक्षिणचीन-कोरिया-वर्मा-पुर्तगालदेशेषु भवति। तत्र सर्वतोऽधिकं चीनदेशे लभ्यते। भारते तु अल्पमात्रायां राज्यस्थान-बिहार-उडीसा-गुर्जरप्रदेशे चास्ति[६]।

१. द्र. भूविज्ञान : एक परिचय, पृ. ४३५।

२. तत्रैव, पृ. ४३६;

३. तत्रैव, पृ. ४३७।

४. तत्रैव, पृ. ४३९;

५. तत्रैव, पृ. ४३७।

६. तत्रैव, पृ. ४३८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कोवाल्ट—द्रव्यस्य प्राप्तिः वेल्जियम-कांगो-उत्तर-एशिया-संयुक्तराष्ट्र-अमेरिका-मोरक्को-वर्मा-देशेषु विद्यते। तत्र विश्वोत्पादनस्य अधिकांशभागः कांगो-देशे अस्ति। भारते तु व्यापारिकस्तरेण नास्योपलब्धिः। सामान्यरूपेण राज्यस्थान-उडीसा-प्रदेशयोरस्ति[१]।

ताम्रम्—द्रव्यस्योपलब्धिः संयुक्तराष्ट्र-अमेरिका-चिली-रोडिशिया-कनाडा-कांगो-रूस-मैक्सिको-देशेषु विद्यते। भारते तु अपर्याप्तरूपेण अस्य प्राप्तिः। तत्र राजस्थान-बिहारराज्ययोः प्रमुखरूपेण अस्य प्राप्तिः। काश्मीर-मध्यप्रदेश-वङ्गप्रदेश-केरल-आन्ध्र-मैसूर-तमिलनाडु-पंजाब-हरियाणा-प्रदेशेषु अत्यल्पमात्रायामस्योपलब्धिर्भवति[२]।

सीसा-जस्ता—सीसा-जस्ता-पदवाच्यधातोः प्रचुरोपलब्धिः अमेरिका-कनाडा-सोवियतरूप-आस्ट्रेलिया-जर्मनी-फ्रान्स-प्रभृति-देशेषु भवति। तत्र विश्वोत्पादनस्य पञ्चाशत्प्रतिशतं यावद् उत्तरी-अमेरिकायां भवति।

भारते तु अस्याल्पमात्रायामुपलब्धिर्भवति। तत्र आन्ध्रे, उत्तरप्रदेशे, काश्मीरे, मध्यप्रदेशे, राजस्थानप्रदेशे, वङ्गप्रदेशे, पंजाबप्रदेशे, मैसूर-हरियाणाप्रदेशयोः, बिहारप्रदेशे च अस्य प्राप्तिर्भवति। तत्रापि राजस्थानप्रदेशे एव आशानुरूपमस्योद्गमः।

जस्ताद्रव्यस्य उद्गमो राजस्थाने काश्मीरे च भवति। एतदतिरिक्तं वङ्गप्रदेशे जलपाईगुडीप्रदेशे तथा आल्मोडा-टेहरी-गढ़वालक्षेत्रे (उत्तराञ्चले) समुपलब्धिर्भवति[३]।

टिन—द्रव्यस्य प्राप्तिः मलाया-इंग्लैण्ड-इण्डोनेशिया-चीन-आस्ट्रेलिया-थाईलैण्ड-वोलीविया-प्रभृतिदेशेषु प्रचुररूपेण भवति। तत्रापि मलाया-पेनेन्सुलाक्षेत्रमस्योद्गमस्य महत्तमं क्षेत्रम्।

भारते तु बिहारराज्यस्य हजारीबाग-गयाक्षेत्रे, रांची (झारखण्डे), भीलवाड़ाक्षेत्रे (राजस्थाने) चास्योपलब्धिसम्भावना। अद्यावधि अस्योत्पादनमत्र न प्रचलितमस्ति[४]।

अल्मुनियम्—अल्मुनियमद्रव्यस्य प्राप्तिः चीन-फ्रान्स-सूर्यनाम-योगोस्लाविया-संयुक्तराष्ट्र-अमेरिका-वेस्टइण्डीज-ग्रीस-हंगरी-गोल्डकोष्ट- भारतेषु अस्ति। भारते मध्यप्रदेशे सर्वतोऽधिकम्। ततो महाराष्ट्रे तदनन्तरं बिहारे, ततः तमिलनाडु-जम्बूकाश्मीर-गुजरात-उडीसा-प्रभृतिप्रदेशानां स्थानम्।

---

१. द्र. भूविज्ञान : एक परिचय, पृ. ४३७।

२. तत्रैव, पृ. ४३९; ३. तत्रैव, पृ. ४३९, ४५१।

४. तत्रैव, ४४१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एतदतिरिक्तं मैग्नेशियम्, वेलेरियम्, एन्टीमनी-आरसैनिक-पारा-(पारद) विसमत् एवं कैण्डमियम्-प्रभृतिधातूनामुद्‌गमो भूगर्भाज्जायते[१]।

कोयला—(प्रस्तरशीताङ्गारः) (पाषाणशीताङ्गारः) द्रव्यं अमेरिका-कनाडा-यूरोप-इंग्लैण्ड-जर्मनी-फ्रान्स-वेल्जियम्सोवियतरूस-साइवेरिया-भारत-चीन-जापान-मञ्चूरिया-अफ्रीका-रेडेशिया-नाइजीरिया-मेडागास्कर-क्षेत्रे आस्ट्रेलियायां न्यूसाउथवेल्स, क्वींसलैण्ड एवं विक्टोरियाप्रान्तेषु दक्षिण-अमेरिकायां कोलम्बिया, पेरू तथा चीली-देशेषु विद्यते। भारते बिहार-बङ्गाल-आसाम-उडीसा-मध्यप्रदेश-महाराष्ट्र-आन्ध्रप्रदेशे इदानीन्तनझारखण्डक्षेत्रे चास्ति। तथा च उत्तरप्रदेशे मीरजापुरक्षेत्रे अल्पमात्रायामस्ति[२]।

पेट्रालियम्—पेट्रोलियम्पदार्थस्य प्राप्तिः संयुक्तराष्ट्र-अमेरिका-ईरान-ईराक-अरब-कुवैत-प्रभृतिदेशेषु भवति। एतदतिरिक्तं सुमात्रा-कर्निया-जावा-रूमानिया-पेरू-अर्जेन्टाइना-सोवियतरूस-नीदरलैण्ड-पोलैण्ड-हंगरी-फ्रान्स-इटली - आस्ट्रेलिया - चेकोस्लोवाकिया - अल्वानिया - वर्मा - भारत-चीन - देशेषु च विद्यते[३]।

रत्नम्—रत्नस्य उत्कृष्टत्वानुकृष्टत्वरूपेण द्वैविध्यम्। तत्र हीरक-(हीरा)-पन्ना - लाल - (माणिक्यम्) - नीलम - बहुमूल्यौपल- मुक्ता-(मोती)प्रभृतिरत्नानि बहुमूल्यत्वाद् उत्कृष्टरत्नेषु गण्यन्ते। अनुत्कृष्टरत्नेषु वेंटिल-गार्नेट - फिन्सपाट - दूरमैलिन - तर्कान - नेपराइट - जेडाइट - लाजावर्त-जवरजद-पुखराज-टोपाज- फिरोजा-क्वार्टजप्रभृतयः सन्ति।

हीरकखण्डानि कांगोधाना-दक्षिण-अफ्रीकाया गणराज्ये मिलन्ति। भारते मध्यप्रदेशस्य पन्नामण्डले हीरकक्षेत्रम्। एवमनन्तपुरगुण्टुरप्रभृति-आन्ध्रक्षेत्रेषु उडीसायां सकलपुराक्षेत्रे झारखण्डस्य पलामूमण्डले चास्ति[४]।

नीलम्—नीलमणिरत्नस्य उद्‌गमस्थलानि वर्मा-श्रीलंका-भारत-अफगानिस्तान-स्याम-कम्बोडिया-क्वींसलैण्ड-प्रभृति-देशेषु विद्यन्ते।

भारते नीलमप्राप्तेः प्रमुखक्षेत्रं काश्मीरक्षेत्रम्। एतदतिरिक्तं दक्षिणभारते कोयम्बटूर एवं मैसूरमण्डलेष्वप्यस्ति[५]।

---

१. द्र. भूविज्ञान : एक परिचय, पृ. ४४१।

२. तत्रैव, पृ. ४५८।

३. तत्रैव, ४६१।

४. तत्रैव, पृ. ४४६-४४७।

५. तत्रैव, पृ. ४४६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लाल (रूबी)—अस्य रत्नस्योपलब्धिः वर्मा-लंका-अफगानिस्तान-स्यामकम्बोडिया-प्रभृतिदेशेषु प्राचुर्येण विद्यते। भारते तु मध्यप्रदेशस्य वीतरमण्डले सामान्येन न्यूनमूल्यकस्योपलब्धिर्भवति[१]।

पन्ना—अस्य रत्नस्य प्राप्तिः कोलम्बिया, टान्सवाज, यूरालपर्वतक्षेत्रम्, ब्राजील-मिश्र-आस्ट्रेलिया तथा भारतमस्ति। भारते राजस्थानप्रदेशस्य अजमेर-उदयपुर-मेवाड एवं राजगढक्षेत्रे अस्ति[२]।

ओपल—ओपलं दुग्धवर्णात्मकं कृष्णवर्णात्मकञ्च भवति। अस्योपलब्धिस्थलम् आस्ट्रेलिया, चेकोस्लोवाकिया, मैक्सिको तथा संयुक्तराष्ट्र-अमेरिका विद्यते[३]।

एतदतिरिक्तं वैरिल-गारनेट-फेल्सपार-टूरमैलिन-जर्कान-नेफराइट-जेडाइट-लाजावर्त-जैवरजद-टोपाज-फिरोजा-क्वार्टज-प्रभृत्यनेकानि अल्प-मूल्यकानि उपरत्नानि भूगर्भे प्राप्यन्ते। किं बहुना, जगति व्यवह्रियमाणपदार्थेषु शोधप्रस्तर-अव्रक-(अभ्रक)प्रभृतीन्यपि अनेकानि द्रव्याणि भूगर्भे समाहितानि सन्ति। लवणात्मकं पार्थिवं समुद्रद्वारा उत्पादितं सैन्धवं सर्वं भूगर्भात्मकमेव ज्ञेयम्। अत एव भवतु नाम अद्यतनयुगे वैज्ञानिकप्रणाल्या तेषां ज्ञानं प्राप्त्युपायश्चेति; किन्तु भारतीयवाङ्मये बहुकालादेव **'रत्नगर्भा वसुन्धरा'** इत्युक्तिः प्रसिद्धाऽस्ति।

आधुनिकास्तु प्रकृतिमादाय मृत्परीक्षणद्वारा यन्त्रमाध्यमेन निर्णीय तथा वदन्ति। तत्तु बहुश्रमसाध्यं बहुव्ययसाध्यञ्च। शास्त्रीयप्रक्रियामादाय विचारे तु शास्त्रीयमर्यादानुसारेण परिनिष्ठितजीवनयापनपूर्वकशास्त्रज्ञानमात्रेण तथाविधा-चरणेन च भूगर्भीयपदार्थानां ज्ञानमिति लाघवम्।

यद्यपि ज्योतिषवाङ्मये ग्रहानुसारेण एषां मध्ये बहूनां रत्नानाम-मुपरत्नानाञ्च फलबलकल्पनया ज्ञानधारणप्रकारादिकञ्च वर्णितम्; किन्तु एतेषां प्राप्तिः कुत्र कुत्र भवति कया रीत्या भवति इत्यादिनिर्देशो न लभ्यते। तथापि मन्ये यद् अनुसन्धानात्मकदिशायां कार्यं भवेत्, यदि च ग्रहदशानक्षत्रस्वरूपमनुसृत्य क्षेत्रप्रश्नकालञ्च परीक्ष्य कार्यं भवेत्, तर्हि मन्ये यद् एतेषां रत्नानां भूगर्भे निहितानामज्ञातस्थलानां ज्ञानं सौलभ्येन भविष्यतीति।

●

१. द्र. भूविज्ञान : एक परिचय, पृ. ४४७।

२. तत्रैव, पृ. ४४६।

३. तत्रैव, पृ. ४४७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संस्कृतवाङ्मये नारीणां वैशिष्ट्यम्

प्रो. रमाशङ्करमिश्रः
अध्यक्षः, साहित्यविभागस्य
साहित्य-संस्कृति-सङ्कायाध्यक्षश्च
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये, वाराणस्याम्

❃ ❃ ❃

सीतासावित्र्यहल्याऽत्रिमुनितनुभवा-लक्ष्म्यरुन्धत्युमाद्या
माधुर्य्यौदार्य्यधैर्य्यैरखिलजनहितैः शीलसौजन्यजन्यैः।
स्तोष्यन्ते संस्तुताश्च प्रमुदितहृदयैर्भारते स्तूयमाना
हं हो! शौर्य्ये कवित्वे सुयशसि वनिताः शासनेऽपि प्रवीणाः॥

प्राचीनभारते नारीणां विविधरूपाण्यासन्। काश्चन ब्रह्मवादिन्यो मन्त्रद्रष्ट्र्यः, काश्चिद् राज्ञो महिष्यः, काश्चन काव्यशास्त्रिण्यः, काश्चिच्च कवयित्र्य आसन्। वैदिकवाङ्मयपरिशीलनानन्तरं बृहद्देवतादिदृशा च ब्रह्मवादिनीनां मन्त्रद्रष्ट्रीणामृषिकर्मरतानाञ्च नारीणां स्वरूपाणि समवगम्यन्ते[१]।

(क) कासाञ्चन **ब्रह्मवादिनीनां मन्त्रद्रष्ट्रीणाञ्च** योषितां विवरणमधस्ताद् वितन्यते—

१. देवमाता अदितिः—ऋग्वेदसंहितायामदितेर्नामोल्लेखः परश्शतं लभ्यते। सा देवानां माता, महर्षिकश्यपस्य पत्नी, ब्रह्मवादिनी, मन्त्रद्रष्ट्री विदुषी चासीत्। ऋग्वेदे चतुर्थमण्डलान्तर्गतस्य अष्टादशसूक्तस्य द्वादशसूक्तस्य च मन्त्राणां सैव द्रष्ट्रीति स्वीक्रियते—

सप्तभिः पुत्रैरदितिरुपप्रैतपूर्व्ययुगम्।
प्रजायै मृत्यवे त्वत्पुनर्मार्तण्डमाभरत्[२]॥

---

१. घोषागोधाविश्ववारापालापनिषन्निनितत्।
ब्रह्मजाया जुहूर्नामागस्त्यस्य च स्वसादितिः॥ ब्रह्मवादिन्य ईरिताः॥ (बृहद्देवता-२)

२. ऋ.सं. १०/१४/९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

२. **अपाला**—अपालानाम्नी ब्रह्मवादिनी वैदिकवाङ्मये बहुधा समुदीरिता। तपश्चर्यातिरेकवशात् तया ऋग्वेदस्याष्टमे मण्डले चैकनवतितमे सूक्ते सप्तमन्त्राणां दर्शनं कृतम्[1]।

बृहद्देवतायां (६/१९/६०), सायणभाष्ये (८/९१) नीतिमञ्जर्यां च (पृष्ठे २७८) अपाला-वैदुष्यबीजान्युपलभ्यन्ते। इयमपालाऽनसूयात्रितनया कृशाश्वपत्नी चासीदिति सायणभाष्यानुशीलनेन परिज्ञायते।

३. **उशिन-नाम्नी ब्रह्मवादिनी**—ममतापुत्रस्य महर्षेर्दीर्घतमसः पत्नी, कक्षीवतो दीर्घश्रवसश्च माता उशिनदेव्यासीत्। ब्रह्मवादिनी घोषा चास्याः पौत्र्यासीत्। उशिनदेवी खलु ऋग्वेदप्रथममण्डलान्तर्गतानां षोडशोत्तरैक-शततममन्त्रत एकविंशत्यधिकशतद्वयमितमन्त्राणां द्रष्ट्री आसीत्।

४. **घोषा**—वैदिकयुगे वेदप्रचारपरायणा नारी घोषाव्यपदेश्यतां गताऽऽसीत्। महर्षेर्दीर्घतमसः पौत्री घोषा पितृकुलपरम्परयैव वेदाध्ययनाध्वनीनाऽऽसीत्। ऋग्वेदप्रथमण्डलान्तर्गतयोरेकोनचत्वारिंशच्चत्वारिं-शत्तमयोस्सूक्तयोरष्टाविंशतिमन्त्राणां द्रष्ट्री सैषा घोषाऽश्विनीकुमारयोरुपासनं पुनः पुनः कृतवती[2]।

५. **जुहूः**—वैदिकमन्त्रदष्ट्री जुहूर्दशममण्डले ऋग्वेदीयनवाधिक-शततमस्य सूक्तस्य मन्त्राणां दर्शनं कृतवती। अत्र हि सुस्पष्टं जुहूरुल्लिखिता[3]।

६. **दक्षिणा**—दानप्रेमिका ब्रह्मवादिनी दक्षिणाऽऽसीत्। ऋग्वेदान्तर्गत-दशममण्डलस्य सप्ताधिकैकशततमस्य सूक्तस्य मन्त्रद्रष्ट्री दक्षिणा नारीजीवनोपदेशामृतदायिन्यासीत्।

७. **रोमशा (लोमशा वा)**—ऋग्वेदान्तर्गतप्रथममण्डलान्तर्गतषड्-विंशत्यधिकैकशततमसूक्ते सप्तमन्त्राणां द्रष्ट्री रोमशा बुद्धिबलोपासिन्यासीत्। बृहद्देवताऽनुसारेण (३/१६६) भावयव्यपत्नीत्वेन सा ख्यातिमागात्।

८. **लोपामुद्रा**—विदर्भराजतनया विनयाञ्चिता लोपामुद्रा सौन्दर्याति-शयसम्मोहिनी अगस्त्यधर्माङ्गनाऽऽसीत्। तस्याः पुत्रश्च दृढस्युर्महान् ब्रह्मतत्त्ववेत्ता महर्षिश्चासीत्।

---

१. अपालामिन्द्रचिष्वद्व्यकृणोः सूर्यत्वचम्।। (ऋ.सं. ८/९/७)

२. तत्रैव-१०/३९/१४।

३. तत्रैव-१०/१०९/५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

९. वागाम्भृणी—अम्भृण-कन्या वाग्मिनी वागीश्वरी आम्भृणी वाक्शक्तिमती योगबलवती मन्त्रद्रष्ट्री चासीत्। सा हि ऋग्वेदान्तर्गतदशममण्डलस्य पञ्चविंशत्यधिकैकशततमसूक्तस्थमन्त्राणां द्रष्ट्री आसीत्। इयमेव 'राष्ट्री वसूनां सङ्गमनी यज्ञियानाञ्च चिकितुषी' देवी कालान्तरे सर्वजगन्नियन्त्री चण्डीति विख्यातिमुपेता[१]।

१०. विश्ववारा—विश्वमञ्चे वैदिकीमार्यसंस्कृतिं प्रचारितवती विश्ववारा ऋग्वेदान्तर्गतपञ्चममण्डलीयाष्टाविंशसूक्तस्थमन्त्राणां द्रष्ट्री आसीत्। इयं विद्वज्जनसम्मानसम्पादिनी पावकाराधनपराऽऽसीत्।

११. शश्वती—ऋग्वेदान्तर्गताष्टममण्डलस्थप्रथमसूक्तगतमन्त्रद्रष्ट्री शश्वती बुद्धिजीवात्मतादात्म्यबोधिन्यासीत्। अङ्गिरसो महर्षेरात्मजा यदुवंशजस्य आसङ्गनाम्नो नृपस्य पत्नी सेयं शश्वती विद्यावती मेधाविनी चासीत्।

१२. सूर्या—सूर्य-पुत्री सूर्या चन्द्रमसो धर्मपत्नी आसीत्। सा हि ऋग्वेदान्तर्गतदशममण्डलीयपञ्चाशीतितमसूक्तमन्त्राणां साक्षात्कारिणी ब्रह्मवेत्त्री आसीत्। एषु मन्त्रकदम्बकेषु वैवाहिकजीवनोद्देश्यनिदर्शनं चकास्तितराम्।

१३. सरमा—ऋग्वेदे खलु प्रसिद्ध एव सरमा-पणि-संवादः। सरमा-पणिसंवादसूक्तरूपेण ख्यातं किल ऋग्वेद-दशममण्डलान्तर्गताष्टोत्तरशततमं सूक्तम्। अस्यैव सूक्तस्य मन्त्राणां साक्षात्कारकारिणी सरमाऽऽसीत्। सा हि शतक्रतोरिन्द्रस्य राजनीतिनटी राजदूती चासीत्[२]।

१४. ममता—दीर्घतमसो महर्षेर्माता ममता ऋषिकर्मपरायणा मेधाविनी ब्रह्मवेत्त्री आसीत्। सा ऋग्वेदप्रथममण्डलीयदशमसूक्तगतमन्त्राणां द्रष्ट्री अग्निसमुपासनदत्तचित्ताऽऽसीत्।

१५. इन्द्राणी—इन्द्रस्य पत्नीन्द्राणी ऋग्वेदप्रथममण्डलीयत्रयोविंश-सूक्तगतमन्त्रे द्वादशे प्राप्तोल्लेखास्ति। सा खलु ऋग्वेद-दशममण्डलीयपञ्च-चत्वारिंशदुत्तरशततमसूक्तस्य षडशीतितमसूक्तस्य च मन्त्रद्रष्ट्री आसीत्।

१६. इन्द्रमातरः—ऋग्वेददशममण्डलीय-त्रिपञ्चाशदधिकशततमसूक्तगत-पञ्चमन्त्रद्रष्ट्र्य इन्द्र-मातरः सन्ति, यत्र नवजातशिशुरूपतां गतस्येन्द्रस्य मनोमोहकं वर्णनं, वृत्रवधादिकं प्रतापपिशुनं कर्म च विततम्।

---

१. अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्। तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम्। (ऋ.सं. १०/१२५/३)

२. इन्द्रस्य दूतीरिषिता चरामि मह इच्छन्ती पणयो निधीन् वः। (ऋ.सं. १०/१०८/२)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१७. इन्द्रस्नुषा—इन्द्रस्य स्नुषा = पुत्रवधू ऋग्वेददशममण्डलीयाष्टाविंशसूक्तमन्त्रद्रष्टी। यत्र इन्द्रपुत्रवध्वा कृतानि इन्द्रकार्याणि वर्णितानि।

१८. रात्रिः (रात्री वा)—ऋग्वेद-दशमण्डलीयसप्तविंशत्यधिकशततमसूक्तगतानामष्टमन्त्राणां द्रष्ट्री रात्रिरस्ति। इयं हि आकाशपुत्रीति निगदिता।

१९. गोधा—ऋग्वेद-दशममण्डलान्तर्गत-चतुस्त्रिंशदधिक-शततमसूक्तमन्त्राणां द्रष्ट्री गोधाऽऽख्याता। अत्र शतक्रतोरिन्द्रस्य प्रशस्तिर्वर्णिता।

२०. यमी—ऋग्वेद-दशममण्डलान्तर्गतस्य चतु:पञ्चाशदुत्तरैकशततमसूक्तस्य मन्त्राणामृषिका यमीति निरुक्ता।

२१. यमी वैवस्वती—यमी यमस्य भगिनी। सा हि ऋग्वेददशममण्डलीयदशमसूक्तस्य मन्त्रद्रष्ट्रीति विख्याता। अत्रत्यमन्त्रेषु यमीसमभिप्रेत-दुर्भावनानां विवरणं यमकृत-निवारणं च प्रस्तुतीकृते स्तः।

२२. शची—पुलोमजा शची देवराजस्येन्द्रस्य पत्नी। सा खलु ऋग्वेदीयदशममण्डलीयैकोनषष्ट्यधिकैकशततमसूक्तस्य मन्त्राणां द्रष्ट्री सम्मता। अत्र सपत्नीमानमर्दनपुरस्सरं पति-वशीकरणसौभाग्य-चर्चा चर्चिता।

२३. गार्गी—गर्गगोत्रजा बृहदारण्यकोपनिषदि याज्ञवल्क्येन सह औपनिषदिकशास्त्रार्थमहासमरे प्राप्तविजया विदेह-सभायां सर्वोत्कृष्टविदुषीप्रख्यातिमुपेता ब्रह्मवेत्त्रीमूर्धन्या। निश्वप्रचमनयाऽपि मन्त्रा दृष्टाः स्युरिति विद्वन्मण्डलमतम्।

२४. सार्पराज्ञी—वशंवदीकृतसर्पसमूहा विदुषीयमृग्वेद-दशममण्डलीयैकोननवत्युत्तरैकशततमसूक्तस्य मन्त्राणां साक्षात्कारिणी। अत्र समुद्यन्मार्तण्डप्रतापावली विवृता चकास्ति[१]।

२५. सिकता—ऋग्वेददशममण्डलीय-षडशीतितमसूक्तस्य मन्त्राणां द्रष्ट्री सिकताऽस्ति। अत्र सोमरस-महत्ता चारु वर्णिता, या हि इन्द्र-प्रसादकरी।

२६. श्रद्धा—ऋग्वेददशममण्डलीयैकपञ्चाशदधिकशततमसूक्तगतमन्त्राणां द्रष्ट्री श्रद्धा निरूपिता। अत्र यज्ञादिसर्वकर्मसु श्रद्धाया आधारभित्तिता वर्णिता।

२७. मैत्रेयी—महर्षि-याज्ञवल्क्यस्य द्वे पत्न्यौ मैत्रेयी कात्यायनीति चास्ताम्। मैत्रेयी ज्येष्ठा, अपरा च कनिष्ठेति विदिता। मैत्रेयी

१. अयं गोपृश्निरक्रमीदशदन्मातरं पुरः। पितरं च प्रपन्त्स्वः। (ऋ.सं. १०/१८९/१)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ब्रह्मज्ञानप्रकाशितहृदया सदया चासीत्। तां प्रति बृहदारण्यकोपनिषदि याज्ञवल्क्यप्रदत्तब्रह्मविषयकोपदेशसारा अद्यापि जीवन्ति जयन्ति च।

मैत्रेयी-गार्गी-लोपामुद्राऽनसूयाप्रभृतिनारीणां ब्रह्मज्ञानालोकैर्लोकोऽय-मालोकितो लोक्यते। अन्या अपि वेदवाङ्मयानुशीलनाभ्यासशालिन्यो ब्रह्मवादिन्य: सन्ति यासां महत्त्वपूर्णानुशीलनेन संस्कृतभारती नूनमेव भवष्यिति धन्यधन्या।

(ख) उपदेशिका नार्य:—वैदिककाले मन्त्रद्रष्ट्रीणां ब्रह्मवादिनीनां कासाञ्चन नारीणां चित्रणं कृतम्। वैदिककाले पौराणिककाले च सुलभा-मदालसाऽनसूयाप्रभृतयो नार्य उपदेशिका भूत्वा नारीजगत्कल्याणमाचरितवत्य: परवर्तिजगत्प्रेरणादायिन्यश्च जाता:। तासां किञ्चिन्मात्रं विवेचनमधोविगलितासु पङ्क्तिषु समुदीर्यतेतमाम्—

१. सती अनसूया—न असूया = निन्दाद्वेषेर्ष्याविकारो यस्यां सा अनसूया। अनसूयाभिर्नारीभिरेव पातिव्रत्ययशो लोकधर्मयशश्च प्राप्तुं शक्यते। कविकुलगुरुकालिदासप्रणीते शाकुन्तलनाटके शकुन्तलासाचिव्यमाचरन्ती सख्यपि अनसूयानाम्नी गम्भीरोदात्तवाग्व्यवहारशालिनी विभाति।

महर्षेरत्यन्ततप:परिपक्वस्यात्रे: पत्नी तापसी पतिव्रतोत्तमाऽनसूया तु मनुपुत्र्या देवहूतेर्ब्रह्मर्षिकर्दमस्य च पुत्री, नारायणावतार-कपिलस्य च अग्रजाऽऽसीत्। चित्रकूटाद्रौ स्वतप:प्रभावाविर्भूतपयस्विनीकाऽनसूया विलक्षणतपोवैभवा वनवासवेलायां जानकीमपि पातिव्रत्योपदेश-सुधाधाराभिस्तर्पितवती।

श्रीमद्भागवतादि-महापुराणपृष्ठपटलेषु तु शिशूकृतब्रह्मविष्णुमहेश्वरेयं त्रिदेवानपि तप:परिपाकप्रतापैश्चकितचकितीकृतवती।

२. सती मदालसा—मदालसा गन्धर्वराज-विश्वावसु-पुत्री नागराजस्य अश्वतरस्य च कन्यात्वेन विख्याताऽस्ति। महाराजशत्रुजित्पुत्र ऋतध्वजोऽस्या: पतिरासीत्। अस्याश्चत्वार: सुपुत्रा आसन्। इयमात्मज्ञानोपदेशिनीनामनुत्तमा राज्ञी आसीत्।

३. ब्रह्मज्ञानोपदेशिनी सुलभा—विदेहराज-जनकायापि आत्मज्ञान-रहस्यजातं प्रदत्तवती सुलभा प्रचण्डतपस्विनी नैष्ठिकब्रह्मचारिणी ब्रह्मज्ञानज्योति:प्रकाशिताऽऽसीत्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

४. क्षत्रियाङ्गना विदुला—सौवीरदेशस्य राजमाता विदुला स्वपुत्रं सञ्जयं सिन्धुराजात् पराजितं रणभूमितः पलायितञ्च विलोक्य शौर्य्यसाहसोपदेश-प्रकाशैः प्रकाशितात्मानं कृत्वा सिन्धुराजविजेतारं प्रणीतवती। महाभारतपृष्ठेषु स्वाभिमानपरायणाया क्षत्रियाङ्गनाया विदुलाया उपदेशसारा अद्यापि भारतीयान् कर्त्तव्यलोकपथिकीकरोति।

एवम्भूताभिरुपदेशदानपरायणाभिर्नारीभिः पुराणपटलानि प्राप्तमयूखानि चकासति। देवहूति-सुरुचि-सुनीति-कयाधू-विन्ध्यावलि-सीता-सावित्री-दमयन्ती-शकुन्तला-कौशल्या-सुमित्रा-सुदक्षिणा-वृन्दादि-नारीणां जीवन-कथाधाराभिरार्द्रीकृतं भारतहृदयमद्यापि गौरवभाजनायमानं बाभासते।

(ग) तपस्विन्यो नार्यः—एवम्भूता अपि नार्यः पुराकाले जाता यासां तपांसि उपदेशापेक्षया प्रकृष्टतराण्यासन्। तासां तपोधनानां विवृतिः सङ्क्षेपतः प्रदीयते—

१. सती अरुन्धती—सूर्यवंश्यराजगुरोर्ब्रह्मर्षिवशिष्ठस्य धर्मपत्नी अरुन्धती सप्तर्षिमण्डलीय-नक्षत्रलोकेऽद्यापि अमराजरकाया वशिष्ठ-समीपवर्तिनी चकास्ति। क्वचित् प्रजापतिदक्षसुतारूपेण, क्वचिन् मेधातिथिपुत्रीत्वेन, क्वचित्तु ब्रह्मणो मानसपुत्रीत्वेन त्रैलोक्ये प्रख्याताऽरुन्धती कामक्रोधादिविकारविहीना पातिव्रत्यप्रकाशप्रदीप्ताऽऽसीत्। भगवती जानक्यपि सदैव अरुन्धतीचरणकमलाराधनपरायणाऽऽसीत्। सूर्येन्द्राग्निभिरपि अपूरितं घटं स्वेतजसा पूरितवती अरुन्धती कस्य न माननीया विभाति।

२. आत्रेयी—अनसूयाऽत्रिपुत्री आत्रेयी मातृवत् पातिव्रत्यपरायणा कामक्रोधादिविकारविवर्जिता शान्तविनम्रप्रकृतिरासीत्। सा च अग्निपुत्रस्य अङ्गिरसो महर्षेः पत्नी, अङ्गारराशिजातस्य पत्युः कठोरतमतिरस्कारपूर्ण-वचोभिर्नितरां तिरस्कृताऽपि मृदुलस्वभावं न कदापि मुमोच। अग्निपुञ्जे तपः-परायणं पतिमङ्गिरसं परुषीनदीरूपधारिणीयं तपस्विनी शीतलतरङ्गैरुपकृत्य शीतलीकृतवती।

३. गौतमी—कालिदासप्रणीते शाकुन्तले कण्वभगिनी ब्रह्मचारिणी तपस्विनीति प्रख्याता। सा खलु शकुन्तलादिकुमारीणां जीवनोपदेशिनी कामादिविकाररहिता सर्ववन्द्याऽऽसीत्। महाराजदुष्यन्तेन तिरस्कृताऽपि न गता सा विकृतिम्। इत्यहो! तस्याः सहिष्णुता विजयतेतराम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

४. अहल्या—अहेल्या = न अवहेल्या = अतिरस्करणीया एव अहल्येति कथ्यते। इयं खलु महर्षिगौतमस्य न्यायदर्शनप्रवर्तकस्य मेधाविनो धर्माङ्गना अञ्जनाया हनुमज्जनन्या: जननी आसीत्। अस्या एव पुत्रः शतानन्दो जनककुलपुरोहित: सर्वविद्यानिष्णात आसीत्।

इन्द्रेण प्रवञ्चितेयं पतिव्रता गौतमशापेन पाषाणखण्डीभूताऽपि श्रीरामचरणपङ्कजरजोविमर्शमात्रेण पाषाणत्वं विहाय पूर्ववत् निर्मलवपुरवाप।

सन्त्येवम्भूता अन्या अपि तपस्विन्यो यासां विवरणं समयाभावान्न वितन्यते।

(ध) संस्कृत-कवयित्र्यो नार्यः—सङ्गीत-साहित्य-कलादिक्षेत्रेषु परुष-हृदयपुरुषापेक्षया सहजकोमलकान्तस्वान्तासु नारीषु पर्याप्ततमं साहित्यलालित्यादीनि तत्त्वानि समुल्लासं प्राप्नुवन्ति। संस्कृतकवयित्रीकृतानि मुक्तक-प्रबन्ध-गद्य-पद्यकाव्यानि नैकानि काव्य-महाकाव्यरूपेण काव्यशास्त्रादि-ग्रन्थेषु समुद्धरणरूपेण च लभ्यन्ते। वैराग्यवत्यो बौद्धधर्मावलम्बिन्यो नार्योऽपि पालिभाषाबद्धकाव्यानि प्रणीतवत्यः, यानि थेरीगाथेति नाम्ना प्रथितानि सन्ति। सूक्तिसङ्ग्रहग्रन्थेषु सुभाषितरत्नभाण्डागार-सुभाषितरत्नावली-शार्ङ्गधरपद्धति-सूक्तिमुक्तावल्यादिषु नैकसंस्कृतकवयित्रीकृतानि काव्यानि दृश्यन्ते। विज्जका-सुभद्रा-मारुला-फल्गुहस्तिनीन्दुलेखा-शीलाभट्टारिका-विकटनितम्बादयश्चत्वा-रिंशतोऽप्यधिका: संस्कृतकाव्यनिर्मात्र्यो नार्यो यत्र तत्र समुट्टङ्किता विभान्ति।

संस्कृतकवयित्रीषु विज्जका-विकटनितम्बा-रामभद्राणां विशिष्टतमं स्थानं चकास्ति। कासाञ्चन संस्तव: समासेन प्रस्तूयते—

(१) विज्जका—इयं 'विजया'-नामान्तरेणापि विख्याता विज्जका कर्णाटनरेशस्य चन्द्रादित्यस्य धर्माङ्गनाऽऽसीत्। मम्मटाचार्येण शब्द-व्यापारविचारे, काव्यप्रकाशे च 'दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद्गृहे दास्यसि'।

धन्यासि या कथयसि प्रियसङ्गमेऽपि
रम्याणि चाटुकशतानि रतान्तरेषु।
नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्य:! शपामि यदि किञ्चिदपि स्मरामि[१]॥

१. कवीन्द्रवचनसमुच्चये, पद्यम्-५००। दशरूपकावलोके, अभिधावृत्तिमातृकायां च। काव्यप्रकाश ४/४० (वृत्तौ)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विज्जकायाः स्थितिकालः ७१०-८५० ई. मध्यवर्तीति विद्वद्भिर्निर्णीयते। निम्नाङ्कितपद्येन विज्जकाविजये अभिन्ने ज्ञायेते—

सरस्वतीव कार्णाटी विजयाङ्का जयत्यसौ।
या विदर्भगिरां वासः कालिदासादनन्तरम्[१]।।

द्वितीय-पुलकेशिनो ज्येष्ठपुत्रस्य चन्द्रादित्यस्य पत्न्या विजयभट्टारिकयाऽपि समं विज्जकायाः साम्यं स्थाप्यते। विज्जका नूनमेव सिद्धकाव्यकवनकोविदाऽऽसीत्। सहृदय-भावार्द्रहृदयोदितमार्मिकभावोद्गिरणे विज्जकायाः काव्यकलासुधा निपीयताम्—

कवेरभिप्रायमशब्दगोचरं स्फुरन्तमार्द्रेषु पदेषु केवलम्।
वदद्भिरङ्गैः स्फुटरोमविक्रियैर्जनस्य तूष्णीम्भवतोऽयमञ्जलिः।।

रससिद्धाः कवीन्द्रा नाभिधयाऽभिदधति तत्त्वम्, व्यञ्जनावीथ्या स्वाभीप्सितं विवक्षितं वा प्रकटीकुर्वन्ति कवयः। अशब्दैः रसार्द्रहृदयोदितभावव्यूहैरेव कवयो रोमाञ्चिततनुकम्पद्वाराऽऽनन्दतरङ्गरिङ्गणपुरस्सरं स्वाभिप्रायमभिप्रयन्तितराम्। विज्जका हि सरस्वतीतुल्यमात्मानं मनुते—

नीलोत्पलदलश्यामां विज्जकां मामजानता।
मुधैव दण्डिना प्रोक्तं सर्वशुक्ला सरस्वती।।

२. **सुभद्रा**—वल्लभदेवकृतायां सुभाषितावल्यामियं पद्योद्धरणद्वारा सङ्केतिताऽस्ति। राजशेखरेणापि अस्याः कविताचातुरी चारु चर्चिता। नूनमेवेयं प्रशस्तकाव्यकर्त्रीति प्रतीयते; किन्तु नास्याः काव्यं स्फुटतया समवाप्यते साम्प्रतम्। जयशेखर एनां प्रशंसति—

पार्थस्य मनसि स्थानं लेभे खलु सुभद्रया।
कवीनां च वचोवृत्तिचातुर्येण सुभद्रया[२]।।

३. **फल्गुहस्तिनी**—नास्याः कवयित्र्या नैकानि पद्यानि समीक्षाग्रन्थेषु स्फुटकाव्यतया वा समासाद्यन्ते। सुभाषितावल्यामुद्धृते द्वे पद्ये फल्गुहस्तिनीनाम्ना लभ्येते। फल्गुहस्तिन्या एकं पद्यं 'सृजति तावदशेषगुणाकरम्'

---

१. कवीन्द्रवचनसमुच्चये, पद्यम्-२९८, काव्यप्रकाशे चतुर्थोल्लासे।

२. शार्ङ्गधरपद्धतौ-८१४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्यादिरूपं भर्तृहरिनीतिशतकेऽपि दृश्यते। द्वितीयं पद्यं 'त्रिनयनजटावली-पुष्पम्' इत्यादिकं शार्ङ्गधरपद्धतिनाम्नि सूक्तिसङ्ग्रहग्रन्थेऽपि लभ्यते।

४. **विकटनितम्बा**—कश्मीरदेशवासिनीयं राजशेखरेण चारु वर्णिता—

के वैकटनितम्बेन गिरां गुम्फेन रञ्जिताः।
निन्दन्ति निजकान्तानां न मौग्ध्यमधुरं वचः[५]।।

धनिककृते दशरूपकावलोके चापलनामकस्य व्यभिचारिभावस्य विवेचने शृङ्गाररससान्द्रमस्याः पद्यमेकं समुपलभ्यते—

अन्यासु तावदुपमर्दसहासु भृङ्ग!
लोलं विनोदय मनः सुमनोलतासु।
बालामजातरजसं कलिकामकाले
व्यर्थं कदर्थयसि किं नवमल्लिकायाः।।

अनेनास्याः शृङ्गारसान्द्र-पद्य-प्रणयनपाटवं परिलक्ष्यते। नूनमनया किमपि सहृदयहृदयपेयं काव्यं प्रणीतं स्याद् यन्नाधुना दृग्गोचरायते। रीतिकालस्य धुरन्धरो महाकविः काव्यविपिनविहारी विहारी दोहामाध्यमेनास्या निरुक्तमेव पद्यमनुवदति—

'नहि पराग नहि मधुर मधु, नहि विकास एहि काल।
अली कली से ही विध्यौ, आगे कौन हवाल'।।

५. **मोरिका**—अस्या नाम्ना पद्यचतुष्टयं सूक्तिमुक्तावल्यां शार्ङ्गधरपद्धतौ च विलोक्यते। नास्मात् परं किमप्यन्यत् प्रमाणं प्राप्यतेऽस्याः काव्यकवनस्य।

६. **इन्दुलेखा**—वल्लभदेवकृतायां सुभाषितावल्यामस्या एकं पद्यं प्राप्यते। अनया प्रणीतं किमपि काव्यं नाधुना दृश्यते।

७. **मारुला**—अनया विरचितं पद्यमेकं सुभाषितावल्यां विलोक्यते। धनदेवेनापि अस्याः काव्यकलाकौशलं चित्रितम्। नास्याः काव्यं किमपि प्राप्यतेऽधुना।

८. **शीला-भट्टारिका**—धनदेवप्रणीतायां शार्ङ्गधरपद्धतौ सेयं परिचायिता। ज्ञायते यदस्या नाम शीला इत्यासीत्। कश्मीरवासिन्या अस्याः काव्यगुम्फे मधुरशब्दसौन्दर्यं रम्यार्थगाम्भीर्यं चानुभूयेते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

९. देवकुमारिका—इयं जयपुरराजकुलललनाऽऽसीत्। इयं जयपुरेश्वर-जयसिंहस्य पुत्रवधूः, अमरसिंहस्य धर्मपत्नी, सङ्ग्रामसिंहस्य च जननी आसीत्। खीष्टाब्दीयसप्तदशशत्या उत्तरार्द्धेऽष्टादशशत्याश्च पूर्वार्द्धे सेयं विद्यमानाऽऽसीत्। १७१६ ई. वर्षे वैद्यनाथप्रासादप्रशस्तिनामकं प्रशस्तिकाव्यमेकमनया कृतम्। काव्येऽत्र पञ्च प्रकरणानि द्विपञ्चाशदुत्तरं शतं पद्यानि च समुल्लसन्ति।

लघुकायमपि काव्यमेतदैतिहासिकदृष्ट्या समुपादेयं महत्त्वमण्डितञ्चास्ति। अधोलिखितपद्यद्वारा देवकुमारिकाया कमनीयकाव्यकला परिज्ञायते—

'गुञ्जद्भ्रमद्भ्रमरराजिविराजितास्यं
स्तम्बेरमाननमहं नितरां नमामि।
यत्पादपङ्कजपरागपवित्रितानां
प्रत्यूहराशय इह प्रलयं प्रयान्ति'।।

१०. मधुरवाणी—तञ्जौरनरेशस्य भूपरघुनाथस्य राजसभायां कवयित्री-रूपेण प्रख्याताऽऽसीत् मधुरवाणी। सुकविना रघुनाथेन तेलगूभाषायां रामायणग्रन्थः प्रणीत आसीत्। तेलगू-रामायणमेव मधुरवाण्या संस्कृतभाषायामनूदितम्। कमनीयकाव्यकलानिदर्शनीभूतेऽस्मिन् रामायणे चतुर्दश सर्गाः पञ्चदशशतमितानि पद्यानि च प्राप्यन्ते।

इयं मधुरवाणी रघुनाथाभ्युदयकर्त्र्या रघुनाथधर्माङ्गनाया रामभद्राम्बायाः सखी, सपत्नी, समकालोद्भूता चेति कथ्यते।

११. तिरुमलाम्बा—खीष्टाब्दीय-षोडशशताब्द्या उत्तरकाले जाता तिरुमलाम्बा विजयनगरनरेशस्य अच्युतरायस्य राज्यकाले (१५२९-१५४२) वरदाम्बिकापरिणयचम्पूनामकं ग्रन्थं प्रणिनाय। काव्ये चास्मिन् अच्युतरायवरदाम्बिकयोरुद्वाहस्य उत्तमोत्तममुदात्तं वर्णनं निभालितम्। ग्रन्थगत-सुदीर्घपुष्पिकया ज्ञायते यदियमच्युतरायस्य प्रेमसर्वस्वभाजनीभूता विश्वासभूमिश्चासीत्।

अच्युतरायपूर्वजेतिहासज्ञानरत्नाकरस्वरूपमिदं काव्यं शब्दसौष्ठवैरर्थ-प्रौढिभिश्चानुस्यूतमस्ति। तदिदं काव्यं कमनीयकाव्यकामनीयककरम्बितं रसिकमनोहरं विभाति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१२. गङ्गादेवी—वीरचम्पकरायचरितमधिकृत्य कृतस्य मथुराविजय-काव्यस्य प्रणेत्री गङ्गादेवी ऐतिहासिककाव्यकर्त्री कोमलकान्तपदावलीप्रयोक्त्री चासीत्। विजयनगरसाम्राज्यस्योद्भवविकासौ वर्णयत् काव्यमिदं सर्वजन-स्पृहणीयम्।

महाराजबुक्केन दुर्दम्ययवनैराक्रान्तयोर्भारतीयधर्मसंस्कृत्योः परित्राणं यवनदलदलनेन पौरुषप्रदर्शनेन माधवाचार्यमन्त्रणेन च कृतमिति। बुक्क-सुपुत्रस्य कम्पणदेवस्य राजमहिषीयं गङ्गादेवी प्रत्यक्षीभूतयवनपराभवघटनानां सजीववर्णनेन काव्यमिदं चित्तचमत्कारसारं कृतवती।

अत्र काव्ये वर्तते वैदर्भी-साम्राज्यं, शब्दार्थसौष्ठवगुम्फनं, प्रकृतिचारुचित्रणम्, अलङ्कारहारसौन्दर्यं, भव्यभाववैभवं, सहजकाव्यसौकुमार्यं च। मुकुलितपङ्कजं परितो गुञ्जन् भ्राम्यँश्च मधुकरो निधिं परितः पर्यटन् सावधानो द्वारपाल इव प्रतिभाति गङ्गादृष्टौ—

घटमानदलाररीपुटं नलिनं मन्दिरमिन्दिरास्पदम्।
परिपालयति स्म निक्वणन् परितो यामिकवन्मधुव्रतः।।

१३. पण्डिता क्षमाराव—१८९० खीष्टाब्दस्य जुलाईमासे चतुर्थतारिकायां लब्धजनिः पण्डिता महाराष्ट्रीयप्रख्यातविद्वत्कुले ख्यातिमवाप। अस्याः पिता पण्डित-शङ्कर-पाण्डुरङ्गः संस्कृतोद्भटमनीषी आसीत्। स्ववैदुष्यातिशयेनैव पण्डितापदं प्राप्तवती सेयम्। १९५४ ई. वर्षे दिवङ्गताऽसौ। महाकवयित्र्याऽनया पञ्चाशद् ग्रन्थाः प्रणीताः। एकाङ्किनाटकानि, चतुरङ्किनाटकम् पञ्चाङ्किनाटकम्, जीवनचरितात्मकम्, भागत्रयोपबद्धं गान्धिचरितम्, पञ्चत्रिंशल्लघुकथाः, अन्यविषयककाव्यानि च पण्डितया कृतानि। सत्याग्रहगीतामीरालहरी, रामदासचरितम्, तुकारामचरितम्, ग्रामज्योतिः, कथामुक्तावली चेति क्षमायाः प्रख्याततमानि काव्यानि विलसन्ति।

महात्मगान्धिप्रभावपरिचिताया अस्या रचनाः प्रसादमाधुर्यगुणगुम्फिताः, वैदर्भीसन्दर्भगर्भिता वर्णनशैली, हृदयहारि प्रकृतिचित्रणं, प्रवाहमयी भाषा सर्वजनहृद्या। सत्याग्रहगीतायाः प्रसादसान्द्रं पद्यमाधुर्यं पीयताम्—

भारतावनिरत्नाय सिद्धतुल्यमहात्मने।
गान्धिवंशप्रदीपाय प्रणामोऽस्तु महात्मने।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नमः स्वातन्त्र्यरूपाय देवाय परमात्मने।
यत्कटाक्षविलासेन लीयन्ते दैन्यराशयः।।

(ङ) संस्कृताभिज्ञा राज्ञ्यः—सन्ति किल नैके संस्कृतवाङ्मयोपवन-पवनशैतल्योपलालिता राजानो महाराजा राजन्याश्च कुमारदास-राजशेखर-भोजदेव-रघुनाथभूप-हर्षदेवप्रभृतयो येषां करपल्लवैर्गुम्फितानि काव्यानि भारती-मन्दिरमञ्जुलतां प्रावर्धयन्त। राज्ञ्योऽपि रामभद्राम्बा-विज्जका-गङ्गादेव्यादयः स्वप्रणीतकाव्यरत्नप्रभाभिर्वाणीमन्दिरं विभूषयाञ्चक्रुः। कासाञ्चन राज्ञीनां संस्कृतानुरागः प्रस्तूयते—

१. विज्जका—कर्णाटनरेशचन्द्रादित्यस्य राजमहिषी चेयं संस्कृतजगति नितरां विख्याता। काव्यप्रकाशस्य चतुर्थोल्लासे धनिककृत-दशरूपकावलोके च विज्जकायाः पद्यानि उद्धृतानि सन्ति। पूर्वं विवेचितं चास्याः कवित्वम्।

२. देवकुमारिका—उदयपुरराजवधूः सेयं जयसिंहस्य राजमहिषी वैद्यनाथप्रासादप्रशस्तिनामकं काव्यं प्रणिनायेति विततं वर्णनं प्राक्कृतमस्ति।

३. मधुरवाणी—इयं तञ्जौरनरेशस्य रघुनाथभूपस्य पत्नी, रामभद्रायाश्च सपत्नी, संस्कृतकवयित्री चासीत्। तेलगू-रामायणस्य संस्कृतानुवादिका चेयम्। प्राग्वर्णिताऽसौ।

४. गङ्गादेवी—राजमहिषी सेयं संस्कृतललितकवयित्री। मथुराविजय-नामकस्य काव्यस्य प्रणेत्री गङ्गादेवी वीरकम्पणरायस्य महिषी आसीत्। पूर्ववर्णिताऽसौ।

५. अवन्तिसुन्दरी—चौहानवंशीय-क्षत्रियकुलप्रसूता सेयं संस्कृत-प्राकृतभाषयोरनुपमा कवयित्री आसीत्। कविकुलालङ्कारस्य कविसमय-काव्यशास्त्रकर्तुः काव्यमीमांसाकारस्य राजशेखरस्य पत्नीयमासीत्। रसपरिपाकं भोजनपाकञ्चोपलक्ष्यास्या मतानि काव्यमीमांसायां बहुधोल्लिखितानि सन्ति।

'इयमशक्तिर्न पुनः पाक इत्यवन्तिसुन्दरी।'

हेमचन्द्राचार्येण 'देशी-शब्दकोष' इति नामकस्य ग्रन्थस्य कर्त्री अवन्तिसुन्दरीति देशिनाममालायां सङ्केतितम्। कर्पूरमञ्जरी-सट्टकस्याभिनयनमपि अस्या एव आदेशेन सञ्चालितम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

६. **रामभद्राम्बा**—तञ्जौरनरेशरघुनाथभूपमहिषी 'रघुनाथाभ्युदय'-महाकाव्यस्य च प्रणेत्री रामभद्राम्बा ललितकाव्यकलानिदर्शिकाऽस्ति। संस्कृतकवयित्रीवर्णने सेयं प्राग् वर्णिता।

किं बहुना, इत्थमेवात्यल्पपरिचयसङ्कुलाः सन्ति काश्चनान्या अपि कवयित्र्यो महिष्यश्च यासां काव्यानि केवलमनुमेयानि, कानिचन च पद्यमाणिक्यानि सुभाषितग्रन्थेष्वेव दृश्यन्ते विकीर्णानि। वस्तुतः कवयित्रीणां सुरगवीसाहित्यप्रसाधिनीनामुपरि समालोचकलोचनसमालोचनस्य नितरामावश्यकता प्रतिभाति। विद्यामन्दिरेषु षष्ठकक्षातः स्नातकोत्तरकक्षां यावत्, प्राच्यसंस्कृतपरीक्षावीथ्याञ्च प्रथमात आचार्यपरीक्षाञ्च यावद् वीराङ्गनानां लक्ष्मीबाई-चाँदबीबी-पद्मिनीप्रभृतीनामिव प्रशासनपटूनाम् एनीबेसेण्ट-सरोजिनीनायडू-विजयलक्ष्मी-कमलानेहरू-सुचेताकृपलानी-श्रीमतीन्दिरागान्धि-प्रभृतीनामिव, हिन्दीसाहित्यकवयित्रीणां मीराबाई-सुभद्राकुमारीचौहान-महादेवीवर्मप्रभृतीनामिव च गीर्वाणवाणीवाटिका-प्रसाधनैकधनानां सुललितकाव्यकलाकलापकवनकुशलानां कवयित्रीणामपि तास्ता यत्र कुत्रापि समुद्धृताः कविताः काव्यसङ्कलिताश्चांशा निर्धारणीयाः पाठ्यग्रन्थरूपाः।

एवं रीत्या स्वतन्त्रभारतेऽस्मिन् स्त्रीशिक्षाप्रोत्साहनपरे नारीसमुन्नयनात्मके च काले विद्यालयेषु पठन्तीनां पाठयन्तीनां शोधमनुतिष्ठन्तीनां च नारीणां मानसपटलेषु स्वपूर्ववर्तिसंस्कृतज्ञकवयित्री-राज्ञीजनाध्यवसायाच्छच्छाया सङ्क्रान्ता भवेत्। पूर्वजानुगमनं विधाय सुरभारतीभवनप्रसाधनाय संस्कृतकविताविताताय च प्रोत्साहनसम्पदतुला समधिगता जायतां, साम्प्रतिकोऽधुनातनश्चायं भारतीयो वैदेशिकश्च समाजपरिसरः संस्कृतविदुषी-वैदुष्यसौरभसारसंस्तुतश्च जायतामिति नोऽभिलाषः।

भूयसीनां कवयित्रीणां तु स्वतन्त्रग्रन्था अनुमेयकोटितामेवाटीकन्ते, नोपलभ्यास्ते। अत एव तासां निष्पक्षसमीक्षणं कर्तुं नैव पारयामो वयम्। प्रायो नारीजनसुकुमारहृदयोचितशृङ्गाररसमेव प्रधानीकृत्य विहसन्ती तासां कवितावल्लरी परिस्फुरन्ती चकास्तितराम्। मानवीयं प्राकृतिकञ्च प्रेमपरिपाकवर्णनं तासां समलङ्कृतशब्दस्तबकेषु पदं सन्धत्ते। यद्यपि कासाञ्चन कविता न समुत्कृष्टकोटिमालम्बन्ते न वा नवार्थवाहिन्यो मौलिकभावोद्भाविन्यो वा; तथापि कासाञ्चित् तु (विज्जका-देवकुमारिका-विकटनितम्बा-गङ्गादेवी-रामभद्राम्बा-प्रभृतीनां) कवितावनिता—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'पदक्वणन्नूपुरनादमाधुरी-धुरीणभावानिव साधयन्ती।
विभाति चित्तेषु रसान्वितानां समूढकाव्याङ्कुरभूषितानाम्[१]॥'

याथार्थ्यतः सरसजनमनोऽनुरञ्जनक्षम-काव्यानुशीलनधिया कवयित्री-कदम्बकृतानां मुक्तक-प्रबन्ध-नाट्य-चम्पू-गद्यादिकाव्यानां मूल्याङ्कनस्य परमावश्यकता नूनमेव समीक्षण-परीक्षण-विलक्षण-विचक्षणान् लक्षितलक्षणान् प्रतिक्षणं प्रतीक्षते विप्रलब्धेव प्रवासिनो दयितजनान्!!

अनल्पभावावलितल्पकल्पिता
अकल्प्यशिल्पोत्थकलाविजल्पिताः।
विभान्ति योषिज्जनपाणिपल्लवो-
पलालिताः काव्यकला विलोलिताः[२]॥ इति शम्।

१. स्वप्रणीतम्; २. स्वप्रणीतम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पञ्चमो नाट्यवेदः

डॉ. (श्रीमती) प्रीतिसिन्हा
उपाचार्या, संस्कृत एवं प्राकृतभाषा-विभागस्य,
लखनऊ-विश्वविद्यालये, लखनऊ

❋❋❋

भारतीयसांस्कृतिकपरम्परायां वेदोऽपौरुषेयो ज्ञानराशिरिति स्वीक्रियते। इतो विपरीतं वेबर[१]-मैक्सम्यूलर[२]-विण्टरनित्ज[३]प्रभृतयः कतिपये पाश्चात्य-विद्वांसस्तं पौरुषेयं मन्वानास्तस्याविर्भावकालस्य विषये इयत्ताया विषये तद्द्रष्टॄणां च विषये मतभेदं धारयन्तीति अन्यदेतत्।

भरतमुनिर्नाट्यशास्त्रनामके स्वकीये लक्षणग्रन्थे नाट्यविधां वेदकोटिगतां मन्वानस्तत्प्रतिपादनपरं स्वीयं नाट्यशास्त्रं नाट्याख्यं पञ्चमं वेदं घोषितवान्[४]।

---

१. .....The songs of the 'Rik', or the majority of them, were composed on the banks of the Indus.....at what time it is difficult to say. Some portions come down to an age so recent, the system of caste had already been organized. H.I.L. (Wever), p.10

२. We cannot hesitate as to the general fact that the ten books ot the Rig-veda at the time they were finally collected comprised, the poetry of two different periods........I therefore fix the probable chronological limits if the Mantra period between 800 and 1000 B.C. H.A.S.L., p.454-55

३. Buddhism is nothing but a reaction against Brahmanism and it presupposes the existence of the whole Veda, i.e. of the literatur consisting of the hymns, the Brahmanas, the Aryanyakas and Upnishads. The entire literature must have originated before Buddhism i.e. before 500 B.C......Max Muller has proved 1200 to 1000 B.C. to the date of Rig-Veda. H.I.L. (Winternitz), p.272-73.

४. सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्तकम्। नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम्॥ (नाट्यशास्त्रम्, १.१५)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नाट्यस्य वेदत्वविचारणाप्रसङ्गेऽत्र नाट्यपरम्परायाश्चर्चा क्रियते। अस्मिन्नेव च प्रसङ्गे वेदस्य महत्त्वं निरूप्य वेदात्मत्वेन नाट्यस्य मूल्याङ्कनं करिष्यते।

नाट्यकलाया ऐतिहासिकपरम्परा काऽऽसीत्, अथवा नाट्यशब्दस्य सर्वप्रथमं प्रयोगः कदा केन च कृत इति निर्धारणं दुष्करमस्ति। काले काले एतादृश्यो जातय भारतमाजग्मुर्यासां भाषा-संस्कृति-सभ्यता भारतीय-भाषासंस्कृतिसभ्यताभ्यः सर्वथा भिन्ना आसन्। एतासु बाह्यासु जातिषु शक-कुषाणाद्याः काश्चन जातयो भारतीयां संस्कृतिमङ्गीकृतवत्यः। परं हूणप्रभृतयः काश्चनात्रत्यायाः संस्कृतेः परम्परायाश्च भृशं क्षतिमापादयामासुः। सामाजिक-परिवर्तनस्यैतादृश्यां स्थितौ कस्यापि शास्त्रस्य पूर्णरूपेण सुरक्षणमभूदिति सन्दिग्धमस्ति। तथापि समुपलब्धैः साक्ष्यैर्निश्चप्रचमिदं वक्तुं शक्यते यद् वैदिके युगे नाट्यकला लोकप्रिया आसीत्।

ऋग्वेदे एतादृश्यो बह्वय ऋच उपलभ्यन्ते, यासु नाट्यकलाया उपकारिकासु ऋक्षु नृत्यस्य वाद्यस्य चोल्लेखो दृश्यते। नृत्यस्य प्रचलनं न केवलं मानवसमाज एवाभूत्, प्रत्युत देवगणेऽप्यासीत्।

प्रपृक्षेण्यमिन्द्र त्वे ह्योजो नृम्णानि च नृतमानो अमर्तः।
स एनीं वसवानो रयिं दाः प्रार्यः स्तुषे तुविमघस्य दानम्[1]॥

सायणाचार्योऽस्यामृचायां प्रयुक्तं नृतमानपदमित्थं व्याख्याति— 'नृतमानो देवताः'[2]। ततश्च शुक्लयजुर्वेदस्य वाजसनेयिसंहिताया-स्त्रिंशत्तमाध्यायस्य षष्ठ्यां कण्डिकायां निर्दिष्टं यद् यज्ञस्य विभिन्नेष्ववसरेषु नृत्ताय सूताः, गीताय शैलूषाः, मनोरञ्जनाय च विनोदनशीला जना नियोक्तव्याः[3]।

अथर्ववेदगतस्य पृथ्वीसूक्तस्यैकस्मिन् मन्त्रे गानस्य नृत्यस्य चोल्लेखो विद्यते[4]। संहितास्विव ब्राह्मणारण्यकोपनिषत्सु वेदाङ्गेषु चापि नाट्यसङ्गीत-विषयिणी सामग्री प्रकीर्णा दृश्यते। कौषीतकिब्राह्मणस्यैकस्मिन् स्थले शिल्पस्य त्रयो भेदा निर्दिष्टाः—नृत्यं गीतं वाद्यं चेति[5]। एवमेव तैत्तिरीयब्राह्मणेऽपि

१. ऋग्वेदः-५/३३/६; २. तदेव, सायणभाष्यम्।

३. नृत्ताय सूतं, गीताय शैलूषं, धर्माय सभाचरं, नरिष्ठायै भीमलं, नर्माय रेभं, हसाय कारिमानन्दाय स्त्रीषखं, प्रमदे कुमारीपुत्रं, मेधायै रथकारं, धैर्याय तक्षाणम्।
शु.य.(वा.सं.) ३०/६।

४. यस्यां गायन्ति नृत्यन्ति भूम्यां मर्त्याः व्यैलबाः। (अथर्ववेदः, १२/१/४१)

५. त्रिवृद्वै शिल्पं नृत्यं गीतं वादित्रमिति। (कौ.ब्रा. २९/५)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आयोगू-मागध-सूत-शैलूषादीनामुल्लेखो लभ्यते[१]। वेदाङ्गेष्वपि नाट्याङ्गभूतानां नृत्यगीतादिकलानां चर्चाऽस्ति। पारस्करगृह्यसूत्रे एतादृशेषु कलासमारोहेषु स्नातकस्य प्रेक्षकता निषिद्धास्ति[२]। अनन्तरकाले तु धर्मशास्त्रेष्वपि इदं विधानं प्रविष्टम्। इत उत्तरवर्तिकाले[३] रामायण[४]महाभारताख्ययोरार्षकाव्ययोर्नाट्यशास्त्रस्य न केवलं पारिभाषिकशब्दावल्येव स्वीकृता, प्रत्युत नाट्यस्य प्रयोगाणामप्युल्लेखोऽभूत्। ख्रिस्तपूर्वं पञ्चम्यां शताब्द्यां विख्यातनाटककारस्य महाकविभासस्य विविधासु नाट्यविधासु रचिता रचना नाट्यस्य विकसितपरम्परां प्रमाणयन्ति।

इत्थं नाट्यकलाया ऐतिहासिक-विकासक्रमस्य दृष्ट्या एतत्स्वीकर्तुं शक्यते यद् वैदिककाले नाट्यस्य सत्ता येन केनापि रूपेणावश्यमासीत्। लक्ष्यग्रन्थानक्षिलक्ष्यीकृत्यैव लक्षणग्रन्थानां रचना भवति। अत एतदपि स्वीकरणीयं भवत्येव यत्तस्मिन् काले नाट्यशास्त्रसम्बद्धः कश्चिद् ग्रन्थोऽप्यवश्यं रचितः स्यादेव। एतदन्यद् यत् सम्प्रति नाट्यसम्बद्धः प्राचीनकालिकः कश्चिद् ग्रन्थः सुरक्षितो नास्ति। पाणिनिकृतायामष्टाध्याय्यां **'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः'**[५] इति सूत्रेण तथा **'कर्मन्दकृशाश्वादिनिः'**[६] इति सूत्रेण च सिद्ध्यति यत् ख्रिस्तात् पञ्चभ्यो वर्षशतकेभ्यः पूर्वं शिलालिना कृशाश्वेन च सूत्रशैल्या रचितौ नटसम्बन्धिनौ द्वौ ग्रन्थौ उपलब्धावास्ताम्। ततस्तदनन्तरवर्तिन्यां नाट्यशास्त्रीयग्रन्थपरम्परायामुपलभ्यमानः प्राचीनतमो ग्रन्थो भरतविरचितं नाट्यशास्त्रमेवास्ति। अस्य रचनाकालः ख्रिस्ताद् द्वाभ्यां वर्षशतकाभ्यां पूर्वं मन्यते।

भावप्रकाशनस्य रचयिता शारदातनयः स्वीयेऽस्मिन् लक्षणग्रन्थे नाट्यशास्त्रकारेण भरतेन सह वृद्धभरतनामकस्य कस्यचिदन्यस्य

---

१. (अ) ब्रह्मणे ब्राह्मणमालभते। क्षत्राय राजन्यम्। मरुद्भ्यो वैश्यम्। तपसे शूद्रम्। आक्रायायायोगूम्। कामाय पुँश्चलम्। अतिक्रुष्टाय मागधम्। (तै.ब्रा. ३/४/१/१५)
(ब) गीताय सूतं नृत्याय शैलूषम्। (तत्रैव-३/४/१/२)

२. स्नातस्य यमान्वक्ष्यामः.....नृत्यगीतवादित्राणि न कुर्यान्न च गच्छेत्। (पा.गृ.सू. ३/४/१/२)

३. सूतमागधसम्बाधां श्रीमतीमतुलप्रभाम्।
वधूनाटकसङ्घैश्च संयुक्तां सर्वतः पुरीम्।।
पुरीमावासयामास राजा दशरथस्तदा।। (वाल्मीकि-रामायणम्, १/११,१२,२२)

४. तत्र यज्ञे वर्तमाने सुनाट्येन नटस्तदा।
महर्षींस्तोषयामास भद्रनामेति नामतः।। (हरिवंशम्-२/९१/२६)

५. अष्टाध्यायी-४/३/११०; ६. तत्रैव-४/३/१११।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नाट्यशास्त्रकारस्य नामोल्लेखं चकार[१]। शारदातनयानुसारेण नाट्यशास्त्रस्य प्राचीनपरम्परायां द्वौ प्रामाणिकग्रन्थावभूताम्। एकस्तावन्नाट्यवेदः, यस्य प्रणयनं वृद्धभरतः कृतवान्। अयं द्वादशसाहस्त्रीसंहितारूपेणासीत्। द्वितीयश्च ग्रन्थो नाट्यशास्त्रमस्ति, यस्य प्रणयनं भरतश्चकार। अयं ग्रन्थः षट्साहस्त्री-संहितारूपेणोपलब्धोऽस्ति[२]। अत्र शारदातनयेन वृद्धभरतस्य कृते दत्तं 'वृद्ध' इति विशेषणं नाट्यशास्त्रकारस्य भरतस्यापेक्षया तस्य ज्येष्ठत्वं सूचयति। एतेनानुमीयते यद् वृद्धभरतरचितस्य नाट्यवेदस्य कालो भरतात् पूर्वं ख्रिस्तपूर्वतृतीयशतके बभूवेति। भरतनाट्यशास्त्रस्यान्तःसाक्ष्यैरप्येतस्य पुष्टिर्भवति। स्वयं भरतः पञ्चदशश्लोकान् षोडश आचार्यांश्च वंशानुक्रमतः प्राप्तवान्। प्रायेण उपशतं श्लोका एतादृशाः सन्ति ये भरतमुनिना—'अत्र श्लोकाः' 'अत्रार्याः'[३] इत्येवं निर्देशसहितमुद्धृताः। एतान् श्लोकान् विशदीकुर्वन् अभिनवभारतीकार आचार्योऽभिनवगुप्त एतदेवाङ्गीकृतवान् यदिमे श्लोका भरतेन आचार्यपरम्परया शिष्यपरम्परया च प्राप्ता इति[४]। भरतः स्वस्मात् पूर्ववर्तिनो बहून् नाट्याचार्यान् नामतः स्मृतवान्। नाट्यशास्त्रस्यान्तिमेऽध्याये कोहल-वात्स्य-शाण्डिल्य-धूर्तिलाख्यानां पूर्वाचार्याणामेकत्रोल्लेखोऽभूत्[५]।

अस्यामेव परम्परायां सदाशिव-पद्मभू-द्रौहिणि-आञ्जनेया-दीनामप्युल्लेखोऽभूत्। शारदातनय[६] एतान् नाट्याचार्यत्वेन सस्मार। अन्यत्र

---

१. तथा भरतवृद्धेन कथितं गद्यमीदृशम्। (भावप्रकाशनम्, पृ. ५२)

२. एकं द्वादशसाहस्त्रैः श्लोकैरेतदर्धतः।
षड्भिः श्लोकसहस्त्रैर्यो नाट्यवेदस्य सङ्ग्रहः।
भरतैर्नामतस्तेषां प्रख्यातो भरताह्वयः।। (तत्रैव-१०, पृ. ४१९)

३. अत्रानुवंश्यौ श्लोकौ भवतः। (नाट्यशास्त्रम्-६/३१ इत्यस्य गद्यभागः, पृ० २८७)

४. अनुवंशे भवौ शिष्याचार्यपरम्परासु वर्तमानौ श्लोकाख्यौ वृत्तविशेषौ सूत्रार्थसङ्क्षेप-प्रकटीकरणेन कारिकाशब्दवाच्यौ भवतः।
(तत्रैव (अभि.भा.) प्रथमभागः, पृ. २८७)

५. कोहलादिभिरेवं तु वात्स्यशाण्डिल्यधूर्तिलैः।
एतच्छास्त्रं प्रणीतं हि नराणां बुद्धिवर्धनम्।। (नाट्यशास्त्रम्, ३७/२४,२५)

६. प्रीतस्सोऽपि सदाशिवस्य शिवयोर्गौर्या मतं वासुके-
र्वाग्देव्या अपि नारदस्य च मुनेः कुम्भोद्भवव्यासयोः।
शिष्याणां भरतस्य यानि च मतान्यध्याप्य तान्यञ्जना-
सूनोरप्यथ नाट्यवेदमखिलं सम्यक्तमध्यापयत्।। (भावप्रकाशनम्, अ. १, पृ. ३)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अश्मकुट्ट[1]-नखकुट्ट[2]-नामकयोराचार्ययोरुद्धरणानि लभ्यन्ते। एतेषां नामोल्लेखं भरतः पुत्रशतसूचिमध्येऽकार्षीत्[3]। इत्थं कोहलात् नखकुट्टपर्यन्तया आचार्यपरम्परया निश्चीयते यद् भरताद् बहोः कालात् पूर्वमेव नाट्यकलाविषयकाणां बहूनां ग्रन्थानां प्रणयनमभूत्।

नाट्यस्य वेदत्वविषयाया विचारणायाः प्रसङ्गे सर्वप्रथममयं प्रश्नः समुदेति—यदा भरतस्य प्राग्वर्तिकाले नाट्यशास्त्रस्यैका विकसिता परम्परा विद्यमानाभूत्, नाट्यविषयकं साहित्यं चाभूत्तदा भरतनाट्यशास्त्रस्य कृते 'पञ्चमवेदः' इति नवीनसंज्ञायाः का आवश्यकता समापतिता? किमस्या विशिष्टसंज्ञायाः कृते तदानीन्तनसामाजिकपरिस्थितयः प्रायोजिका बभूवुः? आहोस्विद् भरतः शास्त्रमिदं नवीनदृष्ट्या दृष्ट्वात्र सर्वाण्यपि वेदस्य वैशिष्ट्यान्यनुभूय तथा कृतवान्। प्रकृतस्यास्य प्रश्नस्योत्तरमुभयथापि महत्त्वपूर्णमस्ति।

एतत्तु सत्यमस्ति यदितिहासस्य दृष्ट्या नाट्यशास्त्रस्य विकासो निरन्तरं प्रवर्तमानो बभूव, तथापि ख्रिस्तपूर्वं षष्ठ्यां शताब्द्यां जैन-बौद्ध-मतयोः प्रतिष्ठावशात् तद्युगीनानां वैदेशिकानामागमनकारणात् प्रचलितकर्मकाण्डस्य जटिलताकारणाच्चैतत् प्रतीयते यत् तदानीं वेदस्य प्रभुता प्रामाणिकता च किञ्चित् सन्दिग्धा जाता, जनाश्च शाश्वतोऽपौरुषेयो ज्ञानराशिरयमिति मान्यतां प्रति दृढामास्थां शिथिलयाञ्चक्रिरे। सम्भवतोऽस्यां स्थितौ सामाजिकस्योत्तरदायित्वस्य निर्वाहाय वैदिकधर्मस्य मान्यतास्थिरीकरणाय नाट्यशास्त्रस्यापारसम्पद्रक्षणाय च भरतो नाट्यविधया सह 'वेद' इति श्रद्धास्पदं पदं योजयितुं प्रवृत्तोऽभूत्। धर्मप्रवणानां देशवासिनां कृतेऽस्य विषयस्य प्रभुतामापादयितुं तेनैकस्याः कथाया आश्रयो गृहीतः। तां चेत्थं नाट्योत्पत्तिप्रसङ्गे स उक्तवान्—त्रेतायुगे मनुष्येषु यदा ग्राम्यधर्मा वृद्धिं गतास्तदा जनाः परस्परमीर्ष्यायाः क्रोधस्य च कारणाद् भृशं सुखदुःखाक्रान्ता बभूवुः। लोकपालैः प्रतिष्ठापितं जम्बूद्वीपं यदा देव-दानव-गन्धर्व-यक्ष-राक्षसैर्नागैश्चाक्रान्तं तदा इन्द्रप्रभृतयो देवा भगवन्तं ब्रह्माणमुपेत्य प्रार्थयाञ्चक्रुः—

---

१. अरातेरपचयपरम्परा नियता च फलप्राप्तिरिति अश्मकुट्टः। (ना.र.को., पृ. १०)

२. नखकुट्टस्त्वाह—दिव्यमानुषसंयोगस्तोटकं नाटकार्थकम्। (तत्रैव, पृ. २६२)

३. नखकुट्टाश्मकुट्टौ च षट्पदं सोत्तमं तथा। (नाट्यशास्त्रम्-१/३३)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भगवन्! किञ्चिदेतादृशं वेदरूपं क्रीडनीयकं भवद्भिर्विरच्यमानमिच्छामो येन सर्वेषां वर्णानामुत्तमाधमजातीयानां सर्वेषां जनानाञ्च मनोरञ्जनं भवेत्, यच्चैवं सार्ववर्णिकं सद् दृश्यश्रव्यगुणोपेतं स्यात्[1]।

एवमिन्द्रपुरागैर्देवैः प्रार्थितो भगवान् ब्रह्मा समाधिमास्थाय चतुरो वेदान् सस्मार। तत्र ऋग्वेदात् पाठ्यं (संवादं) सामवेदाद् गीतं यजुर्वेदादभिनयान् अथर्ववेदाच्च रसान् जग्राह। इत्थं वेदेभ्य आवश्यकसामग्रीं सङ्गृह्य ब्रह्मा पञ्चमं नाट्यवेदं ससर्ज[2]। अत्र पाठ्यांशेन ऋग्वेदगता इन्द्रमरुतोः[3], विश्वामित्रनद्योः[4], यमयम्योः[5], उर्वशीपुरूरवसोश्च[6] संवादा अभिप्रेताः सन्ति, यत्र मनोहराः काव्यात्मकाः संलापा दृश्यन्ते। सामवेदाद् गेयांशग्रहणस्य कारणमिदमस्ति यत्तस्मिन् सङ्गीतसमृद्धिरस्ति। तत्र हि उद्गातेत्याख्यः ऋत्विग् विभिन्नैर्गानैः सह वेदमन्त्राणां सस्वरपाठं करोति। यजुर्वेदाच्चाभिनयग्रहणस्य कारणमस्ति यत्तत्र यज्ञस्य धार्मिकानुष्ठानक्रियाणां चाध्वर्युनाम्ना ऋत्विजो हस्तसञ्चालनेन अन्यैश्चाङ्गिकैः सङ्केतैरभिव्यक्तीकरणं करणीयमिति विहितमस्ति। अथर्ववेदाद् रसग्रहणस्य कारणमस्ति यत्तत्र मारणमोहनोच्चाटनवशीकरणविषयाः सन्ति, ये रौद्र-शृङ्गार-करुणाद्भुतादीन् रसानभिव्यञ्जयन्ति। इत्थं सम्भावयामो यच्चतुर्भ्यो

---

१. पूर्वं कृतयुगे विप्रा वृत्ते स्वायम्भुवेऽन्तरे।
त्रेतायुगे सम्प्रवृत्ते मनोर्वैवस्वतस्य तु॥
ग्राम्यधर्मे प्रवृत्ते तु कामलोभवशङ्गते।
ईर्ष्याक्रोधादिसम्मूढे लोके सुखितदुःखिते॥
देवदानवगन्धर्वै रक्षोयक्षमहोरगैः।
जम्बूद्वीपे समाक्रान्ते लोकपालप्रतिष्ठिते॥
महेन्द्रप्रमुखैर्देवैरुक्तः किल पितामहः।
क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद् भवेत्॥
न वेदव्यवहारोऽयं संश्राव्यः शूद्रजातिषु।
तस्मात्सृजापरं वेदं पञ्चमं सार्ववर्णिकम्॥ (नाट्यशास्त्रम्-१/८-१२)

२. जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि॥ (तत्रैव १/१७)

३. ऋग्वेदः-१/१६५; ४. तत्रैव-३/३३।

५. तत्रैव-१०/१०; ६. तत्रैव-१०/९५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वेदेभ्यः सारसङ्ग्रहकारणाद् विरच्यमानेयं नाट्यविधा वेदसदृशीं मान्यतां प्राप, शनैः शनैश्चैषा पञ्चमवेदत्वेन प्रतिष्ठामधिजगाम।

नाट्यवेदोऽयं केषुचिदर्थेषु प्रसिद्धवेदेभ्य विशिष्टोऽपि परिलक्ष्यते। यथान्ये वेदाः शब्दप्रधानाः सन्ति, नाट्यवेदस्तु व्यञ्जकशब्दप्रधानो रसप्रधानश्चास्ति। कविप्रयुक्तस्य व्यञ्जकशब्दस्य प्रसङ्गौचित्यानुसारितया कोऽप्यन्यः पर्यायशब्दो विकल्पः स्थानापन्नो वा न भवितुमर्हतीति इतरवेदगतः शब्दानुपूर्वीरूपो विशेषोऽत्राप्यस्त्येव। एतेनैकतोऽस्य वेदवत् शब्दप्रधानता द्योतिता भवत्यपरतश्च रसपेशलतापि।

वेदो हि मूलतः स्तुतिरूपोऽस्ति, नाट्यवेदस्तु लोकस्य सर्वप्रवृत्तिवर्णनपरो भवति[1]। अयं धनाढ्यानां कृते विलासेन, दुःखितानां कृते स्थैर्येण, अर्थाभिलाषिणां कृते अर्थेन, उद्विग्नचेतसां च कृते धैर्येण समन्वितो भवति[2]। नाट्याचार्यस्य भरतमुनेः कथनमस्ति यत्तत्किमपि शिल्पं ज्ञानं विद्या कला योगः कर्म वा नास्ति यदस्मिन्नाट्ये न दृश्यते[3]। यावन्त्यपि शास्त्राणि शिल्पानि वा सन्ति, येऽपि वा कर्मव्यापाराः सन्ति, ते सर्वे नाटके प्रदर्शयितुं शक्यन्ते। अस्य महतो नाट्यवेदस्योद्देश्यं विशदीकुर्वता भरतमुनिना कथितं यद् वेदेतिहासाख्यानकल्पनाविलसितोऽयं नाट्यवेदो लोकस्य मनोरञ्जनहेतुर्भविष्यति, सदाचारोपदेशहेतुश्च[4]। यतोऽत्र पूर्वोक्तविषयातिरिक्तं श्रुतिस्मृतिसदाचाराणां परिशेषस्य (आत्मने रोचमानस्य प्रियस्य) अर्थस्य च कल्पना कृता भवति[5]।

---

१. त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्। (नाट्यशास्त्रम्, १.१०७)

२. ईश्वराणां विलासश्च स्थैर्यं दुःखार्दितस्य च।
अर्थोपजीविनामर्थो धृतिरुद्विग्नचेतसाम्।। (तत्रैव-१.१११)

३. न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।। (तत्रैव-१.११६)

४. सर्वशास्त्राणि शिल्पानि कर्माणि विविधानि च।
अस्मिन्नाट्ये समेतानि तस्मादेतन्मया कृतम्।। (तत्रैव-१.११७)

५. (अ) वेदविद्येतिहासानामाख्यानपरिकल्पनम्। विनोदकरणं लोके नाट्यमेतद् भविष्यति।।
(ब) श्रुतिस्मृतिसदाचारपरिशेषार्थकल्पनम्। विनोदजननं लोके नाट्यमेतद् भविष्यति।।
(तत्रैव-१.१२० तथा पादटिप्पणी)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इतोऽतिरिक्तं नाट्यवेदे वेदस्यान्यानि लक्षणान्यपि लभ्यन्ते। वेदस्य वेदताविषये प्रोक्तं यत्—

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता[१]।।

अर्थाद् वेदो यज्ञादिरूपान् एतादृशानुपायान् वेदयति यैरुपेयः स्वर्गोऽधिगम्यते, स चोपायो न तु प्रत्यक्षेणाधिगम्यते न चानुमानेन[२]। वेदस्यास्यां कषवट्यां नाट्यवेदो निकष्यते चेत् प्रतीयते यदत्रापि विभावानुभावव्यभिचारिरूपाणि अलौकिकसाधनानि सन्ति, यानि प्रत्यक्षेण वानुमानेन वा न सिद्ध्यन्ति। एतैश्चाभिव्यक्ता स्वर्गसुखसब्रह्मचारिणी लोकोत्तरकाव्यरसचर्वणापि प्रत्यक्षेणानुमानेन वा साध्या नास्ति।

इत्थं विभावानुभावसञ्चारिभिरभिव्यक्तस्य लोकोत्तरस्य विगलितवेद्यान्तरस्य ब्रह्मानन्दसहोदरस्य रसस्यानुभूतिर्नाट्यवेदेन साध्यत इत्यस्त्येवात्रापि वेदत्वम्। अभिनवगुप्तस्य कथनमस्ति यत् नाट्यमेव रसोऽस्ति, रस एव च नाट्यमस्ति[३]। उभयाभावरूपस्य रसस्य उभयात्मकत्वमपि तस्यालौकिकत्वमस्ति[४]।

'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेदः'[५]— एतल्लक्षणानुसारेण यदि नाट्यवेदस्य मूल्याङ्कनं क्रियते प्रतीयते स वेदवत् सहृदयसामाजिकानां कृते यथा अलौकिकानन्दरूपमिष्टं प्रापयति, तथैव कान्तासम्मितोपदेशशैल्या दुराचारात् कलहाद् व्यसनादिभ्यश्चानिष्टेभ्यो निवारयति[६]।

---

१. ऋ.भा.भू., पृ. ४५।

२. शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः।
अर्थस्य व्यञ्जकत्वे तत् शब्दस्य सहकारिता।। (काव्यप्रकाशः-३/२३)

३. नाट्यात्समुदायरूपाद्रसाः। यदि वा नाट्यमेव रसाः। (नाट्यशास्त्रम्-६/३३)
रससमुदायो हि नाट्यम्। (अभि.भा., प्रथमभागः, पृ. २८८)

४. उभयाभावस्वरूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति, न तु विरोधमिति श्रीमदाचार्याभिनवगुप्तपादाः। (काव्यप्रकाशः-४/२८ वृत्तिः, पृ. ९५)

५. ऋ.भा.भू., पृ. २।

६. काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा।। (हितोपदेशः-१/१)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्थमेव विषयाधिकारि-प्रयोजन-सम्बन्ध-दृष्ट्यापि नाट्यवेदस्य वेदता न हीयते। विषयस्य दृष्ट्या नाट्यवेदस्य वेदत्वमिदमस्ति यद् यथा वेदः स्वर्गप्राप्तेरात्मसाक्षात्कारस्य चोपायं वेदयति, तथैव नाट्यवेदोऽपि धर्मार्थकाममोक्षफलदोऽस्तीति आचार्यनन्दिकेश्वरस्य मतमस्ति[१]। सहृदयस्य तन्मयीभावपूर्वकं विगलितवेद्यान्तरा रसानुभूतिरेवात्र मोक्षपदवाच्या मन्तव्या। तदनुसारेण नाट्यं न केवलं पारलौकिकस्य निःश्रेयसरूपस्य ब्रह्मानन्दस्य प्रदाताऽस्ति, प्रत्युत ततोऽप्यधिकं मतम्[२]।

वेदाध्ययनस्याधिकारिणः सम्बन्धे कथ्यते यत्—'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा', अर्थात् स्त्रीणां शूद्राणां सावित्रीपतितानां द्विजानां व्रात्यानां वा कृते वेदाध्ययनं निषिद्धमस्ति[३]। इतो विपरीतं नाट्यं तु सार्ववर्णिकमस्ति। इदं स्त्रीणां शूद्राणामन्येषां च नानाजातीयानां जनानां कृते प्राप्तव्यमस्ति[४]।

एवमेव प्रयोजनदृष्ट्याापि नाट्यस्य वेदता सिद्धाऽस्ति। स्वराणामुदात्तानुदात्तस्वरितानामुचितपाठेन वेदो यद्यपूर्वं (अदृष्टं) साधयति, स्वर्गप्राप्तिम्, आत्मज्ञानं च कारयति चेत्, नाट्यमपि पात्रानुकूलैः कथोपकथनैर्वृत्तिभिः काक्वादिस्वरैश्च अलौकिकीमानन्दानुभूतिं कारयति[५]। कविकुलगुरोः कालिदासस्य कथनमस्ति यद् विद्यानां परिशीलनमदृष्टेऽर्थे सहायकं भवति। तदनुसारितयैव पूर्वजन्मसंस्कारकारणात् पार्वती सर्वा विद्याः सहजमेव

---

१. व्यरीरचच्छास्त्रमिदं धर्मकामार्थमोक्षदम्। (भा.ना.प.अभि.द. ८, पृ. १९२)

२. दुःखार्तिशोकनिर्वेदखेदविच्छेदकारणम्।
अपि ब्रह्मपरानन्दादिदमप्यधिकं मतम्॥ (तत्रैव-१०, पृ. १९३)

३. गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः॥
अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः॥ (मनुस्मृतिः-२/३६,३९)

४. न वेदव्यवहारोऽयं संश्राव्यः शूद्रजातिषु।
तस्मात्सृजापरं वेदं पञ्चमं सार्ववर्णिकम्॥ (नाट्यशास्त्रम्-१/१२)

५. यस्तु स्वप्नेऽपि न स्वशब्दवाच्यो न लौकिकव्यवहारपतितः; किन्तु शब्दसमर्प्यमाणहृदयसंवादसुन्दरविभावानुभावसमुचितप्राग्विनिविष्टरत्यादिवासनानुरागसुकुमारस्वसंविदानन्दवर्णव्यापाररसनीयरूपो रसः। (ध्वन्यालोकः-१/४ (लोचने) पृ. १८)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्राप्तवती[१]। आचार्यस्याभिनवगुप्तस्य मतमस्ति यदलौकिकानन्दस्य चर्वणा नाट्यस्य मुख्यं प्रयोजनमस्ति। तन्मतेन नाट्यं रसस्य पर्यायोऽस्ति[२]।

प्रभुसम्मितशैलीकारणात् वेदाः शब्दप्रधाना भवन्ति। वेदाधिकारिणोर्मध्ये पाठ्यपाठकसम्बन्धो भवति। इतो भिन्नं नाट्यं कान्तासम्मितोपदेशशैल्या रसप्रधानं भवति। अतो नाट्यसहृदययोर्मध्ये कश्चिद् अनिर्वचनीयः पाठ्यपाठकसम्बन्धो भवति, यः केवलमनुभूत्याश्रितो भवति। उपचारतोऽनयोर्द्वयोर्मध्ये भाव्यभावकसम्बन्धोऽपि मन्तुं शक्यते।

इत्थं विभिन्नाभिर्विशेषिताभिरिदं स्वीकर्तुं शक्यते यन्नाट्यशास्त्रस्य कृते प्रयुक्ता 'पञ्चमवेदः' इति सञ्ज्ञा सर्वथा समुचितैवास्ति। नाट्यदर्पणकृद्भ्यां रामचन्द्र-गुणचन्द्राभ्यां तु नाट्यस्यैवंविधानि बहुविधवैशिष्ट्यानि मनसिकृत्यास्य श्लाघायामेतदुक्तम्—

अलङ्कारमृदुः पन्थाः कथादीनां सुसञ्चरः।
दुःसञ्चरस्तु नाट्यस्य रसकल्लोलसङ्कुलः[३]॥

धनञ्जयेन धनिकेन चापि नाट्यलक्षणं कुर्वता तस्य वैशिष्ट्यमुद्घोषितम्। तदनुसारेण मूलपात्राणां तादृश्या अवस्थाया अनुकरणं नाट्यमस्ति यत् सात्त्विक-वाचिक-कायिकाहार्यनामकैः चतुर्भिरभिनयैरनुकार्याणां मूलपात्राणां तदात्मत्वापत्तिरूपं जायते[४]। एतादृशस्य नाट्यस्य शास्त्रीया प्रायोगिकी चाभिव्यक्तिस्तदैव सम्भवति, यदा तत्र रसानुकूलस्य छन्दसः सङ्गीतस्य च निवेशः क्रियते। रसानुकूलाया एव च रूपसज्जायाः समावेशः क्रियते। एवं प्रतीयते यद् नाट्यस्यैताभिरेव अपरिमिताभिः सूक्ष्मताभिः सह समाजं परिचितं कर्तुं समाजे च तद् वेदमिव प्रतिष्ठापयितुं भरतो नाट्येन सह वेदशब्दं संयोजयामास। एतेन तत्कालिकासु सामाजिकस्थितिषु समाजो नाट्यशास्त्रे

---

१. स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः। (कुमारसम्भवम्-१/३०)

२. नाट्यात् समुदायरूपाद्रसाः। यदि वा नाट्यमेव रसाः। रससमुदायो हि नाट्यम्॥
(नाट्यशास्त्रम्-६/३३ (अ.भा.) प्रथमो भागः, पृ. २८८)

३. नाट्यदर्पणः, पृ. १।

४. (अ) अवस्थानुकृतिर्नाट्यम्। (दशरूपकम्, १.७)
(ब) काव्योपनिबद्धधीरोदात्ताद्यवस्थानुकारश्च चतुर्विधाभिनयेन तादात्म्यापत्तिर्नाट्यम्।
(तत्रैव, अवलोकटीका, पृ. ४)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वर्णितेन रसशास्त्रेण सहैव छन्दः-सङ्गीत-स्थापत्याभिनयशास्त्रैः सह सम्बद्धो भवितुमर्हति स्म। तज्जनितरसानुभूत्या सहैव च श्रुति-स्मृति-निर्दिष्टे सदाचारे निरतो भवितुमर्हति स्म।

अपौरुषेयत्वदृष्ट्यापि नाट्यस्य वेदताया मूल्याङ्कनं कर्तुं शक्यते। दशरूपके धनञ्जयः कथयति—यस्य नाट्यवेदस्य रचना विश्वसृजा ब्रह्मणा कृता, यस्य प्रयोगो भरतमुनिना कृतः, यत्र च ताण्डवं शिवेन लास्यं च पार्वत्या कृतम्, अर्थाद् यस्य नाट्यवेदस्योत्पत्तिरलौकिकशक्तिभिर्जातास्ति, तस्य साङ्गोपाङ्गं वर्णनं को नाम मनुष्यः कर्तुमीष्टे[१]। इदं कार्यं तु भरतो वा कर्तुमर्हति शशिशेखरो देवो वा[२]। धनञ्जयस्यैतेन कथनेन एकतस्तु भरतस्यालौकिकव्यक्तित्वमार्षज्ञानं च स्फुटमुद्घोषितं भवति, परतश्च दशरूपकस्थपद्ये प्रयुक्ताभ्याम् ईश-देवेति पदाभ्यां नाट्यस्यापौरुषेयतायां मनागपि सन्देहो नावशिष्यते।

विषयस्य प्रामाणिकतायाः प्रतिष्ठायाश्च सिद्धयेऽन्यत्रापि वेदशब्दप्रयोगस्य परम्परा प्राचीना प्रतीयते। कृष्णद्वैपायनो वेदव्यासोऽपि महाभारतस्य प्रामाणिकतायाः सिद्धये इमामेव सरणिमङ्गीकृतवानित्यवकल्पयामः। स हि महर्षिरादिपर्वणि महाभारतस्य वैशिष्ट्यं प्रतिपादयन्नेवं व्याजहार—'कार्ष्णं वेदमिमं विद्वान् श्रावयित्वार्थमश्नुते'[३]। अन्यत्र स मुनीन्द्रो महाभारतस्य गौरवं सूचयितुं तद् वेदेभ्योऽप्यधिकं प्रतिपादयामास[४]। महाभारतस्य कृते वेदपदस्य प्रयोगे महर्षेर्मनसि नूनमियमेव कल्पना सन्निहिता स्यात्—यथा वेदवाक्यं प्रति कापि शङ्का न जायते, तद् राजाज्ञेव

---

१. उद्धृत्योद्धृत्य सारं यमखिलनिगमान्नाट्यवेदं विरञ्चि-
श्चक्रे यस्य प्रयोगं मुनिरपि भरतस्ताण्डवं नीलकण्ठः।
शर्वाणी लास्यमस्य प्रतिपदमपरं लक्ष्म कः कर्तुमीष्टे
नाट्यानां किन्तु किञ्चित्प्रगुणरचनया लक्षणं सङ्क्षिपामि।। (दशरूपकम्-१/४)

२. चेष्टागुणोदाहृतिसत्त्वभावानशेषतो नेतृदशाविभिन्नान्।
को वक्तुमीशो भरतो न यो वा यो वा न देवः शशिखण्डमौलिः।। (तत्रैव-२/७२)

३. महाभारतम्, आदिपर्व, २/२६८।

४. पुरा किल सुरैः सर्वैः समेत्य तुलया धृतम्।
चतुर्भ्यः सरहस्येभ्यो वेदेभ्यो ह्यधिकं यदा।।
तदा प्रभृति लोकेऽस्मिन् महाभारतमुच्यते।। (तत्रैव-२/२७२-२७३)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यथावदङ्गीक्रियते, तथैवायं समाजो महाभारतगतं समस्तं ज्ञानराशिमङ्गीकुर्यात्, सुखं च गृह्णीयादिति।

एवं प्रतीयते यद् भरतेनापीमामेव परम्परामनुसरता विविधैर्वैशिष्ट्यैर्युक्तं नाट्यशास्त्रं पञ्चमवेदरूपेण प्रतिष्ठापितम्। अनन्तरकाले च परवर्तिभिराचार्यै-र्धनञ्जय-रामचन्द्र-गुणचन्द्रादिभिः समाजेन च नाट्यं वेदत्वेनाङ्गीकृतम्। महाकविः कालिदासोऽपि नाट्यं वेदत्वेन स्वीचक्रे। यद्यपि स एतत् साक्षाद्वेदशब्देन न व्यपदिष्टवाँस्तथापि वेदयज्ञयोरन्योन्याश्रयसम्बन्धस्य परिकल्पनयाऽभिभूतः सन् स मालविकाग्निमित्रे[1] नाट्यं चाक्षुषं (नयनप्रियं) क्रतुमेव प्रतिपादितवान्। कविकुलगुरोरेतत् कथनमुपचारतो नाट्यस्य वेदरूपतामेव पुष्णातीति।

●

१. देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषम्। (मालविकाग्निमित्रम्-१/४)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संस्कृतवाङ्मये प्राणिविज्ञानम्

डॉ. रामाशीषपाण्डेयः
पूर्वाचार्योऽध्यक्षश्च, संस्कृतविभागस्य
मारवाड़ी-महाविद्यालये, राँची (झारखण्ड-प्रदेशः)

***

इन्द्रो विश्वस्य राजति। शन्नोऽस्तु द्विपदे। शं चतुष्पदे।।

(शु.यजु. ३६।८)

प्राणिविज्ञानविवेचनम्

प्राणाः सन्ति अस्मिन्निति प्राणी, प्र + अन् + इन्[१]-प्रत्ययेन निष्पन्नस्य प्राणीति शब्दस्यार्थो भवति—जीवधारी श्वासग्राहको जीवः। तस्य पर्यायवाचिनः शब्दाश्चेतनः, जन्मी, जन्तुः, शरीरी इत्यादयो भवन्ति। तत्र चेतयते चेतति वा चेतनः, चित्संज्ञाने चेतने वेति धातोर्ल्युट्प्रत्ययेन निष्पद्यते चेतनशब्दः[२]। जन्मास्यास्तीति जन्मी (जन्म + इन्-प्रत्ययः[३])। .जायत इति जन्तुः (जन् + तुन्-प्रत्ययः) तथा शरीरमस्यास्तीति शरीरी (शरीर + इन्-प्रत्ययः) एवमिमे शब्दा निष्पन्ना भवन्ति। जीवशब्दोऽपि जीव्-प्राणधारणे-धातोर्घञ्-प्रत्ययेन निष्पद्यते[४]। विशिष्टं ज्ञानं विज्ञानमिति वि + ज्ञा + ल्युट्प्रत्ययेन निष्पन्नो विज्ञानशब्दो मोक्षभिन्नस्यान्यफलस्यावाप्तये शिल्पे शास्त्रे च यद् ज्ञानं तमेवार्थं प्रकाशयति। प्राणिनां विज्ञानं प्राणिविज्ञानम्। तस्य कृते जीवविज्ञानं, जन्तुविज्ञानमित्यादयः शब्दाः पर्यायभूताः।

जीवविज्ञानस्य कृते आङ्ग्लभाषायां बायोलॉजीति (Biology) शब्दस्य प्रयोगो दृश्यते। शब्दोऽयं ग्रीकभाषाया बायो (Bio) लोगोस् (Logos) योगेन निष्पादितो भवति। **बायोशब्दस्यार्थो भवति जीवनं (Life) लोगोस् शब्दस्यार्थो भवत्यध्ययनम्।** जीवानां जीवनस्याध्ययनमेव बायोलॉजीति कथ्यते जीवविज्ञानं

---

१. अष्टाध्यायी, ५.२.११५; २. उणादिसूत्रम्-१.१३४।
३. अष्टा. ५.२.११५; ४. तत्रैव-३.३.१८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वा। जीवविज्ञानस्य विभागद्वयं प्राप्यते—वनस्पतिविज्ञानं (Botany) प्राणिविज्ञानञ्च (Zoology)

प्राणिविज्ञानस्य कृते आङ्ग्लभाषायां प्रयुक्तो जूलॉजी-(Zoology) शब्दोऽपि ग्रीकभाषाया विद्यते। जून (Zoon) + लोगोस्-(Logos) शब्दाभ्यां जूलॉजी-शब्दो निष्पद्यते। जूनशब्दस्यार्थो भवति पशुः (Animal) तथा लोगोस्-शब्दस्यार्थो भवत्यध्ययनम्। अनेन पशूनां विशिष्टाध्ययनमेव प्राणिविज्ञानं (Zoology) कथ्यते।

संस्कृतवाङ्मयानुसारेण ये प्राणधारणं कुर्वन्ति, ते प्राणिनः सन्ति। प्राणिषु जीवनं विद्यते। पादपेष्वपि जीवनं भवतीति वैज्ञानिकैः साधितम्। भारतीया ऋषयस्तत्त्वद्रष्टारो मन्त्रद्रष्टारश्चासन्, तेऽपि पादपेषु चेतनत्वं विज्ञाय तैः सह चेतनवद् व्यवहारं कृतवन्तः। आधुनिकवैज्ञानिकैर्जीवविज्ञानस्य विभागद्वयमध्ययनस्य सौविध्याय स्वीकृतम्। ते लतापादपानामध्ययनं वनस्पतिशास्त्रे मानवेतरप्राणिनां पशुपक्षिणाञ्चाध्ययनं प्राणिविज्ञाने कुर्वन्ति। तत्र मनुष्यभिन्नजीवेषु जीवपिण्डेषु च याः क्रियाः प्रतिक्रियाश्च घटिता भवन्ति, तासामध्ययनमेव विशेषतः प्राणिविज्ञाने कुर्वन्ति।

संस्कृतवाङ्मयस्य क्षेत्रप्रकाशनम्

संस्कृतशब्दः सम् + कृ + क्त-प्रत्ययेन (सुडागमेन) निष्पन्नः शब्दः संस्कारसमन्विताया भाषायाः कृते प्रयुक्तो भवति। वाङ् + मयट्प्रत्ययेन निष्पन्नो वाङ्मयशब्दो वाणीति गर्भितार्थप्रकाशकः। तत्र संस्कृतं वाङ्मयं संस्कृतवाङ्मयमिति। तस्य रूपद्वयं प्राप्यते वैदिकवाङ्मयं लौकिकवाङ्मयञ्चेति[१]। वैदिकवाङ्मयेषु ऋग्यजुस्सामाथर्ववेदास्तेषां व्याख्यानभूता ब्राह्मणारण्यकोपनिषद्ग्रन्थाः प्राधान्येन गण्यन्ते। वेदस्याङ्गभूतानि षडङ्गान्यपि वैदिकवाङ्मय एव परिगणितानि भवन्ति।

लौकिकसंस्कृतवाङ्मयस्य क्षेत्रमतिविशालं विद्यते। तत्रायुर्वेदो धनुर्वेदो गान्धर्ववेदोऽर्थशास्त्रं धर्मशास्त्रं पुराणं शिल्पशास्त्रं यन्त्रशास्त्रं विविधशास्त्राणि च परिगण्यन्ते। आदिकाव्याद्रामायणादारभ्याद्य यावल्लिखिताः काव्यनाटककथागद्यपद्यचम्पूमया नानाग्रन्था अपि लौकिकसंस्कृतवाङ्मय एव परिगणिताः सन्ति। संस्कृतवाङ्मये नानाविधशास्त्राणि विज्ञानतत्त्वप्रकाशकानि

---

१. अथ शब्दानुशासनम्—केषां शब्दानां वैदिकानां लौकिकानाञ्च। (महाभाष्ये १.१)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सन्ति, विज्ञानपुस्तकान्यपि च बहूनि विद्यन्ते। **वस्तुरत्नकोशे चतुरशीतिविज्ञानानि समुल्लिखितानि सन्ति**[1]। संस्कृतवाङ्मये विवेचितानि विज्ञानतत्त्वावृतानि शास्त्राणि विद्यन्ते, परं तेषामेकत्र सङ्कल्पनाभावाद् विविधप्रदेशेषु स्थिततत्वात् प्रकाशनाभावे पाण्डुलिप्यां विद्यमानत्वाच्च दृष्टिपथे नायान्ति। आधुनिकवैज्ञानिकग्रन्थानां पाठ्यक्रमे निर्धारितानां समक्षं प्राचीनभारतीयवैज्ञानिकशास्त्राणि सूर्यप्रकाशसन्निधौ दीपप्रकाशवत् प्रतिभान्ति। कदा दीपेषु स्नेहदानं वर्तिकावर्धनञ्च भविष्यतीति न ज्ञायते। शोधप्रधानेऽस्मिन् युगे सर्वे प्राचीनग्रन्था वैज्ञानिकविषयसंवलिता विविधोपयोगाय प्रकाशिता भवेयुरिति तादृशी योजना विद्वद्भिः स्वीकरणीया सर्वकारैरपि सञ्चालनीया।

प्राणिविज्ञानस्य महत्त्वम्

पशूनां प्राणिनाञ्च विविधोपयोगा विद्यन्ते। शरीरमाद्यं खलु धर्मसाधनमिति शरीरपोषणार्थं तेषां जीवानामुपयोगः प्राचीनकालादेवासीदद्यापि विद्यते। समग्रे भूतले अधिसंख्यजना मांसेन शरीरं पोषयन्ति। एतदर्थं विविधपशूनां पक्षिणाञ्च मांसस्योपयोगो भृशं क्रियते। मत्स्यानाञ्च भक्षणं विश्रुतमस्ति। केषां जीवानां मांसे कीदृशा गुणा विद्यन्त इति विशेषरूपेण ज्ञानाय जीवविज्ञानस्याध्ययनमावश्यकमस्ति। वाहनरूपेणानेके पशवः प्रयुक्ता

---

१. हेतुविज्ञानं, तत्त्वविज्ञानं, मोहविज्ञानं, कर्मविज्ञानं, धर्मविज्ञानं, लक्ष्मीविज्ञानं, योगविज्ञानं, देवविज्ञानं, शङ्खविज्ञानं, दन्तविज्ञानं, काचविज्ञानं, गुटिकाविज्ञानं, रसायनविज्ञानं, वचनविज्ञानं, कवित्वविज्ञानं, गुरुत्वविज्ञानं, पारम्पर्यविज्ञानं, ज्योतिष्कविज्ञानं, वैद्यकविज्ञानं, मेघविज्ञानं, यन्त्रविज्ञानं, मन्त्रविज्ञानं, मर्दनविज्ञानं, नेपथ्यविज्ञानं, मस्तकविज्ञानम्, इष्टिविज्ञानं, लेपविज्ञानं, सूत्रविज्ञानं, चित्रकर्मविज्ञानं, रंगविज्ञानं, शूचिकर्मविज्ञानं, शकुनविज्ञानं, छद्मविज्ञानं, गन्धमुक्तिविज्ञानम्, आरामविज्ञानं, शैलविज्ञानं, काव्यविज्ञानं, कांस्यविज्ञानं, काष्ठविज्ञानं, कुम्भविज्ञानं, लौहविज्ञानं, पत्रविज्ञानं, वंशविज्ञानं, नखविज्ञानं, तृणविज्ञानं, प्रासादविज्ञानं, धातुविज्ञानं, विभूषणविज्ञानं, स्वरोदयविज्ञानं, द्यूतविज्ञानम्, अध्यात्मविज्ञानम्, अग्निविज्ञानं, विद्वेषणविज्ञानम्, उच्चाटनविज्ञानं, स्तम्भनविज्ञानं, वशीकरणविज्ञानं, वस्तुविज्ञानं, भू-विज्ञानं, हस्तिशिक्षाविज्ञानम्, अश्वविज्ञानं, पक्षिविज्ञानं, स्त्रीकामविज्ञानं, चक्रविज्ञानं, वस्त्राकारविज्ञानं, पशुपालविज्ञानं, कृषिविज्ञानं, वाणिज्यविज्ञानं, लक्षणविज्ञानं, कालविज्ञानं, शस्त्रबन्धविज्ञानं शुद्धकरविज्ञानं, विशुद्धकरविज्ञानम्, आखेटकविज्ञानं, कौतूहलविज्ञानं, कोषविज्ञानं, पुष्पविज्ञानम्, इन्द्रजालविज्ञानं, पानविधिविज्ञानम्, अशनविधिविज्ञानं, विनोदविज्ञानं, सौभाग्यविज्ञानं, शौचविज्ञानं, विनयविज्ञानं, नीति-विज्ञानञ्च। (अज्ञातविद्वत्कृत-वस्तुरत्नकोशः, पृ. २४-२५, राजस्थानप्राच्यविद्याप्रतिष्ठानम्, जोधपुर, १९५७ ई.)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भवन्ति। शकटादिकर्षणे, भारवहने चानेके जीवाः संस्कृतवाङ्मये वर्णिताः। कृषिकर्मण्यप्यनेके पशवो विनियुक्ता भवन्ति। कृषिप्रधानेऽस्मिन् भारते वर्षे पशूनामुपयोगो भृशं दृश्यते। गृहरक्षणार्थं धनरक्षणार्थञ्च केचन पशवः पाल्यन्ते। मनोरञ्जनार्थमपि पशवः पक्षिणश्च पालिताः प्रशिक्षिता भवन्ति। चिकित्सार्थमपि पशूनां पक्षिणां मांसरक्तस्नायुवशास्थिशृगादयः प्रयुक्ता भवन्ति[१]। ओषधिनिर्माणेऽपि एतेषां जीवानां भृशमुपयोगो दृश्यते।

संस्कृतवाङ्मये प्राणिविज्ञानस्य कृते हस्तिशास्त्रम्, अश्वशास्त्रम्, शालिहोत्रविज्ञानम्, पक्षिशास्त्रम्, पशुचिकित्साशास्त्रम्, शकुनशास्त्रम्, पशुपालविज्ञानञ्चेत्यादयः शब्दाः प्राप्यन्ते।

वैदिकवाङ्मये प्राणिनां वर्गीकरणम्

आधुनिकप्राणिविज्ञाने पशूनामन्येषां जीवानाञ्चाध्ययनं क्रियते, परं वैदिकवाङ्मये पशूनां मध्ये मनुष्योऽपि परिगणितः। यज्ञीयपशुविवेचनक्रमे मनुष्योऽपि गण्यते[२]। वैदिकवाङ्मये प्राणिनां वर्गीकरणे प्रायेणाष्टौ सिद्धान्ताः स्वीकृताः। ते विभाजनसिद्धान्ताः प्रकृत्या, स्थलेन, जन्मना, विविधाङ्गेन धर्मेण विविधाश्रयेण च सम्बद्धा विद्यन्ते।

१. दन्ताङ्गसिद्धान्तः

ऋग्वेदे दन्ताङ्गविशेषमाश्रित्य प्राणिनां जीवानाञ्च वर्गीकरणं प्रथमं प्राप्यते। दन्ताङ्गसिद्धान्तमाश्रित्य तत्र तेषां द्विधा विभागः प्राप्यते उभयादतोऽन्यतोदतश्च।

उभयादतः—ऋग्वेदस्य पुरुषसूक्ते सृष्टिप्रक्रिया वर्णिता। तत्र तस्मादश्वा अजायन्त इति प्राप्यते[३]। तत्रोभयादतो जीवा वर्णिताः। उभयादतो जीवास्ते सन्ति, येषां मुखस्योभयोर्भागयोर्दन्ता भवन्ति। तत्रोदाहरणेऽश्वा विनिर्दिष्टाः। अश्वातिरिक्ता गर्दभादयोऽश्वतराश्चापि विद्यन्ते। विभागेऽस्मिन्नङ्गविशेषस्यैव वैशिष्ट्यं दृश्यते। कुक्कुराः, सिंहाः, व्याघ्राः, शृगालादयो हिंसका जीवाश्चापि उभयादतो भवन्ति। मनुष्या अपि उभयादतः सन्ति। अश्वगर्दभादयः[४] पालिता

१. भारतीयसांस्कृतिकनिधिः (रामजी-उपाध्यायः, पृ. ३७)।

२. अथर्ववेदः, ३.१०.६।

३. तस्मादश्वा अजायन्त ये के चोभयादतः। गावो ह यज्ञिरे तस्मात्तस्माज्जाता अजावयः।। (ऋ.सं. १०.१०.१०)

४. अथर्व. ५.१७.१५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उभयादतः शाकाहारिणो भवन्ति, परं सिंह[१]शार्दूल[२]कुक्कुरादयो जाङ्गला उभयादतो मांसाहारिणो भवन्ति। उभयादतां जीवानां शृङ्गाणि न भवन्ति। ते प्रायेण स्वकीयां रक्षां दन्तक्षतैः कुर्वन्ति।

अन्यतोदतः, एकदतश्च—मुखस्यैकस्मिन् भागे भवन्ति, येषां दन्तास्तेऽन्यतोदत एकदतो वा जीवा विद्यन्ते। तेषु गो[३]महिष्या[४]दय एकदतो विश्रुताः। एतादृशा जीवा शृङ्गयुक्ता भवन्ति। प्रायेण ते मांसभक्षका हिंसकाश्च न भवन्ति। एते स्वकीयां रक्षां शृङ्गैः कुर्वन्ति। वेदेषु अनेके जीवा अन्यतोदतो वर्णिताः सन्ति।

२. स्थानाश्रितः सिद्धान्तः

स्थानाश्रितसिद्धान्तानुसारं यस्मिन् स्थाने ये जीवा निवसन्ति, तदाश्रयिणस्ते भवन्ति। जीवानां स्थानाश्रितविभागोऽपि ऋग्वेदे प्राप्यते[५]। अनेन स्थानाश्रितविभागेन जीवास्त्रिविधा भवन्ति—वायव्याः, आरण्याः, ग्राम्याश्च।

वायव्याः—वायौ गच्छन्ति विचरन्ति ये ते वायव्या विशेषेण पक्षिणो भवन्ति। विहगा विहङ्गमाश्चान्तरिक्षे[६] गगने वा गन्तुं समर्था नाम्नो यथार्थतां दधति। वाजसनेयसंहितायामनेनैव जीवानां विभागो विहितः—'तस्मात् सर्वहुतो यज्ञाद् वायव्यान् खगानसृजत्'। ऋग्वेदेऽपि एतादृशं वर्णनं लभ्यते। वायव्याः पक्षिणो वेदादौ प्रभूतं वर्णिताः। तेषु हंसः[७], बालाकः[८], मयूरः[९], पिकः[१०] श्येन[११]प्रभृतयो विहगा विश्रुताः।

आरण्याः—अरण्ये भवा आरण्याः। इमे स्वयं वर्धिताः स्वतन्त्राः प्रकृत्या पालिताः प्रायेण हिंसका भवन्ति। आरण्यकेषु जीवेषु गोमृगादयोऽहिंसकाः सिंहशूकरशृङ्गालादयश्च हिंसका भवन्ति। आरण्यकाः

---

१. ऋ.सं. १.१४.८।

२. तै.सं. ५.५.११.१।

३. ऋ.सं. १.८.३१।

४. तत्रैव-८.५८.१५।

५. तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम्। पशूंस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्च ये।। (ऋ.सं. १०.१०.८)

६. वा.सं. ३१.६;

७. ऋ.सं. १.६५.०५।

८. वा.सं. २४.२२-२३;

९. ऋ.सं. ३.४५.१।

१०. तै.सं. ५.५.१५.१;

११. ऋ.सं. १.३२.१४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पशवोऽपि पञ्चप्रकारका भवन्ति—भीमाः, पंखयुताः, उभयचराः, जलचराः, रजसाश्च।

भीमाः—अन्येषां पशूनां जीवानां कृते च ये भयदायका भवन्ति, ते भीमा आरण्यकपशवः सन्ति। भीमात् पक्षिणोऽपि बिभ्यति। सिंहव्याघ्रवृकशूकरादयस्तादृशा एव भीमा आरण्यका विद्यन्ते।

पंखयुताः—पक्षतिभ्यां युक्ता ये जीवा भवन्ति, ते पंखयुताः पक्षिणो भवन्ति। एते पक्षिणो गगने विचरन्ति। हंससुपर्णकोकिलादयश्च तेषु प्रसिद्धाः।

उभयचराः—उभयचरा जीवा द्विविधा भवन्ति—अरण्ये ग्रामे च निवासिनो जीवा रात्रौ दिवा च दृष्टिपथमागता भवन्ति। अरण्ये ग्रामे च ये जीवा उभयचरा भवन्ति तेषु शिशुमार-(नक्रभेदः) अजगर-(सर्पभेदः) प्रभृतयः प्रसिद्धाः। दिवा रात्रौ च दृग्गोचरेषु उभयचरेषु जीवेषु हंसः, मृगः, मार्जारः, नकुलः, ऋक्षः, वृकादयश्चेति[1]।

जलचराः—जलेषु विचरन्ति ये ते विशेषेण मत्स्याः, नक्राः जलपक्षिणश्च विद्यन्ते।

रजसाः—रजसोत्पन्नाः कीटादयश्चैते भवन्ति। कीटेषु विषयुक्ता विषरहिताश्च द्विविधा सन्ति। वेदेषु तादृशानां विषयुक्तानां विषरहितानाञ्च कीटानां प्रभूतं विवरणं लभ्यते। विषयुक्तेषु कीटेषु कुसुम्भक[2]-कष्कषादयो विषरहितेषु जतूमक्षादयश्चोल्लेख्याः[3]।

ग्राम्याः—ग्रामे भवा ग्राम्याः पशवो गोमहिष्यादयो विद्यन्ते। एते पशवो ग्रामे पालिताः प्रायेणाऽहिंसका भवन्ति। कृषिकर्मणि नियोजिता बलीवर्दादयो गृहरक्षणे विनियुक्ताः कुक्कुरादयो भारवहने प्रयुक्ता अश्वादयो दुग्धादिदाने समर्था गो[4]महिष्यादयो[5] विद्यन्ते। केचन पक्षिणोऽपि शुकसारिकादयो ग्रामे पालिता मनोरञ्जनार्थं प्रशिक्षिता भवन्ति। अग्निपुराणानुसारं

---

१. अग्निपुराणम्-२३१.१८-१९।

२. ऋ.सं. १.१९१.१६, अथर्व. ५.२.३७।

३. अथर्व. ९.२.२२, ऋ.सं. १०.४०.६।

४. ऋ.सं. १.८३.१।

५. तत्रैव-८.५८.१५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गोऽश्वोष्ट्रगर्दभश्वानसारिकागृहगोधिकाचटकभासकूर्माद्या ग्राम्याः पशवः पक्षिणश्च भवन्ति[१]। प्रायेणैते पशवः पक्षिणश्च वेदेष्वपि वर्णिताः सन्ति।

३. भोजनाधारितः सिद्धान्तः

अनेन सिद्धान्तेन पशूनां पक्षिणाञ्च भोजनग्रहणं कीदृशं भवतीति भोजनग्रहणप्रकाराश्रितो विभागो भवति। तैत्तिरीयसंहितायां[२] मैत्रायणी-संहितायाञ्च[३] पशूनां द्विधा विभागः सिद्धान्तेनानेन समर्थितो विद्यते। अनेन प्रकारेण हस्तादाना जीवाः, मुखादाना जीवाश्च भवन्ति।

हस्तादानाः—हस्ते भोजनं धृत्वा ये खादन्ति, ते हस्तादाना जीवा भवन्ति। पुरुषहस्तिमर्कटादयो जीवा भोजनं हस्ते धृत्वा खादन्ति। हस्तेन भोजनस्यादानं ये कुर्वन्ति ते हस्तादाना जीवाः।

मुखादानाः—मुखेन भोजनस्यादानं ये कुर्वन्ति ते मुखादानाः पशवो भवन्ति। मुखादानाः पशवो मुखेनैव भोजनं गृह्णन्ति। मुखेन भोजनं धारयन्तो मुखादाना गोमहिष्यादयो विद्यन्ते। पशवः पक्षिणश्च प्रायेण मुखादाना भवन्ति। मनुष्यस्तु हस्तादानो हस्ते भोजनं धृत्वा गृह्णाति।

४. धार्मिकः सिद्धान्तः

जीववर्गीकरणस्य धर्मसिद्धान्तेनाधारितोऽयं सिद्धान्तस्तैत्तिरीय-संहितायां[४], काठकसंहितायां[५], वाजसनेयसंहितायाञ्च[६] समर्थितो विद्यते। धार्मिककर्मणि केचन जीवा विनियुक्ता भवन्ति, केचन न विनियुक्ता भवन्ति। वैदिककाले तादृशा पशवो द्विधा विभक्ताः—केचन यज्ञीयाः, केचनायज्ञीयाश्च।

यज्ञीयाः—ये पशवो यज्ञेषु विनियुक्ता भवन्ति, ते यज्ञीयाः कथ्यन्ते। ऋग्वेदानुसारं यज्ञीयपशुषु गोऽश्वमनुष्या अजावयश्च पञ्चसंख्यका विद्यन्ते। अथर्वसंहितायां तेषु उष्ट्रगर्दभावपि परिगणितौ[७]। अनेन प्रकारेण यज्ञीयाः पशवः सप्तसंख्यायां सञ्जाताः।

---

१. गोऽश्वोष्ट्रगर्दभश्वानः सारिका गृहगोधिका। चटका भासकूर्माद्याः कथिता ग्रामवासिनः॥ (अ.पु. २३१.११)

२. तै.सं., ६.४.५-७; ३. मै.सं. ४.५.७।

४. तै.सं., ४.२.१०; ५. का.सं., २.७.१७।

६. वा.सं., १३.४७-५१, १४.२८-३१।

७. अथर्व., ३.१०.६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अयज्ञीया:—ये पशवो यज्ञकर्मणि विनियुक्ता न भवन्ति, ते अयज्ञीया: पशवो भवन्ति। अयज्ञीयेषु पशुषु उपर्युक्तयज्ञीयपशुव्यतिरिक्ता ये पशव: सन्ति, ते सर्वे परिगण्यन्ते।

५. पादप्रकृत्याधारित: सिद्धान्त:

ऋग्वेदे[१] यजुर्वेदे[२]ऽथर्ववेदे[३] चापि पादप्रकृत्याधारितसिद्धान्तेन जीवानां विभाग: प्राप्यते। अनेन सिद्धान्तेन जीवो मूलतो द्विविध:—द्विपाज्जीव:, चतुष्पाज्जीवश्च।

द्विपाज्जीव:—द्वौ पादौ यस्य स द्विपाज्जीव:। द्विपदो मनुष्या भवन्ति, ते पशूनां मध्ये प्रधानास्तेषां[४] राजानो भवन्ति[५]। वाण्या युक्तो मनुष्य:[६] प्रायेण शतायुर्भवति[७]। पक्षिणोऽपि द्विपदो भवन्ति।

चतुष्पाज्जीव:—चत्वार: पादा येषां ते चतुष्पदा गोमहिष्यादयो विद्यन्ते[८]। एते चतुष्पाज्जीवाश्चतुर्षु पादेषु स्थिता भवन्ति। चतुष्पदा: स्वतन्त्रा: पालिताश्च द्विधा। ग्रामस्थाश्चतुष्पदा: पालिता वनस्थाश्च स्वतन्त्रा भवन्ति। संस्कृतवाङ्मये षट्पदानां भ्रमरादीनाम्, अष्टापदानां शरभादीनाम्[९], शतपदानां कनखजूरेति प्रसिद्धानां वर्णनं प्राप्यते।

६. शफविशेषाधृत: सिद्धान्त:

तैत्तिरीयसंहितायां जीवानां विभाजनं शफविशेषाधृतसिद्धान्तेनापि विहितमस्ति[१०]। सिद्धान्तेनानेन केचन पशव एकशफा: केचन क्षुद्रशफाश्च भवन्ति। विभागोऽयमुभयादतोऽन्यतोदतवदेवाङ्गसिद्धान्तेन समर्थित: शफप्रकृत्या आधृतो विद्यते।

---

१. विश्वा रूपाणि प्रतिमुञ्चते कवि:, प्रासानीद् भद्रं द्विपदे चतुष्पदे।।
(ऋ.सं. ५.८१.२, तथा ३.६२.१४ द्र.)

२. इन्द्रो विश्वस्य राजति। शन्नोऽस्तु द्विपदे शं चतुष्पदे। (शु.यजु. ३६.८)

३. अथर्व., ३.३४.१।

४. शतपथब्राह्मणे-६.२.१.१८।

५. का.सं. २०.१०।

६. ऋ.सं. १०.१००.११।

७. श.ब्रा., ३.२.६.३।

८. ऋ.सं. ३.६२.१४, अथर्व. ३.३४.१।

९. मेघदूतम्, (कालिदास:) १.५४।
ये संरम्भोत्पतनरभसा स्वाङ्गभङ्गाय तस्मिन्मुक्ताध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम्।

१०. तै.सं. १.३.१०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एकशफयुक्ताः—येषां जीवानां पादेषु पूर्णशफो भवति, एक एव शफो भवति, विभक्तः शफो न स एकशफजीवः। अश्वगर्दभादय एकशफयुक्ता भवन्ति। एते पालिता अपालिताश्च द्विधा दृश्यन्ते। ग्रामस्थाः पालिता वनस्था अपालिताश्च सन्ति।

क्षुद्रशफाः—क्षुद्रशफयुक्ता ये जीवास्ते क्षुद्रशफाः कथ्यन्ते। एतेषां जीवानां शफा विभक्ता भवन्ति। द्विधा विभक्तः शफः संयुक्तो न भवति। गोमहिषवृषादयो जीवाः क्षुद्रशफा विद्यन्ते।

७. शृङ्गाधारितः सिद्धान्तः

अनेन सिद्धान्तेन जीवा द्विधा भवन्ति—शृङ्गिणोऽशृङ्गिणश्च। शृङ्गिणस्ते भवन्ति येषां मस्तकोपरि शृङ्गं शृङ्गाणि वा जायन्ते। गोमहिष्यादयः शृङ्गिणो भवन्ति। प्रायेण शृङ्गिणः शाकाहारिणो भवन्ति। अशृङ्गिणस्ते जीवा भवन्ति, येषां मस्तकस्योपरि शृङ्गं न जायते। अश्वगर्दभकुक्कुरादयो जीवा अशृङ्गिणो भवन्ति। एते जीवाः शाकाहारिणो मांसाहारिणो वा भवन्ति। अश्वगर्दभादयः शाकाहारिणः कुक्कुरसिंहादयो मांसाहारिणश्च भवन्ति।

८. जीवोत्पत्तिसिद्धान्तः

जीवोत्पत्तिसिद्धान्तेनापि जीवानां वर्गीकरणं दृश्यते। छान्दोग्योपनिषदि ऐतरेयारण्यके च जीवानां वर्गीकरणमुत्पत्तिसिद्धान्तेनान्वितं वर्तते। अनेन सिद्धान्तेन जीवाः—अण्डजाः, जीवजाः, स्वेदजाः, उद्भिजाश्च भवन्तीति ऐतरेयारण्यके[१]। छान्दोग्योपनिषदि पुनः अण्डजा जीवजा उद्भिजाश्च जीवाः सन्ति[२]।

अण्डजाः—अण्डाज्जायन्त इति अण्डजा विशेषेण पक्षिणो मत्स्याः सर्पादयः सरीसृपाश्च भवन्ति। एतेषां जीवानामुत्पत्तिरण्डादेव जायते। अण्डजा जीवा द्विविधाः स्थलजा जलजाश्च। कृकलाशादयः स्थलजाः, शङ्खादयो जलजाश्च भवन्ति।

जीवजाः—जीवाज्जायन्ते ये ते जीवजा जीवाः। अस्य पर्यायवाचिनः शब्दा जरायुजाः, जारुजाः, पिण्डजाश्च सन्ति। जरायोर्गर्भाशयाज्जाता

---

१. ऐतरेयारण्यकः, २.६।

२. छान्दोग्योपनिषद्, ६.३.१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जरायुजाः कथ्यन्ते। जारुजा अप्यनेनैव कथ्यन्ते। पिण्डाज्जायन्त इति पिण्डजाः। मनुष्यगवादिपशवश्च जीवजाः, जरायुजाः, पिण्डजा वा भवन्ति[१]।

स्वेदजाः—स्वेदाज्जाताः स्वेदजाः, स्वेदजनकत्वादुष्मा स्वेदः कथ्यते[२]। स्वेदजा जीवा उष्मजा अपि कथ्यन्ते। पार्थिवद्रव्येणोत्पन्नात् क्लेदात् स्वेदा जायन्ते। उष्माणश्च स्वेदहेतुः। तापादपि दंशादिसदृशा शुक्तिकापिपीलिका जायन्ते। दंशमशकयूकामक्षिकमत्कुणादयः स्वेदजा भवन्ति[३]।

उद्भिजाः—उद्भिजमुद्भिनत्तीत्युद्भित्स्थावरं तस्माज्जाता उद्भिजाः। छान्दोग्योपनिषदि स्वेदजा जीवेषु न परिगणिताः। तत्रैव शाङ्करभाष्ये कथितमस्ति यत् स्वेदजसंशोकजयोरण्डजोद्भिजयोरेव यथासम्भवमन्तर्भावः[४]।

लौकिकसंस्कृतवाङ्मये प्राणिनां वर्गीकरणम्

चरकसंहितायां प्राणिनां वर्गीकरणं प्राप्यते। तत्र विवेचितं वर्गीकरणं प्रवृत्त्याश्रितं स्थानाश्रितञ्च विद्यते। तत्र सप्तविधा जीवा विवेचिताः—प्रसहाः, भूमिशयाः, अनूपाः, वारिशयाः, वारिचराः, जाङ्गलाः, विष्किराश्चेति।

प्रसहाः—प्रसह्य भक्षयन्ति ये ते प्रसहाः प्रवृत्त्याश्रिता जीवा भवन्ति। प्रसहपशूनां मध्ये गौः, खरः, अश्वतरः, उष्ट्रः, अश्वः, गजः, सिंहः, ऋक्षः, वानरः, वृकः, व्याघ्रः, मार्जारः, मूषिका, जम्बूकादयञ्च भवन्ति। इमे जीवा भोजनं दृष्ट्वा प्रसह्य बलाद् ग्रहीतुमिच्छन्ति[५]।

भूमिशयाः—भूमौ विवरं निर्माय परस्य निर्मिते विवरे वा यः शेते स भूमिशयो भूशयो वा जीवो भवति। बिले वासित्वाद् बिले शेते यः स बिलेशयोऽपि भूमिशयः। भूमिशयेषु पशुषु श्यामश्वेतचित्रकृष्णवर्णाः

---

१. पशवश्च मृगाश्चैव व्यालाश्चोभयादतः। रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः।। (मनु. १.४३)

२. छा.उ., ६.३.१, शाङ्करभाष्ये।

३. स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम्। ऊष्मणश्चोपजायन्ते यच्चान्यत्किञ्चिदीदृशम्।। (मनु. १.४५)

४. छा.उ., ६.३.१ शाङ्करभाष्ये।

५. गोखराश्वतरोष्ट्राश्वद्वीपिसिंहर्क्षवानराः। वृको व्याधस्तरक्षुश्च बभ्रमार्जारमूषिकाः।।
लोपाको जम्बुकः श्येनो वान्तादश्चाषवायसौ। शशघ्नो मधुहा भासो गृध्रोलूककुलिङ्गकाः।।
धूमीका कुररश्चेति प्रसहा मृगपक्षिणः।। (चरकसंहिता-२७.३४-३६)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सर्पविशेषाश्चिल्लटः, भेकः, गोधा, शल्लकः, गण्डकः, नकुलादयश्च पशवो विद्यन्ते[१]।

अनूपाः—जलप्रधानदेशे निवासिनः पशवः पक्षिणश्चानूपाः कथ्यन्ते। अनूपसंश्रयादनूपेति तत्रैव चरकाचार्यः। अनूपपशुषु सृमरः (महाशूकरः), चमरः, खड्गः, महिषः, गवयः, गजः, वराहः, रुरुमृगादयश्च जीवा विद्यन्ते[२]।

वारिशयाः—वारिणि जले शेते यः स वारिशयः, जले निवसनात् शयनाच्च जीवा जलजा अपि कथ्यन्ते। वारिशया एव जलजाः। तेषु कूर्मः, कर्कटकः, मत्स्यः, शिशुमारः (नक्रभेदः), तिमिङ्गिलः, शुक्तिः (सीपकीटः), शङ्खः, उद्रः (उदविलाव इति) कुम्भीरः, मकरप्रभृतयो जीवाः प्रसिद्धाः[३]।

वारिचराः—वारिणि विचरन्ति ये ते वारिचरा जीवा भवन्ति। वारिचरजीवेषु हंसः, क्रौञ्चः, वलाकः, वकः, कारण्डवः, प्लवः, पुण्डराह्वः, केशरी, मानतुण्डकः, मृणालकण्ठः, जलकाकः, कादम्बः, (कलहंसः) काकतुण्डकः, श्वेतकारण्डवः, उत्क्रोशः, पुण्डरीकाक्षः (पुण्डरः), मेघरावः (चातकः), अम्बुकुक्कुटी, आरा, नन्दीमुखी, सुमुखः, सहचारी, रोहिणी, कशकानी, सारसः, चक्रवाकप्रभृतयो जलजीवाः खगाश्च विद्यन्ते[४]।

जाङ्गलाः—स्थले उत्पन्ना जङ्गले सञ्चरणत्वात् स्थलजा अपि जाङ्गला जीवाः कथ्यन्ते। जाङ्गलजीवेषु विशेषतः पशवो भवन्ति। तेषु पृषतः, शरभः, रामः, श्वदंष्ट्रा, मृगमातृका, शशः, उरणः, कुरङ्गः, गोकर्णः, कोट्टकारकः,

---

१. श्वेतः श्यामश्चित्रपृष्ठः क्वलकः काकुलीमृगः।
कुर्चीका चिल्लटो भेको गोधाशल्लकगण्डकौ॥
कदलीनकुलश्वाविदिति भूमिशयाः स्मृताः॥ (च.सं. २७.३६-३७)

२. सृमरश्चमरः खड्गो महिषो गवयो गजः।
न्यङ्कुर्वराहश्चानूपा मृगाः सर्वे रुरुस्तथा॥ (च.सं. २७.३८)

३. कूर्मः कर्कटको मत्स्यः शिशुमारस्तिमिङ्गिलः। शुक्तिशङ्खोद्रकुम्भीरकुलुकीमकरादयः॥
इति वारिशयाः प्रोक्ताः.....॥ (च.सं. २७.३९)

४. हंसः क्रौञ्चो वलाका च वकः कारण्डवः प्लवः।
शरीरी पुष्कराह्वश्च केशरी मानतुण्डकः॥
उत्क्रोशः पुण्डरीकाक्षो मेघरावोऽम्बुकुक्कुटी।
आरा नन्दीमुखो वाही सुमुखाः सहचारिणः॥
रोहिणी कशकानी च सारसो रक्तशीर्षकः।
चक्रवाकास्तथाऽन्ये च खगाः सन्त्यम्बुचारिणः॥ (च.सं. २७/४१-४३)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

चारुष्कः, हरिणः, एणः (कृष्णहरिणः), शम्बरः, कालपुच्छकः, ऋष्यः, वरपोतादयश्च प्रसिद्धाः सन्ति[१]।

विष्किराः—चञ्चा चरणैश्च विकीर्य ये भक्षयन्ति भोजनं कुर्वन्ति ते विष्किराः पक्षिणो भवन्ति। विष्किरेषु लावः, वर्तीरकः, वार्तीकः, कपिञ्जलः चकोरः, उपचक्रः, कुक्कुभः, तित्तिरिः, काकादयश्च प्रसिद्धाः[२]। तेषु दार्वाघाटः, भृङ्गराजः, कोकिलादयः प्रतुदा अपि कथ्यन्ते। एते पक्षिणः प्रतुद्य चञ्चा चरणैश्च पुनः पुनः प्रहारं कृत्वा आहारं गृह्णन्ति[३]।

अग्निपुराणानुसारं जीवानां वर्गीकरणम्

अग्निपुराणानुसारं जीवास्त्रिविधा भवन्ति—दिवाचराः, रात्रिञ्चराः, उभयचराश्चेति।

दिवाचराः—दिवा दिने ये दृग्गोचरा भवन्ति विचरन्ति, ते दिवाचरा जीवा भवन्ति। तेषु सर्पः, मयूरः, चक्रवाकः, खरः, हारितः, वायसः, कुलाहः, कुक्कुभः, श्येनः, फेरू, खञ्जनः, वानरः, वृश्चिकः, चटकः, श्यामा, चाषः, नीलकण्ठः, चातकः, दार्वाघाटादयः पक्षिणो विद्यन्ते[४]।

रात्रिञ्चराः—रात्रौ विचरन्ति विशेषेण दृग्गोचरा भवन्ति ते रात्रिञ्चराः, तेषु वागुरिः, उलूकः, शरभः, क्रौञ्चः, शशकः, कच्छपः, लोकासिकः पिङ्गलिकादयो जीवा विद्यन्ते[५]।

---

१. पृषतः शरभो रामः श्वदंष्ट्रा मृगमातृका। शशोरणौ कुरङ्गश्च गोकर्णः कोट्टकारकः।।
चारुष्को हरिणैणौ च शम्बरः कालपुच्छकः। ऋष्यश्च वरपोतश्च विज्ञेया जाङ्गला मृगाः।।
(च.सं. २७.४४-४५)

२. लावो वर्तीरकश्चैव वार्तीकः सकपिञ्जलः। चकोरश्चोपचक्रश्च कुक्कुभो रक्तवर्णकः।
वर्तको वर्तिका चैव बर्हीतित्तिरकुक्कुटौ। कङ्कसारपदेन्द्राथ गोनदे गिरिवर्तकाः।।
क्रकरोऽवकरश्चैव वारटाश्चेति विष्किराः।। (च.सं. २७.४६-४८)

३. च.सं. २७.५२-५४।

४. गोकर्णशिखिचक्राह्वखरहारीतवायसाः। कुलाहकुक्कुभश्येनफेरूखञ्जनवानराः।।
शतधाचटकश्यामचाषश्येनकपिञ्जलाः। तित्तिरिः शतपत्रश्च कपोतश्च तथा त्रयः।।
खञ्जरीटकदात्यूहशुकराजीवकुक्कुटाः। भारद्वाजश्च सारङ्ग इति ज्ञेया दिवाचराः।।
(अग्निपुराणम्, २३१.१४-१६)

५. वायुर्युलूकशरभक्रौञ्चाः शशककच्छपाः। लोकासिकाः पिङ्गलिकाः कथिताः रात्रिगोचराः।।
(अ.पु. २३१.१७)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उभयचराः—ये रात्रौ दिवा च विचरन्ति दृग्गोचरा भवन्ति, ते उभयचरा प्राणिनः। तेषु हंसः, मृगः, मार्जारः, नकुलः, ऋक्षः, भुजङ्गः, वृकारिः, सिंहः, व्याघ्रः, ग्रामशूकरः, वृषभः, गोमायुप्रभृतयश्च उभयचराः प्राणिनो विख्याताः[1]।

उपर्युक्तविवरणेन स्पष्टं भवति यत् संस्कृतवाङ्मयेऽनेके प्राणिनो वर्णिता विशेषरूपेण विवेचिताः सन्ति। तेषां प्रकाराश्च विशेषरूपेणोल्लिखिताः। वैदिकसंहितायामपि विविधजीवानां वर्णनं लभ्यते। तैत्तिरीयसंहितायां विषमयस्य कीटस्य पृथग् वर्णनमस्ति। अलाण्डुः, एजत्कः, कष्कषः, कीटः, करुरुः, तिलंगुः, कुसुम्भकः, येवाषः, वृक्षसर्पी, शतुतः, शवर्तः, स्तेगप्रभृतयो विषकीटा वर्णिताः[2]। सर्पाणां जातयोऽपि तत्रैवोल्लिखिताः सन्ति। सर्पस्य परिगणनं सरीसृपवर्गे भवति। तेषु अघाश्वः, अजगरः, असितः, कंकपर्वा, करिक्रतः, कल्माषग्रीवः, कसर्णीतः, कुम्भीनसः, तिरश्चराजिः, तैमातः, दर्विः, दशोनसि, पुष्करसाद्, लोहिताहि, शकेटिः, श्वित्रप्रभृतयो भवन्ति[3]। लौकिकसंस्कृतेऽपि प्राणिनां वर्गीकरणं विविधाधारसंयुक्तमस्ति।

प्राणिनां संरचना

जीवानां संरचनायां तेषां शरीरस्य बाह्यसंरचनाया आन्तरिकसंरचनायाश्चावबोधो गृह्यते। शृणोति शीर्यते वेति शरीरं शृहिंसायां धातोः ईरन्-प्रत्ययेन निष्पद्यते[4]। निरुक्तेऽपि शरीरं शृणातेः शम्नातेर्वेति निर्वचनं प्राप्यते[5]। शरीरस्य बाह्यसंरचनास्तु स्थूलनेत्रैर्दृश्यन्ते। अनेन दर्शनेन शरीरस्य बाह्याङ्गानां हस्तचरणनेत्रमुखादीनां ज्ञानं भवति। आन्तरिकसंरचनाया दर्शनाय सूक्ष्मयन्त्रस्यावश्यकता भवति। अथर्ववेदे शरीरस्यान्तरिकसंरचना वर्णिता। प्रतीयते तदानीं वैदिक-ऋषिभिः शरीरस्यान्तरिकसंरचनाया दर्शनमपि कृतम्। वाजसनेयिसंहितायां[6] मैत्रायणीसंहितायां[7] काठकसंहितायाञ्च[8] शरीरस्यावयवानि वर्णितानि। तेषु लोमन्-त्वक्-अस्थि-मांस-मज्जा-यकृत्-क्लोमन्-मतस्ना-शेप-

---

१. हंसाश्च मृगमार्जारनकुलर्क्षभुजङ्गमाः। वृकारिसिंहव्याघ्रोष्ट्रग्रामशूकरमानुषाः।।
श्वाविद्वृषभगोमायुवृककोकिलसारसाः। तुरङ्गको पीनहरा गोधा ह्युभयचारिणः।।
(अ.पु. २३१.१८-१९)

२. तै.सं. ५.५.११.१, ५.७.११.१।

३. वैदिक इण्डेक्स—मैकडोनेल एवं कीथ, पृ. ५८।

४. अमरकोशः २.६.७० (रामाश्रमीटीका द्रष्टव्या)

५. निरुक्तम् २.५;   ६. वा.सं. १९.८१-९३।

७. मै.सं. ३.११.९;   ८. का.सं. ३.८.३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मुख-शिरस्-जिह्वा-पायु-पाद-चक्षु:-पक्ष्म-नासिका-व्यान-कर्ण-भ्रू-आत्मन्-उपस्थ-श्मश्रू-केशाश्च वर्णिता:।

निरुक्ते शरीराङ्गाणां निर्वचनं प्राप्यते। अक्षिचष्टै:, कर्ण: कृन्ततेः, निकृतद्वारो भवति, आस्यमस्यते एतदन्नमिति वा, वरतरमङ्गमुरु, प्रबाधत आभ्यां कर्माणीति बाहु:, अंगुलय: अग्रगामिन्यो भवन्ति, अग्रगालिन्यो भवन्ति, अग्रकारिण्यो भवन्ति, कोकूयतेर्वा स्याच्छब्दकर्मण इति कोकुवा, तालु तरते:, लततेर्वा स्यात् लम्बकर्मण:, चर्म चरतेर्वा उच्चृतं भवति, चित्तं चेतते:, जघनं जङ्घन्यते:, जठरं जग्धमस्मिन् ध्रियते धीयते वा, नाभि: सन्नहनात्, नासिका नसते:, धेना (जिह्वा) अन्नं धीयते, पाणि: पणायते: पूजाकर्मण:, पाद: पद्यते:, प्रभृतय: शब्दा अङ्गवाचिनो विद्यन्ते। प्रायेणैतानि अङ्गानि स्वरूपकर्माश्रितानि सन्ति मनुष्यसम्बद्धानि। मनुष्योऽपि जीवभूत:। अत: संस्कृतवाङ्मये मानवानामप्यध्ययनं भवति।

निरुक्ते शरीरसंरचनाया: प्रक्रिया वर्णिता—रसाच्छोणितम्, शोणितान्मांसम्, मांसान्मेद:, मेदस: स्नावा, स्नाव्नोऽस्थीनि, अस्थिभ्यो मज्जा, मज्जातो रेत:। योनौ सिक्तं रेत: पुरुष: सम्भवति। सौम्यो भवति एकरात्रोषितं कललं भवति, पञ्चरात्राद् बुद्बुदा:, सप्तरात्रात्पेशी, द्विसप्तरात्रादर्बुद:, पञ्चविंशतिरात्र: स्वस्थितो घनो भवति, मासमात्रात्कठिनो भवति, द्विमासाभ्यन्तरे शिर: सम्पद्यते, मासत्रयेण ग्रीवाव्यपदेश:, मासचतुष्केन त्वक्-व्यपदेश:, पञ्चमे मासे नखरोमव्यपदेश:, षष्ठे मुखनासिकाऽक्षिश्रोत्रञ्च सम्भवति, सप्तमे चलनसमर्थो भवति, ततश्च दशमे मासि प्रजायते[1]। तत्र शुक्रातिरेके पुमान् शोणितातिरेके स्त्री सम्भवति। अत्र शोणितशब्दो रजसो वाचक:, द्वाभ्यां समेन नपुंसको भवति, शुक्रभिन्नो यमो भवति[2]।

शतपथब्राह्मणे मानवानां शरीरेषु अस्थिसंख्या ३६० परिगणिता:। तदनुसारं द्वात्रिंशद्दन्ता:, द्वात्रिंशद्दन्तोलूखलानि, विंशति: नखा:, विंशति: पाणिपादशलाका: (चत्वार्यधिष्ठानान्यासां चत्वारि पाणिपादपृष्ठानि), षष्ठिरङ्गुल्यस्थीनि, द्वे पार्ष्ण्यो:, द्वे कूर्चाध:, चत्वार: पाण्योर्मणिका:, चत्वार: पादयोर्गुल्फा:, चत्वार्यरत्न्योरस्थीनि, चत्वारि जङ्घयो:, द्वे जानुनो:, द्वे कूर्परयो:, द्वे ऊर्वो:, बाह्वो:, सांसयोर्द्वे, द्वावक्षकौ, द्वे जानुनी, द्वे श्रोणिफलके,

---

१. नि. अध्याय: १४।

२. तत्रैव, अ. १४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एकं भगास्थि, पुंसां मेढ्रास्थि, एकं त्रिक्, संश्रितमेकं गुदास्थि, पृष्ठगतानि पञ्चत्रिंशत्, पञ्चदशास्थीनि ग्रीवायां, द्वे जत्रुणी, एकं हन्वस्थि, द्वे हनुमूलबन्धने, द्वे ललाटे, द्वे अक्ष्णोः, गण्डयोर्द्वे, नासिकायां त्रीणि घोणाख्यानि। द्वयोः पार्श्वयोः चतुर्विंशतिः पञ्जरास्थीनि च पार्श्वकानि। यावन्ति चैषां स्थालिका-न्यर्बुदाकाराणि तानि द्विसप्ततिः, द्वौ शङ्खकौ, चत्वारि शिरः कपालानि, वक्षसि सप्तदश इति त्रीणि षष्ठ्यधिकानि शतान्यस्थ्नामिति[१]।

शतपथब्राह्मणे प्राप्यते यत् शिरसस्त्रयो भागा विद्यन्ते। गले पञ्चदश, वक्षःस्थले सप्तदश, उदरपृष्ठे एकविंशतिरुभयपार्श्वयोः सप्तविंशतिरनूके त्रयस्त्रिंशदस्थीनि विद्यन्ते[२]। तैत्तिरीयब्राह्मणे शिरो-वाक्-मनः-अङ्गुलिः-बाहू-हस्त-कर्णात्मन्-उरः-पृष्ठि-उदर-अंश-ग्रीवा-श्रोणि-ऊरु-अरत्नि-जानु-नाभि-पायूपस्थ-अण्ड-पशजघन-पदलोम-त्वक्-मांसादीनि स्थूलसूक्ष्माङ्गाणि भवन्तीति वर्णितमस्ति। ऐतरेयारण्यके शरीरमिदं १०१ तत्त्वैर्विनिर्मितमिति वर्णितम्[३]। सम्पूर्णशरीरस्य चत्वारो भागा विद्यन्ते। प्रत्येकेषु भागेषु पञ्चविंशतितत्त्वानि भवन्ति। तत्र पृथग्भागस्थतत्त्वानां परिगणनमपि प्राप्यते। वाजसनेयिसंहितायां प्राप्यते यत् पुंसप्रजननमिन्द्रियं शिश्नं योनिं स्त्रीप्रजननं प्रविशत् सद् रेतो वीर्यं विजहाति, योनिप्रवेशादन्यत्र मूत्रं विजहाति। समानद्वारयोरपि रेतोर्मूत्रयोर्मूत्र-स्थानादन्यत्र रेतोऽवतिष्ठते। जरायुणा गर्भवेष्टनेनावृतो गर्भो जन्मना कृत्वा उल्वं जरायुं जहाति[४]। भिन्नस्थानानामेकद्वाराणामाद्यमुदाहरणम्, एकस्थाना-नामनेकद्वाराणां द्वितीयमिति तत्रैव महीधराचार्याः[५]।

आधुनिकप्राणिविज्ञाने मानवेतराणां प्राणिनां शारीरिकसंरचनाया वर्णनं प्राधान्यं विदधाति। वाजसनेयसंहितायामश्वस्यास्थिपञ्जरस्थितानि अस्थीनि वर्णितानि सन्ति[६]।

---

१. च.सं. ७.६।

२. शतपथब्राह्मणे-१२.२.४.९-१४।

३. ऐ.आ. १.२.२।

४. रेतो मूत्रं विजहाति योनिं प्रविशदिन्द्रियम्। गर्भो जरायुणावृत उल्वं जहाति जन्मना।। (वा.सं. १९.७६)

५. वा.सं. १९.७६ (महीधरभाष्यं द्रष्टव्यम्)।

६. वा.सं. २५.१-९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उपसंहारः

प्राणिविज्ञाने प्राणिनां भौगोलिकी स्थितिस्तेषां निवासस्य विवरणं तेषामुपरि पर्यावरणस्य प्रभावादयो वर्णिता भवन्ति। शीतप्रदेशे स्थितानां जीवानां स्थितिरुष्णप्रदेशस्थानां जीवानामपेक्षया भिन्ना भवति। जीवाः कुत्र निवसन्ति कथं निवसन्ति तेषामुपरि पर्यावरणस्य कीदृशः प्रभावो भवतीति तत्रैव विचार्यते। आबालात् प्रौढं यावज्जीवानां विकासः कथं भवति प्रत्येकेषां जीवानां शारीरिकसंरचनायां साम्यं वैषम्यं वेति सर्वमस्य विज्ञानस्य विषयः। प्राचीनकाले स्थितानां प्राणिनां साम्प्रतमुपलब्धिर्भवति न वा, तेषां वंशपरम्परा पारस्परिकसम्बन्धादिकञ्चापि अत्रैवाधीयते। प्राचीनकाले ये जीवा आसन् तेषु सर्वेऽद्य न प्राप्यन्ते, प्रतीयते चानेकेषां जीवानां प्रजातयोऽपि नष्टा अभूवन्। संस्कृतवाङ्मये वर्णितानां कीटानां प्राणिनां सर्पादिसरीसृपादीनाञ्च ये भेदा उपलभ्यन्ते ते सर्वे विशेषरूपेण परिचयस्यात्रापेक्षां गृह्णन्ति।

वर्तमानकाले प्राणिविज्ञानस्याध्ययनं भोजनविधौ पौष्टिकतापरिज्ञानाय केषां जीवानां मांसे कीदृशा गुणा विद्यन्ते, तेषामुपयोगः कथं भवेदिति ज्ञानाय चर्मवस्त्रौषधादिलघुबृहदुद्योगाय प्राणिनां विशेषज्ञानमपेक्षते। दुग्धं दुग्धनिर्मितानि वस्तूनि च मानवस्य भृशमुपयोगाय भवन्ति। दुग्धेन दुग्धनिर्मितवस्तूनां च शारीरिको मानसिकश्च विकासो जायते। औषधादिनिर्माणेऽपि जीवानामुपयोगो विशेषत आयुर्वेदादिग्रन्थे विवेचितः।

शोधपत्रेऽस्मिन् प्राणिनां विवेचनपुरस्सरं तेषां वर्गीकरणं काश्चन संरचना च संक्षिप्तरूपेणोपस्थापिताः। विवेचनमिदं विशेषतो वैदिकवाङ्मयमनुसृत्य सामान्यतः संस्कृतवाङ्मयमनुसृत्य च कृतमिति।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ध्वन्यर्थविचारः

डॉ. शिवरामशर्मा
सङ्गीतशास्त्रविभागः
काशी-हिन्दू-विश्वविद्यालयः, वाराणसी

***

ध्वन्यालोककारेणाचार्यानन्दवर्धनेन स्वग्रन्थोपक्रमे 'काव्यस्यात्मा ध्वनिरिति बुधैः' इत्याद्युक्त्वा ध्वनेरभाववादिनां भाक्तत्ववादिनामनिर्वचीयत्व-वादिनाञ्च मतान्युपस्थाप्य क्रमशस्तेषां खण्डनञ्च विधाय ध्वनिः काव्यात्मत्वेन प्रतिष्ठापितः। तेन विभिन्नप्रमाणपुरःसरं वाच्यलक्ष्यव्यतिरिक्तस्य प्रतीयमानार्थस्य सद्भावं प्रमाप्य तस्य प्राधान्ये काव्यस्य ध्वनित्वं निर्णीतम्। यथा—

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः[१]॥

तत्र तेनास्याः कारिकाया वृत्तौ 'यत्रार्थो वाच्यविशेषो वाचकविशेषः शब्दो वा तमर्थं व्यङ्क्तः स काव्यविशेषो ध्वनिः' इत्युक्त्वा यद्यपि काव्यविशेषस्यैव ध्वनिरित्यभिधानं कृतम्; किन्तु न खलु काव्यविशेष एव ध्वनित्वेन तदभिमतः प्रतिभाति। ध्वन्यालोकस्य सम्यक् पर्यालोचनेनेदं ज्ञायते यद् विस्तरेण व्याख्यतोऽयं ध्वनिशब्दः केवलस्य काव्यविशेषस्यैव वाचको नास्ति, अपि तु व्यञ्जकशब्दार्थौ, व्यङ्ग्यार्थः, व्यञ्जनाव्यापारश्च ध्वनिशब्दस्य वाच्यतामुपयान्ति। स्वयमानन्दवर्धनेनैव ध्वन्यालोकेऽनेकस्थलेषु उक्तार्थेषु ध्वनिपदप्रयोगो विहितो वर्तते। आचार्याभिनवगुप्तोऽपि नैकशो लोचने ध्वनेरेतान् पञ्चार्थान् सप्रमाणं सव्युत्पत्तिप्रदर्शनं समर्थयामास; किन्त्वत्र केचिद् विप्रतिपद्यन्ते।

ध्वन्यालोकस्य कश्चनाधुनिकष्टीकाकारो ध्वनेरेतान् पञ्चार्थान् न समर्थयति। तन्मते ध्वनिकारेण ध्वनिपदप्रयोगः केवलस्य काव्यविशेषस्यैव कृते कृतोऽस्ति, न तूक्तानां शब्दार्थव्यङ्ग्यव्यञ्जनादीनां कृतेऽपि। टीकाकारोऽसौ भूमिकायां विस्तरेण ध्वनेः काव्यविशेषमात्रवाचकतां संसाध्य पञ्चार्थवादिनं

---

१. ध्वन्यालोके-१.१३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लोचनकारमप्याक्षिपति। ध्वनिशब्दस्य काव्यविशेषमात्रवाचकत्वेऽस्य कथमाग्रह इति तु न ज्ञायते; किन्तु एतन्निश्चितं यत् सतोरप्यालोकलोचनयोरनेन ध्वनिशब्दार्थः प्रत्यक्षीकर्तुं न पारितः।

अस्तु, इदानीं लोचने व्याख्याता आनन्दवर्धनेन च स्वयमुदाहृता ध्वनिशब्दस्य पञ्चार्था निरूप्यन्ते। भाक्तवादमुपस्थापयता ध्वनिकारेणोक्तम्—

'भाक्तमाहुस्तमन्ये'—'अन्ये तं ध्वनिसंज्ञितं काव्यात्मानं गुण-वृत्तिरित्याहुः'[१] इति।

अत्र यदि ध्वनिशब्दस्य काव्यविशेषमात्रवाचकत्वमङ्गीक्रियते तदा पूर्वपक्षत्वेनोपस्थापितस्य भाक्तवादस्य सिद्धिरेव न सम्भवति। यतो हि—'भज्यते सेव्यते पदार्थेन प्रसिद्धतयोत्प्रेक्ष्यत इति भक्तिधर्मोऽभिधेयेन सामीप्यादिः, तत आगतो भाक्तो लाक्षणिकोऽर्थः'[२] इत्यादिरूपेण लोचनोक्तव्याख्यानुसारं भाक्तोऽर्थो लाक्षणिकार्थ एवेति निर्णीयते। भाक्तवादानुसारञ्चायं लाक्षणिकोऽर्थ एव ध्वनिः। अत्र यदि ध्वनिशब्दस्य काव्यवाचकताऽङ्गीक्रियते, तदा भाक्तार्थस्य ध्वनित्वं भाक्तवादाभिमतं न सिद्ध्यति। न खलु 'काव्यविशेषो लाक्षणिकोऽर्थः' इति भाक्तवादिनोऽभिप्रायो भवितुमर्हति। अतोऽत्र 'ध्वन्यत इति ध्वनिः' इति व्युत्पत्त्या ध्वनिशब्दस्य व्यङ्ग्यार्थवाचकतामङ्गीकृत्य भाक्तवादस्य चरितार्थता साधनीया, यतो हि व्यङ्ग्यार्थ एव भाक्तत्वेन कल्पयितुं शक्यते, न तु काव्यम्।

एवमेव 'गुणवृत्तिरित्याहुः' इत्यस्य कथनस्य समर्थनार्थमपि ध्वनिशब्दस्य त्रयोऽर्था अपेक्षिता भवन्ति, यतो हि लोचनकारेण गुणवृत्तिपदस्य त्रयोऽर्था व्युत्पादिताः। यथा—

'गुणाः सामीप्यादयो धर्मास्तैक्ष्ण्यादयश्च तैरुपायैर्वृत्तिरर्थान्तरे यस्य तैरुपायैर्वृत्तिर्वा शब्दस्य यत्र स गुणवृत्तिः शब्दोऽर्थो वा। गुणद्वारेण वा वर्तनं गुणवृत्तिः, अमुख्योऽभिधा व्यापारः'[३] इति।

अत्र गुणवृत्तिशब्दस्य शब्दार्थामुख्याभिधाव्यापाररूपास्त्रयोऽर्था लोचन-कारेण कृताः। ध्वनेर्गुणवृत्तिस्वरूपत्वसम्भावना तदैव जागर्ति यदा ध्वनेरपि त्रयोऽर्थाः स्युः। अतो 'ध्वनतीति ध्वनिः' इति व्युत्पत्त्या शब्दार्थयोः, 'ध्वननं

---

१. ध्वन्या.-१.१ (वृत्तौ); २. तत्रैव-१.१ (लोचने)।
३. तत्रैव-१.१ (लोचने)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ध्वनिः' इति व्युत्पत्त्या च व्यञ्जनाव्यापारस्याभिधायको ध्वनिशब्दो भवति। यथोक्तं तेनैव—

'एतदुक्तं भवति—ध्वनतीति वा, ध्वन्यत इति वा ध्वननमिति वा यदि ध्वनिः, तथाप्युपचरितशब्दार्थव्यापारातिरिक्तो नासौ कश्चित्'[१] इति।

अग्रे ध्वनिकारेण 'सूरिभिः कथितः' इत्यस्य व्याख्यानावसरे वृत्तौ स्वयमेव ध्वनिशब्दस्य पञ्चानामप्यर्थानां निर्देशः कृतः। यथा—

'विद्वदुपज्ञेयमुक्तिः, न तु यथाकथञ्चित्प्रवृत्तेति प्रतिपाद्यते, प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्। ते हि श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः'[२]।

वृत्तावस्यां समागतस्य 'वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यम्' इत्यस्यांशस्य व्याख्याने लोचनकारः पुनः ध्वनिशब्दस्योक्तान् पञ्चार्थान् व्युत्पादयामास। यथा—

'वाच्यवाचकसम्मिश्र इति—वाच्यवाचकसहितः सम्मिश्र इति मध्यमपदलोपी समासः, 'गामश्वं पुरुषं पशुम्' इतिवत् समुच्चयोऽत्र चकारेण विनापि। तेन वाच्योऽपि ध्वनिः, वाचकोऽपि शब्दो ध्वनिः, द्वयोरपि व्यञ्जकत्वं ध्वनतीति कृत्वा। सम्मिश्र्यते विभावानुभावसंवलनयेति व्यङ्ग्योऽपि ध्वनिः, ध्वन्यत इति कृत्वा। शब्दनं शब्दः शब्दव्यापारः, न चासावभिधारूपः, अपि त्वात्मभूतः, सोऽपि ध्वननं ध्वनिः। काव्यमिति व्यपदेशश्च योऽर्थः सोऽपि ध्वनिः, उक्तप्रकारध्वनिचतुष्टयमयत्वात्। अत एव साधारणहेतुमाह—व्यञ्जकत्वसाम्यादिति व्यङ्ग्यव्यञ्जकभावः सर्वेषु पक्षेषु सामान्यरूपः साधारण इत्यर्थः'[३]।

ध्वनिकाराभिमता लोचनकारानुमोदिताश्चैते ध्वनेः पञ्चार्थाः क्रमशोऽर्थशब्दव्यङ्ग्यार्थव्यञ्जनाव्यापारकाव्यरूपा भवन्ति। ध्वनतीति ध्वनिरिति शब्दार्थौ ध्वनिपदाभिधेयौ भवतः, उभयोरपि ध्वननव्यापारवत्त्वात्। ध्वन्यते योऽसौ ध्वनिरिति व्यङ्ग्यार्थो ध्वनिः, ध्वननं ध्वनिरिति व्यञ्जनाव्यापारो ध्वनिः। ध्वन्यतेऽस्मिन्निति ध्वनिरिति चैतेषां समवायरूपः काव्यविशेषोऽपि

---

१. ध्वन्या.-१.१ (लोचने); २. तत्रैव-१.१ (वृत्तौ)।
३. तत्रैव.-१.१ (लोचने)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ध्वनिपदवाच्यतामायाति। ध्वनेरेते पञ्चाप्यर्था ध्वनिसिद्धान्तस्य सम्यगवगतये स्वीकरणीया एव। यतो हि ध्वनिकारेण स्वग्रन्थे भिन्न-भिन्नस्थलेषु एतेषां पञ्चार्थानां कृते एव ध्वनिपदप्रयोग: कृतोऽस्ति। अस्माभि: सम्पूर्णस्य ध्वन्यालोकस्य पर्यालोचनं विधायोक्तेभ्य: पञ्चभ्योऽर्थेभ्यो ध्वनिकारकृतानां ध्वनिपदप्रयोगाणां सङ्ग्रहोऽत्रोपस्थाप्यते, क्रियते च काव्यविशेषमात्र-वाचकत्ववादिनां लोचनोन्मीलनम्।

१ - २ व्यञ्जकशब्दार्थकृते ध्वनिकारकृता ध्वनिपदप्रयोगा:

(क) पदानामपि व्यञ्जकत्वमुखेन व्यवस्थितो ध्वनिव्यवहार:[१]।

(ख) उक्त्यन्तरेणाशक्यं यत्तच्चारुत्वं प्रकाशयन्।
शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयीभवेत्[२]।।

(ग) व्यतिरेकमुखेन शब्दस्य ध्वनित्वं यथा—
रूढा ये विषयेऽन्यत्र शब्दा: स्वविषयादपि।
लावण्याद्या: प्रयुक्तास्ते न भवन्ति पदं ध्वने:[३]।।

अर्थाद् ये शब्दा: स्वविषयादन्यत्र विषये किमपि प्रयोजनं प्रतिपादयितुं प्रयुज्यन्ते' ते रूढव्यतिरिक्ता: शब्दा ध्वने: पदं भवन्तीति ध्वनिकाराभिप्राय:।

(घ) पदानां व्यञ्जकत्वव्याख्यानावसरे ध्वनिकार: पदकृते ध्वनिव्यवहारं समर्थयामास। यथा—

'किञ्च काव्यानां शरीराणामिव संस्थानविशेषावच्छिन्नसमुदायसाध्यापि चारुत्वप्रतीति: अन्वयव्यतिरेकाभ्यां भागेषु कल्प्यत इति पदानामपि व्यञ्जकत्वमुखेन व्यवस्थितो ध्वनिव्यवहारो न विरोधी'[४]।

(ङ) व्यतिरेकमुखेन व्यञ्जकार्थकृते ध्वनिव्यवहारो यथा—

'यत्र च शब्दव्यापारसहायोऽर्थोऽर्थान्तरस्य व्यञ्जकत्वेनोपादीयते स नास्य ध्वनेर्विषय:'[५]।

अर्थात् शब्दव्यापारसहायोऽर्थोऽर्थान्तरस्य यत्र व्यञ्जक: सोऽर्थो ध्वनेर्विषयो भवतीति ध्वनिकाराशयोऽत्र ज्ञातव्य:।

१. ध्वन्या., पृ. ३०१; २. तत्रैव, पृ. १५५।
३. तत्रैव, पृ. १५६; ४. तत्रैव, पृ. ३२६।
५. तत्रैव, पृ. २७०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

३-(क) व्यङ्ग्यार्थकृते ध्वनिव्यवहाराः

आनन्दवर्धनेन वस्तुतो व्यङ्ग्यार्थस्यैव ध्वनित्वमङ्गीकृतम्। ध्वन्यालोके— 'प्रतीयमानं पुनरन्यदेव' इत्याद्युक्त्वा सः प्रतीयमानस्यार्थस्यैव वाच्याद् व्यतिरिक्तं स्वरूपं साधयितुमुपक्रमते। क्रमशश्च 'सरस्वती स्वादु तदर्थवस्तु, शब्दार्थशासनज्ञानमात्रेण, सोऽर्थः तद्व्यक्तिसामर्थ्ययोगी शब्दश्च, काव्यस्यात्मा स एवार्थः'[१] इत्यादिवचनैर्व्यङ्ग्यार्थमेव काव्यात्मरूपेण व्यवस्थापयामास। काव्यस्यात्मा च ध्वनिरिति व्यङ्ग्यार्थस्य ध्वनित्वं सिद्ध्यत्येव। एवमेव ध्वन्यालोकेऽनेकस्थलेषु व्यङ्ग्यार्थस्य कृते ध्वनिपदव्यवहार उपलभ्यते।

(ख) 'वाच्यव्यतिरिक्तस्यार्थस्य वाच्यवाचकाभ्यां तात्पर्येण प्रकाशनं यत्र स ध्वनिः'[२]।

(ग) असंलक्ष्यक्रमोद्योतः क्रमेण द्योतितः परः।
विवक्षिताभिधेयस्य ध्वनेरात्मा द्विधा मतः[३]॥

अत्र क्रमेणासंलक्ष्यक्रमेण च द्योतितावर्थावेव ध्वनेरात्मत्वेनाङ्गीकृतौ।

(ङ) मुख्यतया प्रकाशमानो व्यङ्ग्योऽर्थो ध्वनेरात्मा[४]।
अर्थशक्त्युद्भवस्त्वन्यो यत्रार्थः स प्रकाशते।
यस्तात्पर्येण वस्त्वन्यद्व्यनक्त्युक्तिं विना स्वतः॥

यत्रार्थः स्वसामर्थ्यादर्थान्तरमभिव्यनक्ति शब्दव्यापारं विनैव सोऽर्थशक्त्युद्भवो नामानुस्वानोपमव्यङ्ग्यो ध्वनिः[५]।

व्यतिरेकमुखेन व्यङ्ग्यार्थकृते ध्वनिव्यवहारो यथा—

यत्र प्रतीयमानार्थः प्रम्लिष्टत्वेन भासते।
वाच्यस्याङ्गतया वापि नास्यासौ गोचरो ध्वनेः[६]॥

अत्र प्रम्लिष्टत्वेन भासमानस्य प्रतीयमानार्थस्य ध्वनित्वं निरस्तं फलतः स्फीततया प्रकाशमानस्यार्थस्य ध्वनित्वाङ्गीकारः सिद्ध्यत्येव।

---

१. ध्वन्या., पृ. ९२-१००; २. तत्रैव, पृ. १४९।
३. ततैव, पृ. १८३; ४. तत्रैव, पृ. १८३।
५. ततैव, पृ. २६७; ६. तत्रैव, पृ. ३०३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एतदतिरिक्ता अपि व्यङ्ग्यार्थकृते बहवो ध्वनिपदप्रयोगा ध्वन्यालोकेऽन्वेष्टुं शक्यन्ते। किञ्च ध्वनिकारेण व्यङ्ग्यतायामलङ्काराणां ध्वनित्वमभ्युपगतम्। अलङ्काराश्चार्थरूपा एव भवन्तीति तत्रापि व्यङ्ग्यार्थस्य ध्वनिपदवाच्यत्वं निर्विवादमेव।

४. व्यञ्जनाव्यापारकृते ध्वनिपदव्यवहाराः

क. यत्र तु विवक्षिततत्वेन व्यङ्ग्यस्य स्थितिः, तद् व्यञ्जकत्वं ध्वनिव्यवहारस्य प्रयोजकम्[१]।

ख. तृतीयोद्द्योते व्यञ्जकत्वसिद्धिप्रसङ्गे सर्वत्र व्यञ्जनाव्यापारकृते ध्वनिपदप्रयोगो ध्वनिकारेण कृत इति व्यञ्जनाव्यापारस्य ध्वनित्वसाधने नास्ति प्रमाणाभावः।

५. काव्यविशेषकृते ध्वनिपदव्यवहाराः

(क) यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः[२]॥

(ख) तत्परावेव शब्दार्थौ यत्र व्यङ्ग्यं प्रति स्थितौ।
ध्वनेः स एव विषयो मन्तव्यः सङ्करोज्झितः॥

अत्र यत्रेति यस्मिन् काव्ये तत्काव्यमेव ध्वनिरित्यवगन्तव्यम्।

(ग) प्राप्तपरिणतीनान्तु ध्वनिरेव काव्यम्।

(घ) काव्यविशेषोऽङ्गी ध्वनिरिति कथितः।

(ङ) काव्यस्यैव प्राधान्ये ध्वनिसंज्ञितः काव्यप्रकारः।

इत्येवं सोदाहरणं सप्रमाणञ्च सिद्ध्यन्ति ध्वनिशब्दस्योक्ताः पञ्चार्थाः, अतो ध्वनिशब्दस्य काव्यविशेषमात्रवाचकत्वाङ्गीकरणं नोचितं प्रतिभातीति।

●

---

१. ध्वन्या., पृ. ४४२।

२. तत्रैव, पृ. १०२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

धर्माभिवृद्धये नैमिषारण्यस्य महत्त्वम्

डॉ. व्यासमिश्रः

अध्यक्षः, धर्मशास्त्र-विभागस्य

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये, वाराणस्याम्

***

निमिषशब्दस्यार्थो विष्णुर्भवति। यथा—

'निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः'।

(महाभारते १/१४९/३६)

निमिषशब्दस्य व्याकरणशास्त्रदृष्ट्या एवं प्रकारेण व्युत्पादनं भवति। यथा—

निमिषति, नि+मिष+इगुपधेति (पा.सू. ३/१/१३५) सूत्रेण कः। कालविशेषः चक्षुर्निमीलनम् इति मेदिनी वै. ३९। महाभारते (१/१८९/१९) निमिषशब्दस्य कालविशेषस्य ख्यापनाय प्रयोगो विहितः, यथा—

सज्यञ्च चक्रे निमिषान्तरेण शराँश्च जग्राह दशार्द्धसंख्यान्।

प्रायः स बाहुल्येन निमिषशब्दः कालवाचको परिगृहीतः सर्वेषु शास्त्रेषु। निमिषशब्दोऽपि अस्यैव पर्यायवाचकः। 'अष्टादशनिमेषास्तु काष्ठा' इति अमरकोषे (१/४/११), तत्र 'क्षणद्वयं लवः प्रोक्तो निमेषस्तु लवद्वयम्' इत्यनेन अष्टादशकाष्ठाया अर्थात् क्षणचतुष्टयस्य कालो निमेषो भवति। यथा च ज्योतिषशास्त्रे सिद्धान्तशिरोमणिकारो भास्कराचार्य उक्तवान्—

'योऽक्ष्णोर्निमेषस्य खरामभागः स तत्परः'। (सि.शि. १.१६)

तत्र निमेषशब्देन अक्ष्णोः पक्ष्मपातकालो निरूपितः। कस्यापि स्वस्थपुरुषस्य पक्ष्मपातो यावता कालेन भवति तस्य कालस्य नाम एव निमेषः। एवमेव मनुस्मृतौ भगवान् मनुः कालविधायकस्यास्य निमेषशब्दस्य वर्णनं कुर्वन् उक्तवान्—

निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कलाः।

त्रिंशत्कला मुहूर्तः स्यादहोरात्रं तु तावतः।। (मनु. १.६७)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एवं कालवाचकस्य निमिषशब्दस्य माध्यमेन नैमिषारण्यस्य सम्बन्धः कथं भवतीति विचार्यते। निमिषस्येदं नैमिषमारण्यमिति। सम्भावनायां नैमिषारण्यस्य शब्दसिद्धिर्भवति। प्राचीनकालादेव नैमिषारण्यस्य महत्त्वं पुराणेषु प्राप्यते। अस्य सुसिद्धस्य अरण्यस्य कथं नैमिष-नाम्ना प्रसिद्धिरभवद् इति विचारे प्राप्यते यद् दुर्जेयस्य महासुरस्य निमेषमात्रेण कालेन संहाशेः भगवता कृतोऽत्रैवारण्ये। तेन कारणेन नैमिषारण्यस्य नामाभवत्, यथा—

निमिषान्तरमात्रेण निहितमासुरं बलम्।
यत्र ततस्तत्तु नैमिषमारण्यमभवत्।। (वराहपु. ४.२७)

अस्योत्पत्तिर्वराहपुराणे भगवता गौरमुखनामकाय ऋषये प्रोक्ता—

तेन चक्रेण तत्सैन्यमासुरं दौर्जयं क्षणात्।
निमिषान्तरमात्रेण भस्मवद्बहुधा कृतम्।।
एवं कृत्वा ततो देवो मुनिगौरमुखं तदा।
उवाच निमिषेणेदं निहतं दानवं बलम्।।
अरण्येऽस्मिंस्ततस्त्वेवन्नैमिषारण्यसंज्ञकम्।।
भविष्यति यथार्थं वै ब्राह्मणानां विशेषतः।।
(वराह-पु. ४.२८-३०)

कूर्ममहापुराणे चत्वारिंशदध्याये नैमिषारण्यस्य महत्त्वं प्रतिपादयन् प्रजापतिना ब्रह्मणा निगदितं यत् मया विसृष्टं मनोमयं चक्रं यत्र गत्वा नेमिभङ्गेन अवरुद्धो भविष्यति, तस्मिन् स्थाने सर्वदा सिद्धचरणानां भगवतः शम्भोः, अन्येषां च देवानां यक्षगन्धर्वाणां निवासो भविष्यति। तच्चक्रमत्रैव नैमिषारण्ये अपतत्, अत एव नैमिषारण्यस्य सर्वेषां देवानां निवासभूतत्वात् प्रतिष्ठा समुत्पन्ना। यथा—

देशं च सम्प्रवक्ष्यामि यस्मिन् देशे चरिष्यथ।
उक्तं मनोमयं चक्रं स सृष्ट्वा तानुवाच ह।।
क्षिप्रमेतन्मया चक्रमनुव्रजत् माचिरम्।
यत्रास्य नैमिः शीर्येत देशे पुरुषर्षभ।।
ततो मुमोच तच्चक्रं ते च तत् समनुव्रजन्।
तस्य वै व्रजतः क्षिप्रं यत्र नेमिरशीर्य्यत।।
नैमिषं तत् स्मृतं नाम्ना पुण्यं सर्वत्र पूजितम्।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सिद्धचारणसङ्कीर्णं यक्षगन्धर्वसेवितम्।
स्थानं भगवतः शम्भोरेतन्नैमिषमुत्तमम्।।
यत्र देवाः सगन्धर्वाः सयक्षोरगराक्षसाः।
तपस्तप्त्वा पुरा देवा लेभिरे प्रचुरान् मखान्।।
(कूर्म-पु. ४०.१२९-१३३)

वायुपुराणेऽप्यस्य नैमिषारण्यस्य महत्त्वं बहुविस्तरेण प्रतिपादितम्। यथा—

यत्तन्मनोमयं चक्रं मया सृष्टं विसृज्यते।
यत्रास्य शीर्य्यते नेमिः स देशस्तपसः शुभः।।
इत्युक्त्वा सूर्यसङ्काशं चक्रं सृष्ट्वा मनोमयम्।
प्रणिपत्य महादेवं विससर्ज पितामहः।।
तेऽपि हृष्टतमा विप्राः प्रणम्य जगतां प्रभुम्।।
प्रयुतस्य च चक्रस्य नेमिर्यत्र व्यशीर्यत।
तद्वनं तेन विख्यातं नैमिषं मुनिपूजितम्।। (वायु-पु. ४.४२-२६)

देवीभागवते (१/२/२८-३२) नैमिषारण्यस्य विशेषेण विचारः कृतो विद्यते। कलियुगस्य प्रभावेण विभीता देवा ब्रह्मणः पार्श्वे गताः। तदा ब्रह्मणा कथितं यद् अहं मनोमयं चक्रं प्रक्षिपामि। अस्य पृष्ठतो भवन्तः सर्वेऽपि गच्छन्तु। यत्र चक्रमिदमवरुद्धं भविष्यति, तत्र कलियुगस्य प्रभावो नैव स्यात्। तच्छ्रुत्वा सर्वे देवाश्चक्रस्यानुगमनं कुर्वन्तो नैमिषारण्यं गतवन्तः। तत्रैव चक्रस्य स्थगनमभवत्, ततः कालाद् ब्रह्मण आदेशेन कलियुगस्य प्रभावोऽत्र क्षेत्रे कदापि न भवति। पुनः सत्ययुगस्य आगमनपर्यन्तमस्मिन् क्षेत्रे कलेः प्रभावो व्यपगतो विद्यत इति ब्रह्मण आशीर्वादः, यथा—

कलिकालविभीताः स्मो नैमिषारण्यवासिनः।
ब्रह्मणात्र समादिष्टाश्चक्रं दत्वा मनोमयम्।।
कथितं तेन यत्सर्वे गच्छन्त्वेतस्य पृष्ठतः।
नेमिः संशीर्य्यते यत्र स देशः पावनः स्मृतः।।
कलेस्तत्र प्रवेशो न कदाचित् सम्भविष्यति।
तावत् तिष्ठन्तु तत्रैव यावत् सत्ययुगं पुनः।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तच्छ्रुत्वा वचनं तस्य गृहीत्वा तत्कथानकम्।
चालयन्निर्गतस्तूर्णं सर्वदेशदिदृक्षया।।
प्रेत्यात्र चालयं चक्रं शीर्णोऽत्र हि पश्यतः।
तेनेदं नैमिषं प्रोक्तं क्षेत्रं परमपावनम्।।
(देवीभाग. १.२.२८-३२)

नैमिषारण्यप्रदेशस्य वासिनो नैमिषीयाः कथ्यन्ते। कण्वसंहितायां कौषीतकिब्राह्मणे तथा छान्दोग्योपनिषदि नैमिषीयाः पवित्रतमाः स्वीकृताः सन्ति। अस्मादेव कारणात् महाभारतस्य सर्वप्रथमं वाचनम् उपदेशश्च नैमिषारण्यवासिनामृषीणां कृते एवाभवत्।

उत्तरप्रदेशस्य सीतापुरजनपदे पवित्राया गोमतिनद्यास्तटे विराजितमिदं पवित्रं तीर्थस्थलम् एवमप्युच्यते यत् शौनकमहर्षेर्मनसि दीर्घकालव्यापकस्य ज्ञानसत्रस्य आयोजनार्थं कामना समुत्पन्ना। तस्याराधनेन भगवता विष्णुना एवं चक्रं प्रदत्तम्, स उक्तवान् यदस्य चक्रस्य नेमिर्यत्र पतितः स्यात् तस्मिन्नेव प्रदेशे आश्रमं कृत्वा ज्ञानसत्रस्य आयोजनं कर्त्तव्यम्। एवं चक्रस्य नेमेरत्रैव पतनेन ज्ञानसत्रस्य अनुष्ठानं कृतं महर्षिणा शौनकेन। तस्मादेव कालाद् अस्य नैमिषारण्यस्य महत्त्वं प्रतिष्ठापितम्। एतदपि पुराणे निगदितं यत् शौनकमहर्षेर्ज्ञानसत्रे अष्टाशीतिसहस्रमृषयः सम्प्रविष्टा आसन्।

एवमस्य नैमिषारण्यस्य महत्त्वं भारतीयसनातनधर्मे ये केऽपि मान्यग्रन्थाः पुराणानि स्मृतयश्च सन्ति, तेषु नैमिषारण्यस्य भूरि-भूरिप्रशंसा कृता। इदं क्षेत्रं पवित्रतमम्, आध्यात्मिकसाधनाया आधारभूतं विद्यत इति नास्ति सन्देहः। इदानीमपि अस्मिन् नैमिषारण्यक्षेत्रे तपःपूताः स्वामिनो योगिनो विद्वांसश्च विलसन्ति। शास्त्राणामध्ययनमध्यापनं च सुष्ठुतया दृश्यते। नैमिषारण्ये प्रतिदिनं साधुपुरुषाणां ज्ञानिनां च उपदेशामृतं स्रवति। जना अपि श्रद्धया निष्ठया आस्तिकबुद्ध्या च प्रायः काले काले समागता भवन्ति। सम्पूर्णेऽपि भारते अस्य स्थानस्य आदरभावः प्रमुखतया दरीदृश्यते।

यथा सर्वाणि शास्त्राणि पुराणानि च भारते।
नैमिषारण्यक्षेत्रस्य माहात्म्यं प्रदिशन्ति हि।।
व्यासमिश्रेण लेखोऽयं विदुषां प्रीतिकारकः।
नैमिषारण्यवासिनां प्रमोदाय विलेखितः।।

।। इति शिवार्पितमस्तु ।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रीमद्वाल्मीकीयरामायणानुसारं श्रीलक्ष्मणस्य चरितम्

श्रीविनोदप्रसादमिश्रः
शोधच्छात्रः
डॉ. रा.म.लो. अवध-विश्वविद्यालये
फैजाबादे

***

श्रीमद्वाल्मीकीयरामायणे वर्णितानां समेषां पात्राणां चरितानि सर्वथा मर्यादितानि सन्ति। सर्वे यथायोग्यकार्यानुसारमेव मर्यादामनुल्लङ्घ्य कार्याणि कृतवन्तः सन्ति। भगवान् श्रीरामस्तु मर्यादापुरुषोत्तमरूपेणैव समग्रसंस्कृत-वाङ्मये वर्ण्यविषयोऽस्ति। तस्यानुजः श्रीमल्लक्ष्मणोऽपि तदनुगुणानुरूपमेव न कदापि स्वकीयां मर्यादामुल्लङ्घयितुं कामयते। विशेषतः श्रीमद्वाल्मीकीय-रामायणे, अथ च अन्यस्मिन्नपि काव्यग्रन्थेषु भगवतः श्रीरामचन्द्रस्य अनन्यसेवकत्वेन सर्वविधसमर्पितभावेन वर्णनं मिलति। यद्यपि कविभिः स्वकीयेषु काव्यग्रन्थेषु विविधरूपेण श्रीरामचरितवर्णनक्रमे तदङ्गभूतानामन्येषाञ्च भ्रातॄणां वर्णनं कृतमस्ति, तत्तु स्वकीयकाव्यप्रणयनपद्धतिमेव सूचयति। तथाऽपि श्रीमद्रामायणे यद् वर्णनं मिलति, तत्तु न केवलं काव्यप्रणयनमेव, अपि तु साक्षाद् ब्रह्मोपदिष्टत्वाद् वेदवर्णनमस्ति। तत्र श्रीमतो लक्ष्मणस्य चरितविषये यल्लिखितमस्ति तदंशभूतं किञ्चिदेवात्र लिख्यते।

व्युत्पत्तिदृष्ट्या चरितशब्दस्तु गतिभक्षणार्थकयोः 'चर'-धातुः धातुपाठे लिखितोऽस्ति, अत्र तु गत्यर्थकत्वमेव स्वीकृत्य तस्मात् 'इतच्'-प्रत्ययेन अथ च 'क्त'प्रत्ययेनापि इडागमे कृते सिद्ध्यति। श्रीलक्ष्मणेन स्वकीयजीवने यानि यानि कार्याणि धर्मविहितानि कृतानि सन्ति, तेषामेव वर्णनं श्रीलक्ष्मण-चरितवर्णनमस्ति। चरितपदेन कृतकार्यमेव ज्ञायते, अत एव आदिकाव्येऽस्मिन् श्रीलक्ष्मणस्य स्वरूपवर्णने महर्षिवाल्मीकेः 'लक्ष्मणो लक्ष्मिवर्धनः'[१] इति वाक्येन लक्ष्मीवर्धनस्वरूपत्वं स्वीकृतमस्ति। श्रीलक्ष्मणस्य तु न हि सामान्य-

---

१. वाल्मीकीयरामायणे–१/१८/२८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वरूपमस्ति, अपि तु शेषत्वस्वरूपत्वमपि स्वीकृतमस्ति। अपि च श्रीरामचरितमानसे श्रीगोस्वामितुलसीदासेनापि श्रीलक्ष्मणस्य स्वरूपवर्णने लिखितमस्ति—

सेस सहस्रसीस जगकारन। जो अवतरेउ भूमि भय टारन॥
सदा सो सानुकूल रह मोपर। कृपासिन्धु सौमित्रि गुनाकर[१]॥

अर्थात् श्रीलक्ष्मणः शेषावतारोऽस्ति। शेषस्तु सहस्रशिरस्कोऽस्ति, स एव पृथिवीं धारयति। अपि च भगवतः श्रीरामस्य सेवाकरणार्थमेव अवतरितोऽस्ति श्रीलक्ष्मणस्वरूपत्वेन। स एव पृथिव्याः सर्वविधभयं दूरीकर्तुं समर्थोऽस्ति, स तु समस्तसद्गुणानामाश्रयोऽस्ति। स एव सुमित्रायाः पुत्रः कृपासागरोऽस्ति, एतादृशगुणसम्पन्नो यः श्रीलक्ष्मणः स मयि कृपां करोतु प्रसन्नोऽपि भवत्विति।

श्रीमद्यामुनाचार्येण स्तोत्ररत्ने श्रीलक्ष्मणस्य शेषत्वं स्वीकुर्वन् लिखितमस्ति—

निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणादिभिः।
शरीरभेदैस्तव शेषतां गतैर्यथोचितं शेष इतीर्यते जनैः[२]॥

अपि च शेषशब्दार्थस्य व्याख्या पूर्वमीमांसायामपि लिखितास्ति—'शेषः परार्थत्वात्'[३]।

तत्त्वत्रये तु 'यथेष्टविनियोगार्हत्वं शेषत्वम्'[४] इति। एवमेव अन्यत्रापि शेषत्वस्य व्याख्या कृतास्ति; परन्तु सङ्क्षेपेणैवात्र किञ्चिदेव लिखितास्ति। भगवतः श्रीरामचन्द्रस्य सर्वविधसमर्पितसेवकः श्रीलक्ष्मण एवास्ति, यथा वाल्मीकीयरामायणे स्वयमेव लक्ष्मणेन उक्तमस्ति—

'भर्ता भ्राता च बन्धुश्च पिता च मम राघवः'[५]।

अर्थाद् भगवान् श्रीराम एव मदीयसर्वस्वत्वेनास्ति। अपि च स्वमात्रा सुमित्रयाऽपि राममेव सर्वं स्वीकर्तुं श्रीलक्ष्मणो निर्दिष्टोऽस्ति। यथा—

---

१. श्रीरामचरितमानसे- १/१६/७-८।
२. स्तोत्ररत्नम्- (श्रीमद्यामुनाचार्यकृतम्) श्लो. ४०।
३. पूर्वमीमांसासूत्रम्।
४. तत्त्वत्रयम्।
५. वाल्मीकीयरामायणे- २/५८/३१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'रामं दशरथं विद्धि मां विद्धि जनकात्मजाम्।
अयोध्यामटवीं विद्धि गच्छ तात यथासुखम्'[१]।।

एवमेव सम्पूर्णजीवने भगवतः श्रीरामस्यैव सेवा श्रीलक्ष्मणस्य परमं कर्तव्यमासीत्।

व्यक्तेर्जीवने सर्वाः क्रिया भिन्ना-भिन्ना भवन्ति, श्रीलक्ष्मणस्य यत्कार्यमस्ति, तदेव तस्य स्वाभाविकं स्वरूपं प्रकटयति। श्रीलक्ष्मणस्य नैजं चरितमिदमेवास्ति यत् स सर्वात्मना समर्पितभावेन श्रीरामस्यैवास्ति। तस्मिन् स्वत्वभावना नास्ति। एवं नास्ति स्वकीयं किञ्चिदपि वस्तु श्रीरामादतिरिक्तमित्ययमेव पक्षस्तस्य सर्वविधं श्रीरामं प्रति समर्पणभावमेव द्योतयति।

सामाजिकदृष्ट्या श्रीलक्ष्मणस्य दृष्टौ समाजस्यायमेवार्थोऽस्ति, यः समूहः श्रीरामस्य कृत एवास्ति, स एव समूहः समाजो भवति। नान्यत् तद्विपरीतः कोऽपि समूहः समाजपदव्यवहारविषयोऽस्ति। अनेनार्थेन तस्य सर्वस्मिन् वस्तुनि श्रीरामस्यैव स्वरूपदर्शनमस्ति। न तु समाजस्योपेक्षास्ति।

यस्मिन् समये प्रजापतिब्रह्मण आदेशादागतेन कालेन सह ऐकान्तिक-वार्ताकाले श्रीरामो वार्तां कुर्वन् आसीत् तत्काल एव महर्षिदुर्वासा आगच्छति। अपि चागत्य द्वारस्थं श्रीलक्ष्मणं प्रति कथयति—

रामं दर्शय मे शीघ्रं पुरा मेऽर्थोऽतिवर्तते।
मुनेस्तु भाषितं श्रुत्वा लक्ष्मणः परवीरहा।।
अभिवाद्य महात्मानं वाक्यमेतदुवाच ह।।
किं कार्यं ब्रूहि भगवन् को ह्यर्थः किं करोम्यहम्।
व्यग्रो हि राघवो ब्रह्मन् मुहूर्तं परिपाल्यताम्[२]।।

अनेन ज्ञायते यत् श्रीलक्ष्मणः श्रीरामेण निर्दिष्टमादेशं पालयितुं स्वकीयान् प्राणान् अपि त्यक्तुं नहि किञ्चिदपि दुःखमनुभवति स्म। स तु जानाति रामस्यादेशपालनाभावे मृत्युदण्डस्य पात्रं भविष्यामि। अपि च

---

१. वाल्मीकीयरामायणे- २/४०/९।
२. तत्रैव- ७/१०५/२-४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मुनेरादेशपालनाभावे शापभाग् भविष्यामि। मुनेः शापस्तु न केवलं मत्कृत एवास्ति, अपि तु श्रीरामं प्रत्यपि भरतं प्रत्यपि सम्पूर्णं राष्ट्रं प्रत्यपि भविष्यति। शापात् सर्वेषां विनाशो भविष्यति। अत एवात्र श्रीरामस्य काचिदपि हानिः, भरतस्य काचिदपि हानिः, राष्ट्रस्य च काचिदपि हानिर्न भवेत्, एतदर्थं यदि मृत्युदण्डरूपेण मम प्राणा अपि त्याज्याः सन्ति, तत्तु वरमेवास्ति। मत्प्राणरक्षार्थं यदि राष्ट्रस्य हानिः स्यात्, श्रीरामाय किञ्चिदपि दुःखं स्यात्, श्रीभरताय किञ्चिदपि दुःखं स्यात्, तर्हि मज्जीवनस्य किं साफल्यं स्यात्, निरर्थकमेव जीवनं भविष्यति, मदीयमते प्राणत्याग एव वरमिति निर्णीय शापाद्विमुक्तः। दुर्वाससः शापस्तु यथा—

'अस्मिन् क्षणे मां सौमित्रे रामाय प्रतिवेदय।
विषयं त्वां पुरं चैव शपिष्ये राघवं तथा।।
भरतं चैव सौमित्रे युष्माकं या च सन्ततिः।
नहि शक्ष्याम्यहं भूयो मन्युं धारयितुं हृदि[१]।।

शापेऽस्मिन् सर्वेषामेव विनाशहेतुता दृश्यते। अतस्तद्रक्षार्थं श्रीलक्ष्मणेन मृत्युदण्डमेव वरमित्यङ्गीकृतम्। अयमेव त्यागः श्रीलक्ष्मणस्य वैदुष्यपूर्णं मर्यादितचरितं द्योतयति। यथोक्तम्—

'एकस्य मरणं मेऽस्तु माभूत् सर्वविनाशनम्'[२]।

अथ स निर्णयानुसारमेव मुनेरागमनं श्रीरामाय निवेदितवान्। अनन्तरं मुनिसत्कारं कृत्वा कालेन सह वार्ताकाले यो निर्णयः कृत आसीत्, यस्तु आवयोर्मध्ये वार्ताकाले आगच्छति चेत्, स मृत्युदण्डभाग् भविष्यति, इति प्रतिज्ञां विचारयन् श्रीरामोऽत्यन्तं दुःखी सञ्जातः। तं दृष्ट्वा श्रीलक्ष्मणः श्रीरामं प्रति श्रीरामेण को धर्म इदानीमाचरणीयः पालनीयश्च तं कथयति। यदा भवान् मत्कृते मृत्युदण्डं नहि प्रदास्यति, तदा तु महान् अधर्मो भविष्यति। यथा—

न सन्तापं महाबाहो मदर्थं कर्तुमर्हसि।
पूर्वनिर्माणबद्धा हि कालस्य गतिरीदृशी।।

---

१. वा.रा., ७/१०५/६-७।
२. तत्रैव, ७/१०५/९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जहि मां सौम्य विस्रब्धं प्रतिज्ञां परिपालय।
हीनप्रतिज्ञाः काकुत्स्थ प्रयान्ति नरकं नराः।।
यदि प्रीतिर्महाराज यद्यनुग्राह्यता मयि।
जहि मां निर्विशङ्कस्त्वं धर्मं वर्धय राघव[१]।।

अनेन वाक्येन ज्ञायते यद् राज्ञे राजधर्मपालनमेव वरं कार्यमस्ति, अन्यथा राज्ञो दुर्गतिरेव भवति। अथ यदि मत्कृते श्रीरामेण मृत्युदण्डं न दीयते, तदा तु राजधर्मपालनविरतस्य रामस्य नारकीयगतिरेव भविष्यति। अत एव मत्कृते अवश्यमेव मृत्युदण्डो दातव्यः; परन्तु श्रीरामेण मृत्युदण्डस्य विकल्परूपेण श्रीलक्ष्मणस्य त्यागमेव करणीयमिति निर्णीय श्रीलक्ष्मणस्तेन सूचितः, सोऽपि श्रीरामस्य स्वं प्रति ममतां विचार्य रामस्य धर्मरक्षार्थं साश्रुपूरितनेत्रस्तं प्रणम्य अविलम्बेनैव सरयूतटं गतवान्। मृत्युदण्डस्य विकल्परूपेण धर्मशास्त्रे यल्लिखितमस्ति तत् संस्मृत्य श्रीरामो लक्ष्मणस्य त्यागं कृतवान्—

विसर्जये त्वां सौमित्रे माभूद्धर्मविपर्ययः।
त्यागो वधो वा विहितः साधूनां ह्युभयं समम्[२]।।

स गत्वा सरयूतीरमुपस्पृश्य कृताञ्जलिः।
निगृह्य सर्वस्रोतांसि निःश्वासं न मुमोच ह।।
अनिःश्वसन्तं युक्तं तं सशक्राः साप्सरोगणाः।
देवाः सर्षिगणाः सर्वे पुष्पैरभ्यकिरंस्तदा।।
अदृश्यं सर्वमनुजैः सशरीरं महाबलम्।
प्रगृह्य लक्ष्मणं शक्रस्त्रिदिवं संविवेश ह[३]।।

एवं मर्यादापालनपूर्वकं भगवतः श्रीरामस्यैव सेवाकरणं स्वस्मै रामस्य धर्महानिर्न भवेत्, एतदर्थं सर्वविधनियमपालनमपि तस्य चरितं महत्त्वपूर्णं करोति। सेवाविषयेऽपि आबाल्यकालादेव आजीवनं समर्पणभावेनैव

१. वा.रा., ७/१०६/२-४।
२. वही, ७/१०६/१३।
३. वही, ७/१०६/१५-१७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तदनुगामित्वं स्वीकृत्य स्वर्लोकं गतवान्। अनेन ज्ञायते यत् सेवाधर्म एव परमधर्मः, तस्य मूर्तिः श्रीलक्ष्मण एव।

श्रीमद्वाल्मीकीयरामायणे श्रीलक्ष्मणेन केन सह कथं वर्तितव्यं, किं कार्यं केन रूपेण करणीयं किमकरणीयं, किं करणान्मर्यादोल्लङ्घनं भवतीत्यादिकं सर्वं नैजं, सामाजिकं, राष्ट्रीयं व्यवहारविषयकं वर्णनं विस्तृतं मिलति। तदस्माकं कृतेऽपि महत्त्वपूर्णं वर्तते। सेवा केन करणीया भवतीति तु श्रीलक्ष्मणस्य चरिताऽनुचिन्तनेनैव ज्ञेया भवति। यदि समाजोऽपि एवमेव कुर्यात्, तदा तु समाजस्यापि उन्नतिर्भविष्यत्येव। अत एव श्रीलक्ष्मणचरितं सर्वदा सर्वथा सर्वैराचरणीयमस्तीति।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भक्तितत्त्वविमर्शः

श्रीराजेश्वरद्विवेदी
कनिष्ठ-अनुसन्धान-अध्येता
(भारतीयदार्शनिकानुसन्धानपरिषद्)
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणस्याम्

❋❋❋

नवरसान्विता भक्तिर्भावरूपाद् विशिष्यते।
भक्त्यैव बोध्यते ब्रह्म रसरूपेण वर्तते।।

सुखमेव जगति परमपुरुषार्थो दृश्यते। अत एव तत्साधनेष्वपि धर्मार्थकाममोक्षेषु पुरुषार्थताव्यपदेशः। तेषु मोक्षः परमपुरुषार्थः, नित्यत्वाद् आनन्दात्मरूपत्वात्, 'न स पुनरावर्तते' इति श्रुतेः (छा. ८।१५।७)। यद्गत्वा न निवर्तन्ते तद्धाम परमं ममेत्यादिस्मृतेश्च (भ.गी. १५।६)। इतरपुरुषार्था अनित्याः। तेषामपि विनियोगः परमपुरुषार्थाय कर्त्तव्यः। शास्त्रेष्वपि एकमेव परमं मोक्षाख्यं लक्ष्यं विद्यते यद् आत्यन्तिकदुःखनिवृत्ति-पूर्वकानन्तपरमसुखावाप्तिः। केनोपायेन सुखावाप्तिर्भवितुमर्हति कर्मणा, ज्ञानेन, भक्त्या वा। त्रिभिरपि उपायैः सुखावाप्तिर्भगवत्प्राप्तिश्च भवति। यथा श्रीमद्भागवते भगवता उक्तम्—

योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया।
ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्।।
(भा. ११.२०.६)

अत्रोपायत्रयमुत्तरोत्तरं सहायकत्वेन वर्तते। वर्णाश्रमधर्मरूपः कर्मयोगोऽन्तःकरणशुद्धिसाधनत्वेनानुष्ठेयः। कर्मयोगेन फलभोगेन च पापक्षयो भवति। ततोऽन्तःकरणशुद्धिः। अन्तःकरणशुद्ध्या तैलधारावद-विच्छिन्नभगवदेकाकारप्रत्यययोग्यं मनस्सम्पाद्यते। ततो ध्रुवानुस्मृतिरूप-भगवद्भक्तिः प्रादुर्भवति। अतः कर्मयोगसाध्यामन्तःकरणशुद्धिमवाप्य निर्विण्णो भूत्वा देहेन्द्रियविषयादिष्वनासक्त्या ज्ञानयोगः प्रतिष्ठितो भवति। तत्र भागवते उक्तम्—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदिनः।
मनस्त्यजति दौरात्म्यं चिन्तितस्यानुचिन्तया।।

(भा. ११.२०.२३)

विषयानासक्तमनसि निरन्तरभगवदाकाराकारितचिन्तनेन स्मरणेन च ध्यानयोगेनाव्यभिचारिणी भक्तिस्सम्पद्यते। तेन भजतो भक्तस्य हृदि स्थितेन भगवता हृदयस्था सर्वकामा नश्यन्ति। 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे'।। (मु.उ. २.२.८) इति श्रुत्याप्युक्तम्। हृदिस्था सञ्चरिता भक्तिर्विषयनिष्ठं प्रेमाणं भगवत्येव संस्थाप्य सर्वकामेभ्यो विमुखस्य भक्तस्य भगवदेकाकारप्रत्यये निरतस्य चित्तवृत्तौ विभावानुभावव्यभिचारिसंयोगेन रसरूपतामेति, भगवदाकारतारूपरत्याख्यः स्थायिभावः परमानन्दसाक्षात्कारात्मको भक्तिशब्देनावगम्यते। द्रुतचित्तस्य भगवदाकारता स्थायिभावस्तस्या एव साक्षात्कारात्मकः परमानन्दरूपो रसः। अत्रालम्बनोद्दीपनयोर्विभावयोरालम्बनं साक्षात् परमेश्वरः। येनाश्रयेण भक्तिरूपो रस उत्पद्यते। उद्दीपनं श्रवणं कीर्तनं स्मरणाद्या नवधा भक्तिप्रकाराः। यैर्भगवदाराधनया भक्तिभाव उद्दीप्यते वर्द्धते वा। अनुभावो नामालम्बनोद्दीपनविभावयोः पश्चाद् भावातिरेके भक्तस्य भगवति तुष्ट्यर्थं स्वेदरोमाञ्चवैवर्ण्यम्। स च कार्यत्वाद् अनन्तः। भक्तिभावे सुखास्वादने परमोपकारिसाधनत्वेन आविर्भूततिरोभूतभावा व्यभिचारिशब्देन व्यवह्रियन्ते। यथा—(१) निर्वेदः, (२) ग्लानिः, (३) शङ्का, (४) असूया, (५) मदः, (६) श्रमः, (७) आलस्यम्, (८) दैन्यम्, (९) चिन्ता, (१०) मोहः, (११) स्मृतिः, (१२) धृतिः, (१३) व्रीडा, (१४) चपलता, (१५) हर्षः, (१६) आवेगः, (१७) जडता, (१८) गर्वः, (१९) विषादः, (२०) औत्सुक्यम्, (२१) निद्रा, (२२) मूर्च्छा, (२३) सुप्तिः, (२४) विबोधः, (२५) अमर्षः, (२६) अवहित्था, (२७) उग्रता, (२८) मतिः, (२९) व्याधिः, (३०) उन्मादः, (३१) मरणम्, (३२) त्रासः, (३३) वितर्कः।

अत उपशान्तसर्वपापोपद्रवाणां, रागद्वेषरहितानां, देहेन्द्रियादिष्वनासक्तानां, भगवद्गुणगरिमग्रन्थश्रवणेन द्रुतचित्तानां भक्तानां भावरूपेण हृदिस्था भक्तिरनन्तदुर्गमदुःखसागरात् पारं करोति।

परमेश्वरप्राप्त्यर्थं बहुद्रव्यसाध्यं कष्टकरं कर्म, असिधारावद्दुःसाध्यं ज्ञानञ्चापेक्ष्यानन्देन सुखेन प्राप्या अतिसरला सहजा सर्वजनसुलभा भक्तिरेव सर्वोत्कृष्टतम उपायोऽस्ति। ज्ञानप्राप्त्यर्थं साधनचतुष्टयसम्पन्नोऽधिकारी; किन्तु

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भक्तिप्राप्त्यर्थं मनुष्यमात्रमधिकारी। ब्रह्मपदवाच्ये भगवत्यतिशयानुरागयुक्तस्य पुरुषस्य मोक्षो भवति। 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः' (मु.उ. २.२.८) अनया श्रुत्या भगवतो दर्शनमात्रेण सर्वसंशया नश्यन्ति।

भगवद्भक्तेः स्वरूपाभिधाने विद्वद्भिर्लक्षणमुच्यते। यथानन्दभाष्यकारेणोक्तम्—'सा च भक्तिः परमप्रेयो भगवदितरवैतृष्ण्य-पूर्वकपरमपुरुषानुरागरूपो ज्ञानविशेष एव' (आ.भा. १.१.१)। परमप्रेयो भगवदितरवैतृष्ण्यं तु कर्मणान्तःकरणशुद्ध्यैव भवति। ततः परमपुरुषानुरागरूपो ज्ञानविशेष उत्पद्यते। इदं छान्दोग्येऽप्युक्तम्—'ब्रह्मसंस्थोऽमृतत्वमेति' (छा. २)। अत्र संस्था नामातिशयानुरागो भक्तिर्वा। अतो भक्तिशब्दस्यार्थोऽनुरागः।

श्रीवैष्णवमताब्जभास्करे भक्तेर्लक्षणमाह—

सा तैलधारासमनित्यसंस्मृतेः सन्तानरूपेशिपरानुरक्तिः।
भक्तिर्विवेकादिकसप्तजन्या तथा यमाद्यष्टसुबोधकाङ्गा॥
(मुक्तिसाधनप्रकरणे-१३)

अयमाशयः—विवेकादिसाधनेन जन्या यमनियमाद्यष्टाङ्गरूपा ज्ञानरूपा च परानुरक्तिर्भक्तिः। विवेकादिसप्तकञ्च—तल्लब्धिर्विवेके विमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः सम्भवान्निर्वचनाच्च (बोधाय. वृ.) इति वृत्तेर्विवेके विमोकाभ्यासक्रियाकल्याणनवसादानुद्धर्षरूपम्। विवेकः कायशुद्धिः, विमोकः कामानभिष्वङ्गः, आरम्भणसंशीलनं पुनः पुनरभ्यासः। यज्ञाद्यनुष्ठानं क्रिया। सत्यार्जवदयादानहिंसादयः कल्याणानि। शोकादिस्मृतिजन्यदैन्यं मनसोऽवसादस्तदभावोऽनवसादः। अल्पफले तुष्टिरुद्धर्षस्तद्विपर्ययोऽनुद्धर्ष इति बोध्यम्। निर्वचनञ्चात्र 'उपासते पुरुषं ये ह्यकामाः' (मु. ३.२.१), 'शान्त उपासीत' (छा. ३.१.४), 'नायमात्मा बलहीनेन लभ्यः' (मु. ३.१.४), 'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तं येन मामुपयान्ति ते'॥ (गी.१०.१०) 'भक्त्या त्वनन्यया लभ्यः' (गी. ८.२२) इत्यादिश्रुतिस्मृतिशतेभ्यः।

श्रीगङ्गाचार्येण साधनदीपिकायां भक्तिलक्षणमुक्तम्—'भक्तिर्ध्रुवा स्मृतिः, सा च विवेकादिसप्तकात्'। अनेनापि प्रतिपाद्यते यद् ध्रुवानुस्मृतितैलधारासमाखण्डाकाराकारितभगवत्स्मरणमेव विवेकादिसप्तसाधनाज्जन्या भक्तिः।

श्रीपुरुषोत्तमाचार्येणापि बोधायनवृत्तौ भक्तेः स्वरूपमुपासनाशब्देनोक्तम्—'उपासनं स्याद् ध्रुवानुस्मृतिर्दर्शनान्निर्वचनाच्च'। महर्षिशाण्डिल्येन शाण्डिल्यसूत्रे भक्तिलक्षणमुक्तम्—'सा परानुरक्तिरीश्वरे'। (१.१.२)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रीमन्मधुसूदनेनाऽपि श्रीमद्भगवद्भक्तिरसायने भक्तेर्लक्षणं कृतम्—

द्रुतस्य भगवद्धर्माद्धारावाहिकतां गता।
सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते।।३।।

अर्थाद् भगवद्गुणश्रवणेन द्रवावस्थां प्राप्तस्य चित्तस्य धारावाहिकी, तैलधारावदविच्छिन्नरूपा सर्वेशविषया वृत्तिरेव भक्तिशब्देनावगम्यते।

तस्माद् विवेकादिसाधनेन जन्या यमनियमाद्यष्टाङ्गा ज्ञानरूपा च भगवद्गुणश्रवणेन निर्वचनेन च द्रुतचित्तौ धारावाहिकी तैलधारावदविच्छिन्नरूपा ध्रुवानुस्मृतिरूपातिशयानुरागरूपा च परमेश्वरभगवद्विषया या रसरूपा वृत्तिः, सैव भक्तिरित्यभिधीयते। भागवतेऽप्युक्तम्—

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ।। (भा. ३.२९.११)

वस्तुतश्चित्तद्रुत्यैव भक्तिर्जायते, नो चेत् कर्मयोगेनैव निर्विण्णस्य पुरुषस्यालौकिकानन्दमन्तरेण तत्त्वज्ञानमुत्पद्यते। तत्र त्वसिधारावत्पथानुसरणेन भक्तिरूपातिशयालौकिकपरमेश्वराकारितानुरक्त्यानन्दविरहरूपेण, कटुकषायतिक्त-रसास्वादनानन्तरमधुरफलग्रहणसदृशेन कथञ्चित् साध्यो मोक्षः सम्भवति।

यथा भगवद्गुणश्रवणेन चित्तं द्रवावस्थां प्राप्नोति, तथैव स्त्रीपुत्रादिसांसारिकविषयेभ्योऽपि चित्तं द्रुततामापद्यते; किन्तु तेषां संयोगैः शिथिलीभावमात्रं चित्तस्य भवति। पुनर्विषयान्तरसञ्चारादिना पूर्वरूपतामाप्नोति, काठिन्यमाप्नोति वा, भक्तिभावेन चित्तद्रुतिर्नित्या अन्या, विषयोपनिबद्धा त्वनित्यान्येति तात्पर्यम्। यथा श्रीभगवद्भक्तिरसायने श्रीमधुसूदनेनोक्तम्—

कामक्रोधभयस्नेहहर्षशोकदयादयः।
तापकाश्चित्तजतुनस्तच्छान्तौ कठिनं तु तत्।।५।।

किन्तु भगवद्गुणश्रवणेन चित्तस्य पूर्णद्रवीभावो भवति। द्रुतं संस्कृतं शुद्धं चित्तं भगवदाकाराकारितस्वरूपेण परिणमते। सैव संस्कृतचित्तपरिणति-र्वासनाभावनादिशब्देनाप्यवगम्यते। यथा जतुदहनात्मकतापकयोगेन संयुक्तमूषावस्त्वाकारेण परिणमते। तत्र भगवद्गुणश्रवणेन चित्तद्रुतिजन्य-भगवदाकारवृत्तितज्जन्यसंस्कारोऽविनाशी चिरस्थायी भवति। न च सोऽसौ संस्कारो न्यायशास्त्रे प्रसिद्धः। तत्र क्षणत्रितयध्वंसी ज्ञानोत्पन्न आत्मनो नश्वरः संस्काराख्यो गुणोऽस्ति। न च बौद्धशास्त्रप्रसिद्धा वासनारूपा वा। तत्र पूर्वपूर्वविज्ञानेन उत्तरोत्तरविज्ञाने स्वचित्तवृत्तिरूपा वासना सञ्चारिता। अतो वासना

CC-0. Sampurnanand University Collection. Digitized by eGangotri

क्षणस्थायिनी, विज्ञानस्य क्षणस्थायित्वात्। न च मीमांसायां प्रसिद्धा भावना 'भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः'। तत्र भावना क्रिया-रूपाऽस्ति। क्रिया त्वनित्या; किन्तु भगवद्विषयकभावो नित्यत्योऽविनाशी।

अतः सर्वकर्मभ्यो विरतस्य शुद्धचित्तवृत्तिमद्भक्तस्य भगवद्गुणश्रवणेन द्रवितं चित्तं नित्यमुक्तं सकलगुणनिधानसविशेषसगुणातिशयकरुणाब्धि-परमपुरुषोत्तमश्रीभगवदाकारतामाप्नोति। स च नित्यः संस्कारः। भागवतेऽप्युक्तम्—

सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः।। (भा.११.२.४५)

अत्र द्रुते चित्ते व्यक्तः परमानन्दरूपः स्थायिभावशब्देनाप्युच्यते। स च स्थायिभावो विभावेनानुभावव्यभिचारिसंयोगेन रसरूपतामाप्नोति। श्रीभगवद्भक्तिरसायने श्रीमधुसूदनेनोक्तम्—

स्थायिभावगिराऽतोऽसौ वस्त्वाकारोऽभिधीयते।
व्यक्तश्च रसतामेति परानन्दतया पुनः।।९।।

भगवान् परमानन्दस्वरूपः स्वयमेव हि।
मनोगतस्तदाकारो रसतामेति पुष्कलम्।।१०।।

अत्र आलम्बनविभावोऽपि परमानन्द एवास्ति। नन्वेवमालम्बन-विभावस्थायिभावयोरैक्यमुच्यत इति चेत्, न, आलम्बनविभावो भगवद्रूपस्य बिम्बरूपेणावभासते, स्थायिभावो प्रतिबिम्बरूपेणावतिष्ठते। बिम्बप्रतिबिम्बयो-रैक्येऽपि व्यवहारे भेदाङ्गीकारादतो नैक्यम्।

वस्तुतो नित्यस्थायिभाव एव लौकिककान्तादिविषयकानित्य-शृङ्गारादिरसरूपेणापि निष्पद्यते। तत्र त्वल्पक्षणस्थायिकान्तादि-विषयेभ्योऽपुष्टद्रुतचित्ते भगवदानन्दरूपस्थायिभावानित्याल्पक्षणस्थायि-शृङ्गारादिरसा आविर्भवन्ति। भगवदानन्दरूपस्थायिभावस्तत्रापि नित्य एव। न च तत्र भगवदानन्दरूपस्थायिभावो भासते, आवरणविक्षेपरूपमाययावृतत्वात्। अत्राकार्यस्यापि कार्याकारेण भानं विक्षेपः। अखण्डानन्दाकारेण स्वतोऽभानमावरणम्।

ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि।
तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः।।
(भा. २.९.३३)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत: कान्तादिविषयेऽपि रसप्रतीते: सुखस्वरूपचिद्घन एव कारणम्। 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दम्प्रयन्त्यभिसंविशन्ति' (तै. ३.६) इत्यादिश्रुत्या परमानन्दरूपं ब्रह्म जगदुपादानमिति प्रतिपादितत्वात्। उपादानादिभिश्च सर्वं कार्यं मृदभिन्नघटवत् सर्वत्र दृष्टम्। 'सर्वं खल्विदं ब्रह्म' (छा. ३.१५), 'सदेव सोम्येदमग्र आसीत्' (छा. ६.२) इत्यादिश्रुतिभिश्च तथैव प्रतिपादितत्वात्।

भक्त्या मायानिमित्तावरणविक्षेपयोस्तिरोभावे समुदितसात्त्विकवृत्त्या अखण्डानन्दसुखस्वरूपचैतन्यस्य भानं भवति।

भक्तिशास्त्रे विभावानुभावव्यभिचारिभावेन परिपुष्ट: स्थायिभावो रसरूपेणाभिव्यज्यते परिणमते वा। लोके पदार्थानामभिव्यक्तिर्द्विधा भवति। यथा प्रथमा दीपप्रकाशेन घटस्याभिव्यक्तिर्भवति। अत्र दीपपदार्थो घटपदार्थेन भिन्नोऽस्ति। द्वितीया तु दुग्धस्य दधिरूपेणाभिव्यक्तिर्भवति। अत्राभिव्यक्ते: साधनस्य भिन्नत्वे सत्यपि द्वयोरभिन्नत्वं सिद्धमेव। तथैवात्रापि स्थायिभावो हि विभावादिना पुष्टो भूत्वा रसरूपेणाभिव्यज्यते। न च रस: स्थायिभावाद्भिन्नोऽस्ति।

सा च भक्तिर्नवधा—(१) श्रवणम्, (२) कीर्त्तनम्, (३) स्मरणम्, (४) पादसेवनम्, (५) अर्चनम्, (६) वन्दनम्, (७) दास्यम्, (८) सख्यम्, (९) आत्मनिवेदनम्।

श्रीमद्भागवते भक्तेर्भेदनिरूपणावसरे प्रह्लादेनोक्तम्—

श्रवणं कीर्त्तनं विष्णो: स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।
क्रियेत भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्।। (भा. ७.५.२३-२४)

श्रवणभक्तिर्नाम भगवद्दिव्यगुणानां रूपलीलादीनाञ्च सरसपुण्यमय-कथाश्रावणप्रत्यक्षज्ञानं श्रवणम्। श्रवणभक्तिविषये भागवते श्रीशुकदेवेनोक्तम्—

पिबन्ति ये भगवत आत्मन: सतां
कथामृतं श्रवणपुटेषु सम्भृतम्।
पुनन्ति ते विषयविदूषिताशयं
व्रजन्ति तच्चरणसरोरुहान्तिकम्।। (भा. २.२.३७)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कीर्तनभक्तिर्नाम विभिन्नवाद्ययन्त्रैः सह तैर्विना वा पवित्रकीर्त्तिमद्भगवतो यशोगानं कीर्तितं वा। श्रीमद्भागवते उक्तम्—

तदेव रम्यं रुचिरं नवं नवं
तदेव शश्वन्मनसो महोत्सवम्।
तदेव शोकार्णवशोषणं नृणां
यदुत्तमश्लोकयशोऽनुगीयते।। (भा. १२.१२.४९)

भगवन्नामरूपचरित्राणाञ्च सततचिन्तनं स्मरणञ्च भक्तिरुच्यते। भागवते स्मरणभक्तिविषयेऽप्युक्तम्—

यशश्श्रियामेव परिश्रमः परो वर्णाश्रमाचारतपश्श्रुतादिषु।
अविस्मृतिश्श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः।।
अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि शमन्तनोति च।
सत्त्वस्य शुद्धिम्परमात्मभक्तिं ज्ञानञ्च विज्ञानविरागयुक्तम्।।
(भा. १२.१२.५३-५४)

श्रीभगवच्चरणारविन्दयोः प्रेम्णा संवाहनादिभिः सेवा पादसेवनभक्तिरित्युच्यते।

स्मरतः पादकमलमात्मानमपि यच्छति।
किन्त्वर्थकामान् भजतो नात्यभीष्टाज्जगद्गुरुः।।
(भा. १०.८०.११)

तन्नस्समादिशोपायं येन ते चरणाब्जयोः।
स्मृतिर्यथा न विरमेदपि संसरतामिह।। (भा. १०.७५.१५)
यास्सम्पर्यचरन् प्रेम्णा पादसंवाहनादिभिः।
जगद्गुरुं भर्तृबुद्ध्या तासां किं वर्ण्यते तपः।।
(भा. १०.९०.२७)

श्रीमद्भगवतः षोडशोपचारेण पूजनमर्चनभक्तिरुच्यते। अर्चनभक्तिविषये श्रीमद्भागवते उक्तम्—

वैदिकस्तान्त्रिको मिश्र इति मे त्रिविधो मखः।
त्रयाणामीप्सितेनैव विधिना मां समर्चयेत्।। (भा. ११.२७.७)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भगवत: सम्मुखे श्रद्धया नमस्करणं दण्डवत्प्रणमनञ्च वन्दनभक्तिः कथ्यते। यथा—

अहो प्रणामाय कृतस्समुद्यम: प्रपन्नभक्तार्थविधौ समाहित:।
यल्लोकपालैस्त्वदनुग्रहोऽमरैरलब्धपूर्वोपसदेऽसुरेऽर्पित:।।
(भा. ८.२२.२)

श्रीमद्गीतायामप्युक्तम्—

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यन्ते प्रतिजाने प्रियोऽसि मे।। (गी. १८.६५)

मानमोहमदरहितस्य भक्तस्य दासभावेन भगवत: सेवायां निरन्तरनिरतिरेव दास्यभक्तिरुच्यते।

भागवते उक्तम्—

यन्नामश्रुतिमात्रेण पुमान् भवति निर्मल:।
तस्य तीर्थपद: किं वा दासानामवशिष्यते।। (भा. ९.५.१६)

किञ्चित्तमच्युत तवैतदशेषबन्धो
दासेष्वनन्यशरणेषु यदात्मसत्त्वम्।
योऽरोचयत् सह मृगैस्स्वयमीश्वराणां
श्रीमत्किरीटतटपीडितपादपीठ:।। (भा. ११.२९.४)

सख्यभक्तिर्नाम भगवति केवटविभीषणादिसदृशो देहस्त्रीपुत्र-धनराज्यादधिक: स्नेहविशेष:।

एतद्विषये भागवते उक्तम्—

अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम्।
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम्।। (भा. १०.१४.२३)

आत्मनिवेदनभक्तिर्नाम भगवति वैराग्यमद्भक्तस्य सर्वकर्म परित्यज्य स्वात्मार्पणम्। यथा भागवते उक्तम्—

मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे।
तदाऽमृतत्वं प्रतिपद्यमानो मयाऽऽत्मभूयाय च कल्पते च।। इति।
(भा. ११.२९.३४)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

बौद्धधम्मे तिसिक्खाय महच्चं

प्रो. ब्रह्मदेवनारायणशर्मा
आचार्योऽध्यक्षचरश्च
पालि एवं थेरवादविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणस्याम्

***

बौद्धधम्मे तिसिक्खाय अच्चन्तमहन्तभावं दिस्सति। तिसिक्खा ति अधिसीलसिक्खा, अधिचित्तसिक्खा, अधिपञ्ञासिक्खा। सील-समाधिपञ्ञापटिमण्डितो सद्धम्मो जनानं हितकरो च सुखकरो च होति। सीलं किरेव कल्याणं सीलं लोके अनुत्तरं ति कथितं। सीलं सब्बबुद्धानं महन्तं तित्थं वट्टति। योगसाधकानं पुग्गलानं सीलं अलंकरणं, अतिपभस्सरं मण्डनं च विज्जति[१]। सीलसमलङ्कतो संविभूसितो च योगावचरो अब्भामुत्तो चन्दो व लोके पभासेति[२]। जीवनकान्तारे सीलं दीपथम्भो विय दिस्सति। सब्बदासीलसम्पन्नो आरद्धवीरियो पञ्ञवा नरो इमस्मिं लोके परम्हि च जयं पत्त्वा अतिविय विरोचमानं सोमनस्ससहगतं सुखानुभवनं करोति[३]।

सीलं ति अतिसेट्ठं सम्माचरणं सुभाचरणं, सदाचरणं च विज्जति। सदाचरणं विना जीवनस्स विकासो न सम्भवति। सीलसंवलितो पुग्गलो साधनामग्गे आगतानं पच्चूहानं नीवरणानां निराकरणं कत्वा अनातुरो हुत्वा निवसति। यस्स सीलं आविलं परिभट्ठं च तस्स जीवनं गहनघनान्धकारे निमज्जति। पाणिनं तु सीलं धरणीव पतिट्ठा विज्जति। सीले ठत्वा आतापी सद्धासंवलितो योगावचरो समाधिनिन्नो होति। कायेन वाचाय मनसा यो

---

१. सोभन्तेवं न राजानो, मुत्तामणिविभूसिता।
यथा सोभन्ति यतिनो सीलभूसनभूसिता।। (वि.म., भा. १, पृ. ३८)

२. सीलसम्पत्तिया भिक्खु सोभमानो तपोवने।
पभासम्पत्तिया चन्दो गगने वि य सोभति।। (वि.म., भा. १, पृ. १४०)

३. सब्बदासीलसम्पन्नो पञ्ञवा सुसमाहितो।
आरद्धवीरियो पंहितत्तो ओघं तरति दुत्तरं ति।। (सं.नि., पृ. ३२)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पुग्गलो सीलानुपालनं समाहितचित्तेन करोति सो भवपपञ्चं अतिक्कमित्वा साधनामग्गे अग्गसरो हुत्वा अमोसधम्मं अच्चन्तपरिसुद्धं निब्बानं अधिगच्छति। तत्थ किं सीलं ति? पाणातिपातादीहि वा विरमन्तस्स वत्तपटिपत्तिं वा पूरेन्तस्स चेतनादयो धम्मा सीलं। अपि च चेतनासीलं, चेतसिकं सीलं, संवरो सीलं, अवीतिक्कमो सीलं'ति पटिसम्भि. दामग्गे विवेचितं वत्तति। अहिंसा चागो, ब्रह्मचरियं इमे तयो कायकम्मचेतना तथा सच्चं, अपिसुणं, अफरुसा वाचा, सम्फप्पलापा ति इमे चत्तारो वचीकम्मपथा 'चेतनासीलं' ति वुच्चति। तेहेव कारणेन वुत्तं चेतनासीलं नाम पाणातिपातादीनि पजहन्तस्स सत्तकम्मपथचेतना' ति। चेतसिकं सीलं ति पाणातिपातादीहि विरमन्तस्स विरति। संवरो ति संवरणं। यथा अकुसलाधम्मा चित्तं न ओतरन्ति तथा पिदहनं। सो संवरो पातिमोक्खसंवरो, सतिसंवरो, ञाणसंवरो, खन्तिसंवरो, वीरियसंवरो ति पञ्चविधो। तत्थ इमिना पातिमोक्खसंवरेण उपेतो होति समुपेतो ति अयं पातिमोक्खसंवरो ति। अथ च चारित्तवारित्तवसेन विनयपरियापन्नं सिक्खापदसीलं। रक्खति चक्खुरिन्द्रियं, चक्खुरिन्द्रिये संवरं आपज्जति अयं सतिसंवरो। इन्द्रियानं पटि सावधानता ति अत्थो। ञाणसंवरो ति पञ्ञा। चतुपच्चयपटिसेवनं पटि ञाणसंवलितभावो वा। खन्तिसंवरो ति' खमो होति सीतस्स उण्हहस्सा' ति खमनसीलभावो। 'खन्ति परमं तपो तितिक्खा' ति वचनतो खमनसीलता ति। वीरियसंवरो ति कामवितक्कादीनं विनोदनवसेन पवत्तं वीरियं। अवीतिक्कमो सीलं ति समादिन्न सीलस्स कायवाचसिको अनतिक्कमो। इति अयं पञ्चविधो पि संवरो संवरसीलं ति वेदितव्वं। एवं सीलेन कायदुच्चरितस्स च वचीदुच्चरितस्स च पहानं भवति। समाधिना मनोदुच्चरितं विनस्सति। पञ्ञाय धम्मसभावस्स विजाननं भवति। तेन तण्हा विनस्सति। ततो परं निब्बानस्स सच्छिकिरिया होति। तस्मा भगवता बुद्धेन कथितं—

"सीले पतिट्ठाय नरो सपञ्ञो, चित्तं पञ्ञं च भावयं।
आतापी निपको भिक्खु, सो इमं विजटये जटं" ति।।

एत्थ पन सीलं सोगतसासनस्स आदि-चरणं होति। सीलं सब्बेसं कुसलानं धम्मानं आधारो। सीले पतिट्ठिता सब्बे कुसला धम्मा न परिहायन्ति। यथा गंगा यमुना सरयू नदी मनुस्सानं परिलाहं उपसमेन्ति, एवं रागग्गिना, दोसग्गिना, मोहग्गिना च जायमानस्स पुरिसस्स अज्झत्तिको परिलाहो सीलेन विनस्सति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सीलस्स अनेके भेदा पिटकेसु दिस्सति, यथा-पञ्चसीलं, अट्ठसीलं, दससीलं ति। तेसु पञ्चसीलं ति पञ्चविधा विरति। यथा—पाणातिपाता वेरमणी, अदिन्नादाना वेरमणी, कामेसु मिच्छाचारा वेरमणी, मुसावादा वेरमणी, सुरामेरयमज्जप्पमादट्ठाना विरति च। अट्ठसीलं ति पुब्बकथितं पञ्चसीलं तथा विकालभोजना विरति, नच्चगीतवादितविसूकदस्सना विरति, मालागन्धविलेपनधारणमण्डनविभूसनट्ठाना विरति च। दससीलं ति पुब्बकथितं अट्ठसीलं तथा उच्चासयनमहासयना विरति, जातरूपरजतपटिग्गहणा विरति च। विसुद्धिमग्गे सीलस्स वित्थारकथा दिस्सति। परञ्च तेसं वित्थारवण्णना इमस्मिं लघुनिबन्धे अयुत्तं ति। यतो हि तिसिक्खाय विवेचनं इट्ठं तस्मा तिसिक्खाय दुतियचरणं समाधी ति। तस्मा इदानि समाधि आरब्भ किञ्चि विवरणं एव युत्तं ति।

समाधी ति कुसलचित्तेकग्गता। सीलेन युत्तो मनुस्सो कायवची दुच्चरितं पहाय कायसोचेय्यं वचीसोचेय्यं लभति। सीलं सब्बेसं कुसलानं धम्मानं आधारो होति। सीले पतिट्ठितो योगावचरो समाधिं भावेति। समाधिना मनोदुच्चरितस्स पहानं होति। किमिदं दुच्चरितं नाम? चित्तस्स यत्थ तत्थ धावनं, अनेकेसु आलम्बनेसु तण्हानं उप्पादो च। चित्तं अविज्जाय परिवारितं हुत्वा फन्दनं, चपलं, दुरक्खं दुन्निवारयं भवति। एवं फदनं चपलं चित्तस्स एकग्गतं पटिलाभाय समाधिभावनाय पयोजनं दिस्सति।

विसुद्धिमग्गे समाधानट्ठेन समाधि वुत्तं। किमिदं समाधानं ति? एकारम्मणे चित्तचेतसिकानं समं सम्मा च आधानं, ठपनं ति वुत्तं होति। तस्मा यस्स धम्मस्स आनुभावेन एकारम्मणे चित्तचेतसिका समं सम्मा च अविक्खिपमाना अविप्पकिण्णा च हुत्वा तिट्ठन्ति, इदं समाधानं नाम। अपि च अविक्खेपलक्खणो समाधि, विक्खेपविद्धंसनरसो, अविकम्पनपच्चुपट्ठानो ति वुत्तं। 'सुखिनो चित्तं समाधियती' ति वचनतो पन सुखमस्स पदट्ठानं ति वुत्तं। समाधि बहुविधो नानप्पकारको। अविक्खेपलक्खणेन ताव एकविधो। उपचारअप्पनावसेन दुविधो, तथा लोकियलोकुत्तरवसेन, सप्पीतिकनिप्पीतिक-वसेन' ति आदि।

नीवरणेहि उस्साहितं चित्तं एकग्गतं न लभति। नीवरणं ताव पञ्चविधं-कामच्छन्दो, व्यापादो, थीनमिद्धं, उद्धच्चकुक्कुच्चं, विचिकिच्छं चेति। कामच्छन्दो ति पञ्चकामगुणिकरागो। व्यापादो ति परविनासचिन्ता, दोसो, पटिघो। थीनमिद्धं ति चित्तस्स अकल्लता पमादस्स अधिवचनं। उद्धच्चकुक्कुच्चं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ति चित्तस्स भन्तता उद्धच्चं, कतानुकतानुसोचनस्स भावो कुक्कुच्चं। विचिकिच्छा ति संसयो अनेकंसग्गाहो ति। इमानि पञ्च नीवरणानि होन्ति। यानि चित्तं निवरन्ति परियोनन्धन्ति, समाधि पटिलभितुं न देन्ति। तस्मा समाधि- पटिलाभाय नीवरणस्स पहानं आवस्सकं विज्जति। पञ्च झानङ्गानि होन्ति—वितक्को, विचारो, पीति, सुखं, एकग्गता च। वितक्को ति आलम्बने चित्तस्स अभिनिरोपनं। वितक्कं पत्वां चित्तं आलम्बनस्स अभिमुखो भवति। विचारो ति आलम्बने चित्तस्स अनुमज्जनं, विचारं पत्त्वा चित्तं आलम्बने ठितं भवति। पीती ति पीणनं। सुखं ति सोमनस्सं, चेतसिकसुखस्स अधिवचनं। एकग्गता ति चित्तस्स एकोदिभावो। यदा इमानि पञ्चझानङ्गानि उदितानि होन्ति, तदा नीवरणानि पहीयन्ति। एवं पञ्च नीवरणे पहीने पञ्चझानङ्गे उप्पन्ने चित्तं समाधियति।

अविक्खेपलक्खणेन समाधि एकविधं ति पुब्बे वुत्तं। रूपसमाधि, अरूपसमाधिवसेन दुविधो ति। रूपं ति रूपालम्बनं। यं आलम्बनं वण्ण- आकारसम्पन्नं तं रूपालम्बनं। तस्मिं चित्तस्स ठिति रूपसमाधि। तत्थ पञ्चझानानि अनुक्कमेन उप्पज्जन्ति; पठमज्झानं, दुतियं झानं, ततियं झानं, चतुत्थज्झानं, पञ्चमं झानं च। पठमज्झाने पञ्च झानङ्गानि विज्जन्ति, यथा— वितक्कविचारपीतिसुखेकग्गतासहितं पठमज्झानं। विचार-पीति- सुखेकग्गतासहितं दुतियं झानं एत्थ वितक्को न होति। ततिये झाने वितक्को च विचारो च न विज्जन्ति। केवलं हि तीणि झानङ्गानि होन्ति, तस्मा पीतिसुखेकग्गतासहितं ततियज्झानं भवति। चतुत्थज्झाने वितक्को च विचारो च पीति च न विज्जन्ति, तस्मा सुखेकग्गतासहितं चतुत्थज्झानं भवति। पञ्चमज्झाने सुखस्स ठाने उपेक्खा आगच्छति तस्मा उपेक्खेकग्गतासहितं पञ्चमज्झानं भवति। इमिना पञ्चमज्झानेहि सह या चित्तस्स एकग्गता तस्सेव नाम रूपसमाधि।

अरूपसमाधि—अरूपं ति अरूपालम्बनं। यस्स आलम्बनस्स न वण्णो होति न आकारो, सो अरूपालम्बनं ति वुच्चति। तस्मिं अरूपालम्बने चित्तस्सेकग्गता अरूपसमाधी ति। योगावचरो रूपसमाधि भावेत्वा पस्सति यं तस्स चित्तं परिसुद्धं, किलेसरहितं, मुदुभूतं, अनङ्गणं, कम्मनीयं ठितं होति, तेन सो अरूपसमाधिं भावितुं वायमति। अरूपसमाधि चतुव्विधो आलम्बनप्पभेदेन झानप्पभेदेन वा। आकासानञ्चायतनं, विञ्ञाणञ्चायतनं, आकिञ्चञ्ञायतनं, नेवसञ्ञानासञ्ञायतनं ति। विसुद्धिमग्गे अरूपज्झानं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वण्णयन्तो कथितं—'सब्बसो रूपसञ्ञानं समतिक्कमा पटिघसञ्ञानं अत्थङ्गमा नानत्तसञ्ञानं अमनसिकारा 'अनन्तो आकासो' ति आकासानञ्चायतनं उपसम्पज्ज विहरति। पुन सब्बसो आकासानञ्चायतनं समतिक्कम्म अनन्तं विञ्ञाणं ति विञ्ञाणञ्चायतनं उपसम्पज्ज विहरती ति। पुन सब्बसो विञ्ञाणञ्चायतनं समतिक्कम्म नत्थि किञ्ची ति आकिञ्चञ्ञायतनं उपसम्पज्ज विहरती' ति। पुन सब्बसो आकिञ्चञ्ञायतनं समतिक्कम्म नेवसञ्ञाना-सञ्ञायतनं उपसम्पज्ज विहरती ति। इदं होति अरूपावचरं चतुत्थं झानं। इदं झानं लभित्वा योगावचरस्स चित्तं अतिविय सुखुमं, मुदुभूतं, कम्मनीयं, ठितं आनेञ्जपत्तं भवति। तेन चित्तेन सो पञ्ञा-भावना कातुं पटिबलो भवति। इदमेव चतुत्थझानस्स आनिसंसं ति।

तिसिक्खाय ततियं चरणं पञ्ञा होति। पञ्ञाय अविज्जन्धकारस्स विद्धंसनं विज्जालोकस्स पाकटिकरणं होति। पञ्ञालोके योगावचरो सम्मा पजानाति यं 'सब्बे सङ्खारा अनिच्चा, सब्बे सङ्खारा दुक्खा, सब्बे धम्मा अनत्ता' ति। पञ्ञाय योगावचरो तण्हं विनोदेति, वीततण्हो हुत्वा निब्बानं सच्छिकरोति।

पञ्ञासद्दस्स विवेचनं करोन्तो पिटकानुपिटकगन्थेसु कथितं—पजाननं, विसेसप्पकारेन जाननं, सम्मादिट्ठी ति। पजानाति पजानाती ति पञ्ञा। विसुद्धिमग्गे कथितं—यं 'कुसलचितसम्पयुत्तं विपस्सनाञाणं पञ्ञा'। केनट्ठेन पञ्ञा ति? पजाननट्ठेन पञ्ञा। किमिदं पजाननं ति? सञ्जाननविजाननाकारविसिट्ठं नानप्पकारतो जाननं। धम्मसभावपटिवेधलक्खणा पञ्ञा। सभावतो पन सा धम्मे पविसित्वा तस्स सरूपं सम्माकारेण जानाति। किच्चतो पन अविज्जन्धकारं विनासेति, विज्जोभासं जनेति। मिलिन्दपञ्हे कथितं—'छेदनलक्खणा महाराजपञ्ञा, ओभासनलक्खणा चा' ति। अनेन पाकटं भवति यं योगावचरो मनसिकारेन किलेसं गहेत्वा पञ्ञाय तस्स छेदनं करोति। यदा किलेसानं विद्धंसनं भवति तदा चित्तं परमपरिसुद्धरूपेन तिट्ठति। तदा तं चित्तं सब्बमलविरहितं अच्चन्तपरिसुद्धरूपं अधिगच्छति। तेहेव कारणेन विसुद्धिमग्गे आचरियेन बुद्धघोसेन कथितं—'धम्मसभावपटिवेधलक्खणा पञ्ञा, धम्मानं सभावपटिच्छादकमोहन्धकारविद्धंसनरसा, असम्मोहपच्चुपट्ठाना। 'समाहितो यथाभूतं जानाति पस्सती' ति वचनतो पन समाधि तस्सा पदट्ठानं' ति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विसुद्धिमग्गे पञ्ञाय अनेकप्पभेदा दिस्सन्ति। तत्थ एकविधेन पञ्ञा ति धम्मसभावपटिवेधलक्खणा, दुब्बिधेन पञ्ञा ति लोकिया पञ्ञा लोकुत्तरा पञ्ञा, सासवा पञ्ञा, अनासवा पञ्ञा ति। तिविधेन पञ्ञा ति चिन्तामया पञ्ञा, सुतमया पञ्ञा, भावनामया पञ्ञा च। तत्थ परतो असुत्वा अत्तनो चिन्तावसेन निप्फन्ना पञ्ञा चिन्तामया पञ्ञा। परतो सुत्वा पटिलद्धपञ्ञा सुतमया पञ्ञा। या पञ्ञा भावनावसेन उप्पज्जति, सा भावनामया पञ्ञा ति। चतुब्बिधेन पञ्ञा ति दुक्खे ञाणं, दुक्खसमुदये ञाणं, दुक्खनिरोधे ञाणं, दुक्खनिरोधगामिनिया पटिपदाय ञाणं ति। अपि च चतुपटिसम्भिदासु ञाणं चतुव्विधा पञ्ञा। ते च होन्ति—अत्थपटिसम्भिदा, धम्मपटिसम्भिदा, निरुत्तिपटिसम्भिदा, पटिभानपटिसम्भिदा ति।

इमिना नयेन बौद्धधम्मे तिसिक्खाय वित्थारवण्णना दिस्सति। अरिय अट्ठङ्गिकमग्गेसु सम्मादिट्ठि, सम्मासंकप्पो पञ्ञा ति कथितं। सम्मावाचा, सम्माकम्मन्तो, सम्माजीवो ति सीलं। तथा सम्मावायामो, सम्मसति, सम्मासमाधी ति समाधि। एवं सीलसमाधिपञ्ञासंवलितो तिसिक्खा जनानं अत्थाय हिताय च पटिभाति। अतो तिसिक्खाय महच्चभावं ञायेन्तो कथितं—

सीलं समाधि पञ्ञा च विमुत्ति च अनुत्तरा।
अनुबुद्धा इमे धम्मा गोतमेन यसस्सिना ति।।

अपि च—

सब्बपापस्स अकरणं कुसलस्सुपसम्पदा।
सचित्तपरियोदपनं एतं बुद्धानसासनं ति।।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लघु-ग्रन्थमाला

[६९]

श्रीकाशीनाथभट्टविरचितः

वैदिकतान्त्रिकाधिकारनिर्णयः

सम्पादकः

डॉ. शीतलाप्रसाद-उपाध्यायः

उपाचार्यः, सांख्ययोगतन्त्रागमविभागस्य

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये

वाराणसी

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

वाराणसी

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रास्ताविकम्

विदितमेव सर्वेषां यदस्माकं संस्कृतिः श्रुतिमूलिका। तासु श्रुतिषु गुरुमुखाच्छिष्येण श्रवणमूलकमुपलभ्यमानतया यथा वेदानां श्रुतिरिति व्यवहारस्तथा तन्त्राणामपि। हारीतधर्मशास्त्रे 'अथातो धर्मं व्याख्यास्यामः। श्रुतिप्रमाणको धर्मः। श्रुतिश्च द्विविधा—वैदिकी तान्त्रिकी च'। इति तन्त्राणामपि श्रुतिरिति व्यवहारो दृश्यते। मनुस्मृतौ (२.१) व्याख्यानावसरे कुल्लूकभट्टोऽपि—**'वैदिकी तान्त्रिकी चैव द्विविधा कीर्तिता श्रुतिः'** इति श्रुतीनां द्वैविध्यं वेदास्तन्त्राणि चेत्यभ्युपैति। एवं प्रकारेण सिद्ध्यति यद् वैदिकीश्रुतिस्तान्त्रिकीश्रुतिश्चेति भेदेन द्विविधा श्रुतिरनादिकालादेव प्रचलति भरतखण्डेऽस्मिन्।

अनयोः श्रुत्योः सामरस्याद् वैदिकतान्त्रिकी तान्त्रिकवैदिकी च श्रुती प्रचलिते। तदनुसारम् अद्योपलब्धानां समग्राणां संस्कृतवाङ्मयानां विभाजनमेवं क्रियते—शुद्धवैदिकं तान्त्रिकवैदिकं शुद्धतान्त्रिकं वैदिकतान्त्रिकञ्चेति। परमात्मना शिवेन आत्मतत्त्वज्ञार्थं स्वस्वकर्मानुसारं चत्वारो मार्गाधिकारिण एवमेव प्रोक्ताः। शुद्धवैदिक-शुद्धतान्त्रिकयोर्मध्ये लेशमात्रमपि सम्बन्धो न वर्तते। तान्त्रिकवैदिकमार्गे तु वेदस्योपरि तन्त्रोपसर्जनम्। एवं प्रकारेण वैदिकतान्त्रिकमार्गे तन्त्रोपरि वेदोपसर्जनं विद्यते। तच्च वेदाङ्गागम इति प्रोक्तम्। शुद्धवैदिकशास्त्रेषु व्यासकृतसूतसंहिता पाणिनीयशास्त्रं जैमिनीयशास्त्रं वैयासिकब्रह्मसूत्रं भगवत्पादकृत-तद्भाष्यम्, शुद्धतान्त्रिकशास्त्रेषु पाशुपतादिशास्त्रम्, तान्त्रिकवैदिकशास्त्रेषु शिवराघवसंवादरूपवायवीयसंहिता अक्षपादीयशास्त्रं काणादशास्त्रं कापिलशास्त्रं पातञ्जलशास्त्रम्, वैदिकतान्त्रिकशास्त्रेषु पाञ्चरात्रशास्त्रं भागवतशास्त्रं शैवसिद्धान्तशास्त्रञ्चेति गण्यन्ते। एतेषां साहित्यानां विवरणमस्मिन् लघुतमग्रन्थे संक्षेपेण दृश्यते।

एतस्य ग्रन्थस्य कर्त्तारः श्रीदक्षिणामूर्तिसम्प्रदायस्य शिष्या विविधग्रन्थ-प्रणेतारः काशीस्थाः काशीनाथभट्टा आसन्। एतेषां पितुर्नाम जयरामभट्ट इति, पितामहः शिवरामभट्टः, गुरुश्च अनन्त इत्येतेषां ग्रन्थानां पुष्पिकावाक्येषु स्थितेन वचनेन परिज्ञायते। अस्य कुलञ्च दाक्षिणात्यानां प्रसिद्धं भट्टकुलमित्यपि निश्चितम्। सर्वेषु शास्त्रेष्वस्य पाण्डित्यं तु निर्विवादं, विशेषरूपेण समयाचार-तन्त्रशास्त्रेषु वेदान्तादिशास्त्रेषु पुराणेषु च।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अयं काशीनाथो दक्षिणाचारपद्धत्या दक्षिणामूर्तिशिवोपासकः प्रतीयते। वामाचारपद्धतिस्तेन निराकृता विभिन्नग्रन्थेषु प्रकृतलघुग्रन्थेऽपि। अस्य दीक्षानाम शिवानन्द इत्यपि यत्र तत्र सूच्यते। अस्योपाधिः 'भडः भट्टः भट्टभट्ट' इति परिज्ञायते। मन्त्रसारसमुच्चये[१] तट्टीकायाञ्च[२] पुष्पिकावाक्यैर्वैद्यनाथनामाऽपि कश्चिदस्य गुरुरासीदिति सूच्यते। स स्पष्टमेव वक्ति तत्रैव—

वैद्यनाथप्रसादेन मन्त्रसारसमुच्चयः।
नाम्ना पुत्रः सतां वन्द्यो मम वक्त्राद्विनिर्गतः।। इति।

अस्योपलब्धकृतिषु पुष्पिकावाक्येषु भडोपनामकः काशीनाथः, जयरामात्मजः, वाराणसीगर्भसम्भवः, दक्षिणाचारानुसारी, दक्षिणाचारमत-प्रवर्तकः, मन्त्रशास्त्रप्रवीणः, शिवभक्तः, परमशिवभक्तः, शिवभक्तसूनुः, शिवाराधकः, तन्त्रशास्त्रधुरीणः, श्रुति-स्मृतिमतप्रमाणपारावारीणः, सर्वतन्त्र-दक्षिणाचारतन्त्रधुरीण इत्यादिविशेषणैः सभाजितः। तस्य लब्धदीक्षशिष्यो दीनानाथो दक्षिणामूर्तिशेखरटीकाकर्तेति।

तस्य पिता जयरामभट्टोऽपि श्रुतिस्मृतिप्रमाणपारावारीणः, सर्वतन्त्र-स्वतन्त्रः, दक्षिणाचारतन्त्रधुरीणः, भट्टोपाख्यः, दक्षिणामूर्तिचरणारविन्दमिलिन्दः, शिवरामभट्टाङ्गज इत्यादिविशेषणैः सभाजितः। सूचनेयं प्राय उपलब्धासु सर्वासु मातृकासु स्थापिता। तारापूजनरसायनमिति[३] ग्रन्थस्थेन वचनेन जयरामोऽयं काशीनाथस्य गुरुरपीति ज्ञायते, यथा—**'नानातन्त्राणि विज्ञाय जयरामपितुर्मुखात्'।**

तस्य पितामहः शिवरामभट्ट इत्यपि केषुचित् पुष्पिकावाक्येषु स्मर्यते। सोऽपि मन्त्रशास्त्रप्रवीणो दक्षिणाचारमतप्रवर्तकश्च। अस्य विषये नातोऽधिकं विवरणं समुपलभ्यते।

बहुषु पुष्पिकावाक्येषु **'अनन्ताख्यं गुरुं नौमि'** इत्येवं स्थितेन वचनेनेदं ज्ञायते यत्काशीनाथस्य गुरोर्नाम 'अनन्त' इति। 'कवित्वप्रभाकरः', 'शास्त्रवल्ली-जलधर' इति च विशेषणद्वयेन सभाज्यते स एव। अस्मिल्लघुग्रन्थेऽपि पञ्चमे पृष्ठे 'अनन्तभट्टः' उद्धृतः। अत्र सोऽयमनन्तः काशीनाथस्य मातामह इति प्रदर्शितः। 'मन्त्रसारसमुच्चयटीका'[४] इत्याख्यग्रन्थस्य मातृकायां काशीनाथस्य गुरुर्वैद्यनाथो मन्त्रसारसमुच्चयकर्ता

१. सरस्वतीभवनपुस्तकालयस्थ-मातृकायाम्, सं. ६२१३८।

२. तत्रैव, सं. २६४२६।

३. रायल एशियाटिक सोसायिटी ऑफ बंगाल, कलिकाता—सं. VIII.A. ६३३०।

४. सरस्वतीभवनस्थमातृकायाम्, सं. ६२१४०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'गुरुं श्रीमत्पंचभाई इत्युपनामकानन्त-भट्टाख्यम्' इत्येवमनन्ताख्यं गुरुं स्मरति पुष्पिकावाक्येन। अनन्तभट्ट इति तस्य पुत्रस्य नाम इत्यपि तत्रैव सूचितम्।

दक्षिणामूर्तिशिवस्योपासकः काशीनाथभट्टो वाराणसीवास्तव्य इति तु निश्चप्रचम्। यद्यप्यनेन मङ्गलपद्येषु प्रायः पञ्चाशदधिका देवताः स्तूयन्ते, तथापि दक्षिणामूर्तिशिवस्यैव प्राधान्यं सर्वत्र वर्तते। न केवलं शिवस्य अपि तु नानारूपाणां शक्तीनामपि समुपासकोऽयम्। तेन ताः समर्च्यन्ते दक्षिणाचारपद्धत्यैव, न तु वामाचारपद्धत्या। दक्षिणाचारप्रवर्तकोऽयं काशीनाथस्तत्समर्थकान् वामाचारखण्डनपराँश्च अनेकान् ग्रन्थान् रचयति स्म। अस्य स्थितिकालोऽष्टादश-ऊनविंशख्रिस्तशताब्दयोर्मध्ये निर्धारयितुं शक्यते।

काशीनाथकृतग्रन्थानां परिचयोऽक्षरानुक्रमेणात्र दीयते। सर्वेषां ग्रन्थानां पौर्वापर्यं साम्प्रतं निर्धारयितुं न शक्यते। अत्र मया सप्तनवतिमितानामस्य ग्रन्थानां नामावली प्रस्तुता। एतदतिरिक्तमन्यग्रन्था अपि भवितुमर्हन्ति विभिन्नेषु पुस्तकालयेषु। तेषां नामानि च—१. अवतारभेदप्रकाशिका, २. अष्टादशपुराणव्यवस्था[1], ३. आगमोत्पत्त्यादिवैदिकतान्त्रिकनिर्णयः, ४. आपस्तम्बाह्निकम्, ५. आम्नायः, ६. आम्नायप्रकाशः, ७. आश्वलायनाह्निकः, आह्निकः, आह्निकचन्द्रिका, ऋग्वेदाह्निकचन्द्रिका वा, ८. कर्पूरस्तवदीपिका, ९. कविचन्द्रोदयटीका १०. कापालिकमतव्यवस्था, ११. कामेशार्चनचन्द्रिका, १२. कालनिर्णयदीपिका, १३. कालीभक्तिरसायनम्, १४. कृष्णपूजातरङ्गिणी, १५. कौमारसंहिताटीका, १६. कौलगजमर्दनम्, १७. गङ्गाभक्तिरसायनम्, १८. गणेशार्चनदीपिका, १९. गायत्रीपुरश्चरणचन्द्रिका, २०. गायत्र्यर्चनदीपिका, २१. गुरुपूजाक्रमः, २२. गूढमन्त्रार्थकौमुदी, २३. ग्रहमन्त्रप्रदीपिका, २४. चक्रसङ्केतचन्द्रिका, २५. चण्डिकार्चनदीपिका, २६. चण्डीमाहात्म्यटीका (चण्डीपाठटीका) चण्डीपूजारसायनं वा, २७. ज्ञानार्णवतन्त्रटीका, २८. तन्त्रभूषा, २९. तन्त्रसारटीका, ३०. तन्त्रसिद्धान्तकौमुदी, ३१. तन्त्रहृदयम्, ३२. तन्त्राग्निमुखप्रयोगः, ३३. तारापूजारसायनम्, ३४. तिथिनिर्णयदीपिका तिथिदीपिका वा, ३५. त्रयोदशश्लोकी, ३६. त्रिकूटारहस्यटीका, ३७. त्रिपुरसुन्दर्यर्चनक्रमः, ३८, त्रिस्थलीसेतुः, ३९. दक्षिणाचारतन्त्रराजटीका, ४०. दक्षिणाचारतन्त्रटीका, ४१. दक्षिणाचारदीपिका, ४२. दक्षिणामूर्तिकल्पः, ४३. दक्षिणामूर्तिकौस्तुभः, ४४. दक्षिणामूर्तिचन्द्रिका, ४५. दक्षिणामूर्तिदीपिका, ४६. दक्षिणामूर्तिशेखरटीका, ४७. दुर्जनमुखचपेटिका[2], ४८. नामपारायणप्रकारः,

---

१. सारस्वतीसुषमायां १३ वर्षे १-४ अङ्केषु मुद्रिता।

२. फ्रेंचभाषायामनूदितं बर्नफमहोदयेन, Preface, Le Bhāgavata Purāṇa P.LXXXV.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

४९. पक्षप्रदोषार्चनचन्द्रिका, ५०. पार्थिवार्चनदीपिका, ५१. पुरश्चरणदीपिका[१], ५२. पूजाक्रमः, ५३. प्रपञ्चसारटीका, ५४. प्रायश्चित्तव्यस्थासारसंग्रहः, ५५. बटुकभैरवार्चनदीपिका बटुकार्चनदीपिका वा, ५६. ब्रह्माद्वैतप्रकाशिका, ५७. मन्त्रचन्द्रिका, ५८. मन्त्रमहोदधिटीका, ५९. मन्त्रराजसमुच्चयः, ६०. मन्त्रसारसमुच्चयः, ६१. मन्त्रसारसमुच्चयटीका, ६२. मन्त्रसिद्धान्तमञ्जरी, ६३. मन्त्रोद्धारदीपिका, ६४. महिम्नस्तोत्रटीका, ६५. यन्त्रचन्द्रिका, ६६. योगसिद्धान्तमञ्जरी, ६७. रहस्यत्रयव्याख्या, ६८. रामपूजातरङ्गिणी, ६९. ललितातिलकं सटीकम्, ललितार्चनकौमुदी, ७०. ललितासहस्रनामटीका, ७१. वामाचारमतखण्डनम्, ७२. विप्रानन्दतरङ्गिणी[२], ७३. विरजादीक्षा, ७४. वैदिकतान्त्रिकाधिकारिनिर्णयः, ७५. शक्तिपूजातरङ्गिणी, ७६. शरभतन्त्रटीका शरभेश्वरतन्त्रव्याख्या वा, ७७. शाक्तानन्दतरङ्गिणी, ७८. शाम्भवाचारकौमुदी, ७९. शारदातिलकटीका, ८०. शास्त्रव्यवस्था, ८१. शिवपूजातरङ्गिणी, ८२. शिवभक्तिरसायनम्, ८३. शिवभक्तिसुधार्णवः, ८४. शिवमुक्तिप्रबोधिनी, ८५. शिवसिद्धान्तमञ्जरी, ८६. शिवाद्वैतप्रकाशिका, ८७. शिवार्चापद्धतिः, ८८. शिवाष्टाक्षरपद्धतिः, ८९. शैवसिद्धान्तमञ्जरी, ९०. शैवसिद्धान्तमण्डनम्, ९१. श्यामाभक्तिसुधार्णवः, ९२. श्राद्धनिर्णयदीपिका, ९३. श्रीविद्यान्यासदीपिका, ९४. श्रीविद्यामन्त्रदीपिका, ९५. श्रुत्युक्ताचारकौमुदी, ९६. षोडशावरणम्, ९७. संक्षेपाह्निकचन्द्रिका इत्यादयः।

अस्य लघुतमग्रन्थस्य सम्पादनं सरस्वतीभवनस्थायाः ८५५९७ संख्यकाया मातृकाया आधारेण कृतम्। एषा च मातृका कर्गजाधारा। अस्यां मातृकायां १-३ पत्राणि सन्ति। अस्या आकारः ८.७×२.९ परिमितः। प्रतिपृष्ठं १२ पङ्क्तयः, प्रतिपङ्क्तिः ४४ अक्षराणि सन्ति। लिपिकालस्तत्र न दृश्यते।

विद्वज्जनानुचरः

वाराणस्याम्
वैशाखपूर्णिमायाम्,
२०६३ तमे वैक्रमाब्दे

शीतलाप्रसाद उपाध्यायः
उपाचार्यः, सांख्ययोगतन्त्रागमविभागस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये

१. प्रकाशितोऽयं ग्रन्थः वाराणसीतः, १८७३ ई.।

२. प्रकाशितोऽयं ग्रन्थः सरस्वतीभवन-स्टडीज-ग्रन्थमालायाम्, सप्तमभागः, पृ. १९०-९१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रीकाशीनाथभट्टविरचितः

वैदिकतान्त्रिकाधिकारनिर्णयः

***

श्री गं [गणपतये] नमः।

श्रीदक्षिणामूर्तिगुरुभ्यो नमः।

अथ वैदिकतान्त्रिकादीनामधिकारनिर्णयः—शुद्धवैदिकः, तान्त्रिकवैदिकः, शुद्धतान्त्रिकः, वैदिकतान्त्रिकः।

एते चत्वार आत्मज्ञा स्वस्वकर्मानुसारतः।
मार्गाधिकारिणः प्रोक्ताः शिवेन परमात्मना।।
तन्त्रगन्धं न सहते यः सोऽयं शुद्धवैदिकः।
स तन्त्रांशश्रुतिप्रीतः प्रोक्तस्तान्त्रिकवैदिकः।।
वेदगन्धं न सहते यः सोऽयं शुद्धतान्त्रिकः।
स वेदाङ्गागमः प्रोक्तो योऽसौ वैदिकतान्त्रिकः।।
वेदे वेदानुकूले चा(च) अधिकारी तु वैदिकः।
तन्त्रोपसर्जने शास्त्रेऽधिकृत्तान्त्रिकवैदिकः।।
वेदगन्धासहे तन्त्रेऽधिकारी शुद्धतान्त्रिकः।
वेदोपसर्जने तन्त्रेऽधिकृद्वैदिकतान्त्रिकः।।

श्रीमद्विद्यारण्यचरणास्तु—

ससूतसंहितं यत्तु भागधेयं पराशरम्।
शुद्धवैदिकमित्युक्तं विद्वद्भिः शुद्धवैदिकैः।।
शिवराघवसंवादवायवीयादिकं बुधैः।
वेदागमविभागज्ञैः प्रोक्तं तान्त्रिकवैदिकम्।।
वेदगन्धासहं तन्त्रं सोऽयं पाशुपतादिकम्।
शुद्धतन्त्रमिति प्रोक्तं वेदतन्त्रार्थकोविदैः।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पाञ्चरात्रं भागवतं शैवशि(सि)द्धान्तसंज्ञितम्।
सर्वमेतन्महाप्राज्ञैः प्रोक्तं वैदिकतान्त्रिकम्।।
पाणिनीयं जैमिनीयं शास्त्रं वैयासिकं तथा।
भाष्यं यद्भगवत्पादैः प्रोक्तं तच्छुद्धवैदिकम्।।
अक्षपादीयकाणादकापिलानि तथैव च।
पातञ्जलं च तत्सर्वं प्रोक्तं तान्त्रिकवैदिकम्।।
शारदातिलकं तद्वन्मन्त्रदै(दे)वप्रकाशिका।
प्रपञ्चसारं चाशेषं प्रोक्तं वैदिकतान्त्रिकम्।।

श्री[मद्]भागवते—

वैदिकस्तान्त्रिको मिश्र इति मे त्रिविधो मखः।

एतद्व्यवस्था पाद्मे—

वैदिको मिश्रितो वापि विप्रादीनां विधीयते।
तान्त्रिको विप्रभक्तस्य शूद्रस्यापि प्रकीर्तितः।।

इति सङ्ग्रहे।

शैवं पाशुपतं सोमं नाकुलं च चतुर्विधम्।
तन्त्रभेदः समाख्यातः सङ्करं न समाचरेत्।।
एकेन दीक्षितोऽन्येन न कुर्यात् स्थापनक्रिया।
स्थापनं चान्यतन्त्रेण तन्त्रसङ्कर उच्यते।।
तन्त्रसङ्करदोषेण राजा राष्ट्रं विनश्यति।
तस्मात्सर्वप्रयत्नेन न कुर्यात् तन्त्रसङ्करम्।।

यत्तु वामकाः—'मम श्रीगुरुसम्प्रदाय एव मुख्यः' इति जल्पन्ति, तत्तुच्छम्।

श्रीपुरुषार्थप्रबोधे—

सम्प्रदायः प्रमाणं चेद्द्रुत्याद्यैः स विरुध्यते।
यदितरसम्प्रदायाय दूरे दूरे नमो नमः।।
पूर्वाचारः प्रमाणं चेत्तत्तथा नेति को वदेत्।
ऋषयः खलु नः पूर्वास्ते सर्वे शुद्धवैदिकाः।।
रुद्राक्षमालाभरणास्त्रिपुण्ड्राङ्कितमस्तकाः।
शिवलिङ्गार्चनपराः शिवशब्दजपे रताः।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यद्यदाचरति श्रेष्ठ इति कृष्णवचो बलात्।
शिष्टाचारः प्रमाणं चेदस्तु चेच्छ्रुतिसम्मतः।।
ब्राह्मणः क्षत्रियोऽन्यो वा निःशङ्कः परिवर्जयेत्।
शिवाराधनबुद्ध्यैव श्रुत्युक्तं नित्यमाचरेत्।।
वेदानुसारि शास्त्रोक्तं निषिद्धं न कदाचन।
दुर्वाससो मुनेः शापात् कुपिता च महात्मनः।।
कण्वशापाद् भृगोः शापाद् उपमन्योश्च शापतः।
दधीचस्य मुनेः शापाद् गौतमस्य च शापतः।।
विप्राणां दाक्षिणात्यानां पापोपहतचेतसाम्।
शिवे भस्मनि रुद्राक्षे किञ्चिच्छ्रद्धा न विद्यते।।
अवैदिके तु श्रद्धा स्याच्छापदग्धस्य पापिनः।।

इत्यादित्यपुराणादौ। कौर्मे—

पुराणादौ तु तन्त्रांशास्तन्त्राणि तु शिवाज्ञया।
वेदाप्त्युपायबुद्ध्यैव गृह्णीयात्तान्त्रिको मुदा।।
वेदनिष्ठोऽपि तन्त्राणि तान्त्रिकांश्च न दूषयेत्।।

श्रीदक्षिणामूर्तिः—

'त्यक्त्वा वेदविरुद्धानि वेदमेकं समाश्रयेत्'।। इति।

पुरुषार्थप्रबोधे—

क्वचित्तन्त्रानुरोधेन धर्मं पौराणिका अपि।
वदन्ति तादृशोंऽशस्तु ग्राह्यस्तन्त्रावलम्बिना।।
पुराणे धर्मशास्त्रे वा योंऽशः श्रुत्या विरुध्यते।
स तन्त्रार्थस्तु विज्ञेयः समासेन मनीषिभिः।।

ब्रह्माण्डपुराणे हयग्रीवः—

'दक्षिणाचारतन्त्रोक्तं कर्म तच्छुद्धवैदिकम्'।। इति।

स्कान्दे—

'तर्कसिद्धोऽतिदुःखोऽर्थः प्रत्यवायस्य कारणम्।
बहवः केवलं तर्कमाश्रित्य च विना श्रुतिम्।।
रौरवादिषु सन्तप्ता अभवन् वेदवित्तमाः'।।

इत्यादि।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विना वेदेन जन्तूनां मुक्तिमार्गान्तरेण चेत्।
तमसापि विनाऽऽलोकं ते पश्यन्ति घटादिकम्।।
तस्माद्वेदोदितो ह्यर्थः सत्यः सत्यं मयोदितम्।।

तत्रैव—

अतः सर्वं परित्यज्य वेदमेकं समाश्रयेत्।।

शिवः—

यथा भाता स्वपुत्रस्य सत्यमेवाभिभाषते।
तथा सर्वजनस्यापि सत्यं वदति हि श्रुतिः।।
श्रीमते ढुण्ढिराजाय वक्रतुण्डाय वै नमः।
महाविद्याप्रदात्रे च दुःखसंसारहारिणे।।
श्रीशिवादीन् गुरून् नत्वा निगमागमबोधकान्।
आचार्यान् वैदिकान् भक्त्या सर्वार्थसाधकं परम्।।
श्रीविद्योपासनं वक्ष्ये पुराणोक्तं च वैदिकम्।
उपासनस्वरूपं तु मुख्यं तु प्रोच्यतेऽधुना।।
गुरुशिष्येशचिच्छक्तिविद्यातादात्म्यलक्षणम्।
उपनिषत्सु सर्वासु ज्ञानोपास्तिपरासु च।।
महावाक्यानि यानि स्युर्निगमेष्वागमेषु च।
श्रीविद्याख्या महाविद्या तैर्वाक्यैः प्रतिपाद्यते।।
तस्मादियं गोप्यतमा पराविद्येति गीयते।
तत्रानेकविधा मार्गा वैदिकास्तान्त्रिकास्तथा।।
ते सर्वे विविधाचारा विरुद्धाः स्युः परस्परम्।
एकेन कर्तुं नो शक्या भिन्नास्तत्राधिकारिणः।।
वेदोक्ताः स्मृतिभिश्चोक्ताः पुराणोक्तास्त्वनेकधा।
इतिहासप्रणीताश्च निगमागमचोदिताः।।
नानाविधाश्च तन्त्रोक्ता अन्तर्बाह्यार्चने रताः[१]।
तत्र तत्र रता ये स्युस्तत्तदाचारवर्तिनः।।

---

१. 'अन्तर्बाह्यक्रियारताः' इति पाठान्तरम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

[१]स्वस्वमार्गरता ये तु स्वाभीष्टं फलभागिनः।
[२]एकोऽत्र शुद्धश्रौतोक्तः शुद्धतन्त्रोक्त एव च॥
स तन्त्रवैदिकश्चान्यस्तथा वैदिकतान्त्रिकः॥

तत्राऽऽद्यो द्विविधः—

तत्रैवं शुद्धश्रौतस्तु तन्त्रसम्बन्धवर्जितः।
अथर्वणोक्तः श्रौतस्तु तन्त्रनिदानलक्षणः॥
द्वितीयः शुद्धतन्त्रोक्तः श्रौतसम्बन्धवर्जितः।
तन्त्रविशिष्टश्रौतोक्तः सोऽथर्वश्रुतिसम्मतः॥
तथा वैदिकतन्त्रोक्तो ब्रह्मादियामलेरितः॥

एवम्—

वैदिकागमशास्त्रोक्ताः ह्यवैदिकागमेरिताः।
एवं स्मृतिपुराणादौ [३]तन्त्रोक्ताः स्युरनेकधा॥
तत्तन्मार्गरतास्तत्तदाचारास्तत्फलान्विताः।
अन्यमार्गरता ह्यन्यदाचाराः क्लेशभागिनः॥
तस्माद्यथोक्तमार्गस्थो यथोक्तं फलमश्नुते।
एवं विचार्य कर्तव्या ह्युपास्तिरन्यथा वृथा॥
किञ्च ब्राह्मण्यहानिः स्याद्विरुद्धाचारतः स्फुटम्॥

मेरुतन्त्रे—

वामागमो मदुक्तोऽयं सर्वशूद्रपरः प्रिये।
ब्राह्मणो मदिरादानाद् ब्राह्मण्येन वियुज्यते॥
न कर्तव्यं न कर्तव्यं न कर्तव्यं कदाचन।
इदं तु साहसं देवि न कर्तव्यं कदाचन॥

इति। अथास्मन्मातामहानन्तभट्टचरणास्तु—

श्रौतमार्गस्तन्त्रमार्गो मार्गद्वयमुदाहृतम्।
अन्तर्यागो बहिर्याग इति भेदस्तयोः पुनः॥

---

१. 'स्वस्वाचाररता' इति पाठान्तरम्; २. 'तत्रापि' इति पाठान्तरम्।
३. 'तथोक्ताः' इति पाठान्तरम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भावनाध्यानरूपस्तु सैवान्तर्याग उच्यते।
बहिर्याग: क्रियारूपो बालोपचारलक्षण:।।

अथ श्रीमच्छङ्कराचार्यश्रीपादा:—

ये कुर्वन्त्यन्तरार्चैव दहराकाशजेऽथवा।
सहस्रारादिके देव्या: समयाचारवैदिका:।।
दहराकाशजं नाम हार्दाकाशावकाशजे।
श्रीचक्रे देवतां ध्यात्वा मानसैरुपचारत:।।
यजन्त्यथैक्यभावेन यद्वा वाक्यार्थ[१]भावितै:।
समयाचारिणां साऽर्चा वैदिकी ह्यन्तरार्चना।।
वैदिक्यां ह्यन्तरार्चायां बाह्यार्चाङ्गं सुरादिकम्।
नैवास्ति दूरतोऽपास्तं तत्कौलाचारिणां ध्रुवम्।।
नवयोन्यात्मकं चक्रं श्रीचक्रं [२]लेखने स्फुटम्।
अधस्तनं चतुर्योनिरूपं तत्तु शिवात्मकम्।।
शक्त्यात्मकं पञ्चयोनिरूपं तदुपरि स्थितम्।
बिन्दुस्थानं सुधासिन्धुस्तन्मध्ये चतुरस्रके।।

अथाऽथर्वश्रुति:—"श्रीमत्त्रिपुरसुन्दरीं यो वेत्ति स ब्रह्म भवति स ब्रह्म भवति" इत्याह भगवान् हयग्रीव:।

अर्णवे—

यतिर्वा भूपतिर्वापि नान्योऽस्ति [३]मम पूजक:।
यतीनामान्तरं प्रोक्तमितरेषां तथोभयम्।। इति।।

।।इति श्रीमद्धडोपनामक-दक्षिणाचारमतप्रवर्तक-काशीनाथेन विरचितो वैदिकतान्त्रिकाधिकारनिर्णय: सम्पूर्ण:।।

श्रीललिताम्बार्पणमस्तु।। श्रीदक्षिणामूर्तिगुरुभ्यो नम:।।

●

---

१. 'रूपिणीम्' इति पाठान्तरम्; २. 'प्रोच्यते बुधै:' इति पाठान्तरम्।
३. 'त्रिपुरार्चक:' इति पाठान्तरम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परिशिष्टम्- १

वैदिकतान्त्रिकाधिकारनिर्णये

उद्धृतानां ग्रन्थ-ग्रन्थकर्तॄणां मत-मतान्तराणां च नामानि

अक्षपादीयः २
अथर्वणः ५
अथर्वश्रुतिः ५,६
अनन्तभट्टः ५
अर्णवः ६
अवैदिकागमः ५
आगमः ४
आदित्यपुराणम् ३
इतिहासः ४
उपनिषत् ४
उपमन्युः ३
कण्वः ३
काणादः २
कापिलः २
काशीनाथः ६
कृष्णः ३
कौर्मः ३
कौलाचारिणः ६
गौतमः ३
जैमिनीयः २
तान्त्रिकः ५
तान्त्रिकवैदिकः १,२
दक्षिणामूर्तिः ३
दधीचः ३
दाक्षिणात्यः ३
दुर्वासस् ३
धर्मशास्त्रम् ३
नाकुलः २
निगमः ४
निगमागमः ४
पराशरः १
पाञ्चरात्रम् २
पाणिनीयः २
पातञ्जलम् २
पाद्मः २
पाशुपतः २
पुराणम् ३,४
पुरुषार्थप्रबोधः २-३
पौराणिकः ३
ब्रह्माण्डपुराणम् ३
ब्रह्मादियामलम् ५
भगवत्पादः २
(द्रष्टव्यः—शङ्कराचार्यः)
भागवतम् २

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भृगुः	३
मेरुतन्त्रम्	५
वामकाः	२
वायवीयः	१
विद्यारण्यः	१
वेदः	१,४
वेदाङ्गागमः	१
वैदिकः	१,४-५
वैदिकतन्त्रम्	५
वैदिकतान्त्रिकः	१-२,४
वैदिकतान्त्रिकाधिकारनिर्णयः	१,६
वैदिकागमः	५
वैयासिकः	२
शङ्कराचार्यः	६
शिवः	४
शुद्धतन्त्रम्	१,५
शुद्धतान्त्रिकः	१
शुद्धवैदिकः	१-४
शुद्धश्रौतः	५
शैवः	२
शैवसिद्धान्तः	२
श्रीमद्भागवतम्	२
श्रुतिः	३-४
समयाचारवैदिकः	६
सूतसंहिता	१
सोमः	२
स्कान्दः	४
स्मृतिः	४
हयग्रीवः	३,६

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परिशिष्टम्- २

श्लोकार्द्धानुक्रमणी

अक्षपादीयकाणाद. २
अत: सर्वं परित्यज्य ४
अथर्वणोक्त: श्रौतस्तु ५
अधस्तनं चतुर्योनिरूपं ६
अन्तर्यागो बहिर्याग: ६
अन्यमार्गरता ह्यन्यदा. ५
अवैदिके तु श्रद्धा स्यात् ३
आचार्यान् वैदिकान् ४
इतिहासप्रणीताश्च ४
इदं तु साहसं देवि ५
उपनिषत्सु सर्वासु ४
उपासनस्वरूपं तु ४
ऋषय: खलु न: पूर्वा. २
एकेन कर्त्तुं नो शक्या ४
एकेन दीक्षितोऽन्येन २
एकोऽत्र शुद्धश्रौतोक्त: ५
एते चत्वार आत्मज्ञा १
एवं विचार्य कर्तव्या ५
एवं स्मृतिपुराणादौ ५
कण्वशापाद् भृगो: शापाद् ३
किञ्च ब्राह्मण्यहानि: स्याद् ५
क्वचिन्तन्त्रानुरोधेन ३
गुरुशिष्येशचिच्छक्ति. ४
तत्तन्मार्गरतास्तत्त. ५
तत्र तत्र रता ये स्यु: ५
तत्रानेकविधा मार्गा ४
तत्रैवं शुद्धश्रौतस्तु ५
तथा वैदिकतन्त्रोक्तो ५
तथा सर्वजनस्यापि ४
तन्त्रगन्धं न सहते य: १
तन्त्रभेद: समाख्यात: २
तन्त्रविशिष्टश्रौतोक्त: ५
तन्त्रसङ्करदोषेण २
तन्त्रोपसर्जने शास्त्रे १
तमसापि विनाऽऽलोकं ४
तर्कसिद्धोऽतिदु:खोऽर्थ: ४
तस्मात्सर्वप्रयत्नेन २
तस्मादियं गोप्यतमा ४
तस्माद्यथोक्तमार्गस्थो ५
तस्माद्वेदोदितो ह्यर्थ: ४
तान्त्रिको विप्रभक्तस्य २
ते सर्वे विविधाचारा ४
त्यक्त्वा वेदविरुद्धानि ३
दक्षिणाचारतन्त्रोक्तं ३
दधीचस्य मुने: शापाद् ३
दहराकाशजं नाम ६

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दुर्वाससो मुनेः शापात्	३	यद्यदाचरति श्रेष्ठः	३
द्वितीयः शुद्धतन्त्रोक्तः	५	ये कुर्वन्त्यन्तरार्चैव	६
न कर्तव्यं न कर्तव्यं	५	रुद्राक्षमालाभरणा.	३
नवयोन्यात्मकं चक्रं	६	रौरवादिषु सन्तप्ता	४
नानाविधाश्च तन्त्रोक्ता	५	वदन्ति तादृशोंऽशस्तु	३
नैवास्ति दूरतोऽपास्तं	६	वामागमो मदुक्तोऽयं	५
पाञ्चरात्रं भागवतं	२	विना वेदेन जन्तूनां	४
पाणिनीयं जैमिनीयं	२	विप्राणां दाक्षिणात्यानां	३
पातञ्जलं च तत्सर्वं	२	वेदगन्धं न सहते यः	१
पुराणादौ तु तन्त्रांशा.	३	वेदगन्धासहं तन्त्रं	१
पुराणे धर्मशास्त्रे वा	३	वेदगन्धासहे तन्त्रे	१
पूर्वाचारः प्रमाणं चेत्	२	वेदनिष्ठोऽपि तन्त्राणि	३
प्रपञ्चसारं चाशेषं	२	वेदागमविभागज्ञैः	१
बहवः केवलं तर्क.	४	वेदानुसारि शास्त्रोक्तं	३
बहिर्यागः क्रियारूपो	६	वेदाप्त्युपायबुद्ध्यैव	३
बिन्दुस्थानं सुधासिन्धु.	६	वेदे वेदानुकूले च	१
ब्राह्मणः क्षत्रियोऽन्यो	३	वेदोक्ताः स्मृतिभिश्चोक्ताः	४
ब्राह्मणो मदिरादानाद्	५	वेदोपसर्जने तन्त्रे	१
भावनाध्यानरूपस्तु	६	वैदिकस्तान्त्रिको मिश्र	२
भाष्यं यद्भगवत्पादैः	२	वैदिकागमशास्त्रोक्ताः	५
महावाक्यानि यानि स्युः	४	वैदिको मिश्रितो वापि	२
महाविद्याप्रदात्रे च	४	वैदिक्यां ह्यन्तरार्चायां	६
मार्गाधिकारिणः प्रोक्ताः	१	शक्त्यात्मकं पञ्चयोनि.	६
यजन्त्यथैक्यभावेन	६	शारदातिलकं तद्वन्	२
यतिर्वा भूपतिर्वापि	६	शिवराघवसंवाद.	१
यतीनामान्तरं प्रोक्तम्	६	शिवलिङ्गार्चनपराः	३
यथा माता स्वपुत्रस्य	४	शिवाराधनबुद्ध्यैव	३
यदितरसम्प्रदायाय	२	शिवे भस्मनि रुद्राक्षे	३

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शिष्टाचारः प्रमाणं चेद्	३
शुद्धतन्त्रमिति प्रोक्तं	१
शुद्धवैदिकमित्युक्तं	१
शैवं पाशुपतं सोमं	२
श्रीचक्रे देवतां ध्यात्वा	६
श्रीमते ढुण्डिराजाय	४
श्रीविद्याख्या महाविद्या	४
श्रीविद्योपासनं वक्ष्ये	४
श्रीशिवादीन् गुरून् नत्वा	४
श्रौतमार्गस्तन्त्रमार्गो	६
स तन्त्रवैदिकश्चान्य.	५
स तन्त्रांशश्रुतिप्रीतः	१
स तन्त्रार्थस्तु विज्ञेयः	३
समयाचारिणां साऽर्चा	६
सम्प्रदायः प्रमाणं चेद्	२
सर्वमेतन्महाप्राज्ञैः	२
स वेदाङ्गागमः प्रोक्तो	१
ससूतसंहितं यत्तु	१
सहस्रारादिके देव्याः	६
स्थापनं चान्यतन्त्रेण	२
स्वस्वमार्गरता ये तु	५

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

१. एषा देशे विदेशे च लब्धप्रसरा त्रैमासिकी संस्कृतपत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं ज्येष्ठ-भाद्रपद-मार्गशीर्ष-फाल्गुनपूर्णिमासु भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेः समालोचना-प्रवृत्तेश्चोद्बोधनं प्रोत्साहनं चास्ति।

४. अस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां स्वोपज्ञ-विचारपूर्णा अनुसन्धानप्रधाना निबन्धाः प्रकाश्यन्ते।

५. प्रकाशितनिबन्धस्य प्रतिमुद्रणानां पञ्चविंशतिः, पत्रिकायाश्च सोऽङ्को दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।

६. अस्यां पत्रिकायां विशिष्टानां हिन्दीसंस्कृताङ्ग्लग्रन्थानां समालोचनाः प्रकाश्यन्ते। तदर्थं ग्रन्थकृद्भिर्ग्रन्थस्य द्वे प्रतिकृती प्रेषयितव्ये।

७. "**वित्त अधिकारी, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी-२२१००२** (उ.प्र.)" इति सङ्केतेन ('बैङ्कड्राफ्ट' अथवा 'पोस्टल-आर्डर' इत्येतेनैव) मूल्यं प्रेषणीयम्।

८. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः "**सम्पादक, सारस्वती सुषमा, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी-२२१००२** (उ.प्र.)" इति सङ्केतेन विधेयः।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सुसङ्ग्राह्याणि अभिनवप्रकाशनानि

१. **कातन्त्रव्याकरणम्** : आचार्यशर्ववर्मप्रणीतो व्याकरणशास्त्रस्यापूर्वोऽयं ग्रन्थः श्रीदुर्गसिंहकृताभ्यां **कातन्त्र-वृत्ति-टीकाभ्यां**, श्रीमत्त्रिलोचनदासकृतया **'कातन्त्रवृत्तिपञ्जिका'**टीकया, कविराजसुषेणशर्मकृतया **'कलापचन्द्र'**टीकया, अथ च डॉ. जानकीप्रसादद्विवेदिकृतया **समीक्षया,** विवरणात्मिकया भूमिकया, अनुसन्धानात्मक-परिशिष्टैश्च सनाथीकृत्य सुसम्पाद्य प्रकाशितः —

प्रथमो भागः	३५०.००	द्वितीयो भागः खण्डम्-१	५००.००
द्वितीयो भागः खण्डम्-२	६००.००	तृतीयो भागः खण्डम्-१	४८०.००
तृतीयो भागः खण्डम्-२	५००.००	चतुर्थो भागः	८००.००

२. **परशुरामकल्पसूत्रम्** : तन्त्रशास्त्रस्य सूत्रात्मकोऽयं ग्रन्थस्तन्त्रसिद्धान्तैः सह सर्वासामुपासनानां प्रतिपादकोऽस्ति। श्रीरामेश्वरवृत्तेर्मुख्यांशेन समलङ्कृतो **नीरक्षीरविवेका**भिधेन **भाषाभाष्येण** संवलितः प्रो. विद्यानिवासमिश्रैः, डॉ. परमहंसमिश्रैश्च सुसम्पाद्य प्रकाशितः — २८०.००

३. **सौभाग्यरत्नाकरः** : तन्त्रशास्त्रस्य समृद्धोऽयं ग्रन्थः श्रीविद्यानन्दनाथविरचितः सौभाग्यसंवर्द्धनस्य सदुद्देश्येन तरङ्गायितः श्रीविद्यायाः सम्प्रदायसिद्धानां राद्धान्तानां समुपासनपद्धतीनाञ्च प्रतिपादको रत्नाकरसदृशो विराजते। स्वात्मविमर्शाख्यया भूमिकया विभूष्य डॉ. परमहंसमिश्रैः सम्पाद्य प्रकाशितः— ३५०.००

४. **प्राणतोषिणी** : श्रीरामतोषणभट्टाचार्येण प्रणीतस्तन्त्रशास्त्रस्य महनीयोऽयं ग्रन्थः। अस्य प्रथमभागस्य विषयवस्तु सर्ग-धर्म-अर्थेति काण्डत्रयेण विभज्य प्रस्तुतम्। ग्रन्थोऽयं सुविस्तृतया भूमिकया समलङ्कृत्य डॉ. हरिवंशकुमारपाण्डेयेन सुसम्पाद्य प्रकाशितः— प्रथमो भागः ४५०.००
द्वितीयो भागः ४६०.००

५. **जैमिनीयं सामगानम्** : जैमिनिमुनिना प्रणीतं ग्रन्थरत्नमिदं द्वितीयसंस्करणात्मकं प्रकाशतामानीतम्। ग्रन्थेऽस्मिन् सामगानस्यानेकेषां छन्दसामुपबृंहणमस्ति। ग्रन्थोऽयं श्रीरामनाथदीक्षितस्य विस्तृतया भूमिकया सुशोभितोऽस्ति— २००.००

६. **केदारखण्डः** : स्कन्दपुराणीयमाहेश्वरखण्डान्तर्गतकेदारखण्डस्य प्रकाशनं प्रो. वाचस्पतिद्विवेदिनो **हिन्दी-भाषानुवादेन** सह कृतमस्ति। पौराणिककथानकैः सत्कर्मणो भगवत आशुतोषस्य भक्तिभावनायाः सततं प्रेरणाप्रदाने पूर्णरूपेण सक्षमोऽयं ग्रन्थः। प्रो. द्विवेदिनो विस्तृतया भूमिकया सनाथितोऽयं प्रकाशितः— प्रथमो भागः ४६०.००
द्वितीयो भागः ५००.००

७. **सात्वतसंहिता** : वैष्णवतन्त्रस्य मूर्धन्यतमोऽयं ग्रन्थः अलशिङ्गभट्टस्य व्याख्यया सनाथितः प्रकाशतामानीतः। श्रीव्रजवल्लभद्विवेदिना सम्पादितस्य सभाष्यस्य ग्रन्थस्यास्य द्वितीयं संस्करणं प्रस्तूयते— ३६०.००

८. **श्रीमालिनीविजयोत्तरतन्त्रम्** : तन्त्रशास्त्रस्य ग्रन्थोऽयं डॉ. परमहंसमिश्रस्य **'नीरक्षीरविवेक'**भाषाभाष्येण समलङ्कृत्य प्रकाशतामानीतः। ग्रन्थोऽयं सम्पूर्णाध्वावर्गोपरि स्वकीयां स्वतन्त्रां दृष्टिं प्रस्तौति। स्वात्म-विमर्शात्मिकया भूमिकया विभूष्य डॉ. परमहंसमिश्रैः सम्पादितोऽयं ग्रन्थः प्रकाशितः— २४०.००

९. **बौद्धदर्शन और मार्क्सवाद** (परिसंवाद-६) : विश्वविद्यालयस्यास्य श्रमणविद्यासङ्कायेन समायोजितायां सङ्गोष्ठ्यां विश्रुतैर्विद्वद्भिः पठितानां विशिष्टनिबन्धानां सङ्कलनं विहितम्। संस्कृत-हिन्दी-आङ्ग्ल-भाषामयान् निबन्धान् सङ्कलय्य डॉ. रमेशकुमारद्विवेदिना सम्पादितोऽयं ग्रन्थः प्रकाशितः— ३६०.००

१०. **मैत्र्युपनिषद्** : श्रीरामतीर्थविरचितया **'दीपिका'**ख्यसंस्कृतव्याख्यया, प्रो. ओमप्रकाशपाण्डेयेन सनाथितया **हिन्दीव्याख्यया** विस्तृतया भूमिकया सम्भूष्य सम्पाद्य च प्रकाशितोऽयं ग्रन्थः— १८०.००

११. **श्रीमद्भागवत में सांख्ययोग के तत्त्व : एक परिशीलन** : श्रीमद्भागवतस्य दार्शनिकविश्लेषणात्मकोऽयं ग्रन्थः प्रो. विमलाकर्नाटकमहोदयाभिर्हिन्दीभाषायां प्रणीतः। दर्शनेतिहासाख्यपटलद्वयेन विभक्तोऽयं ग्रन्थो विस्तृतया भूमिकया परिशिष्टादिभिश्च सम्भूष्य सम्पाद्य च प्रकाशितः— ४००.००

१२. **तत्त्वबिन्दुः** : श्रीवाचस्पतिमिश्रप्रणीतोऽयं ग्रन्थः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य विश्वविश्रुतस्य सरस्वतीभवन-पुस्तकालयस्य हस्तलिखितपाण्डुलिपिमाधारीकृत्य डॉ. रजनीशकुमारशुक्लेन सम्पादितः प्रकाशतामानीतः— १२०.००

१३. **शिवलीलार्णवः** : महाकविना श्रीनीलकण्ठदीक्षितेन प्रणीतं द्वाविंशसर्गात्मकं महाकाव्यमिदं भगवतः शिवस्य चतुष्षष्टिलीलानां लालित्यपूर्णं वर्णनं प्रस्तौति। सुविस्तृतया भूमिकया विविधैः परिशिष्टैश्च सम्भूष्य डॉ. ददन-उपाध्यायेन सम्पादितमिदं महाकाव्यं प्रकाशितम्— २००.००

पत्रव्यवहारसङ्केतः— **निदेशकः**, प्रकाशनसंस्थानस्य, सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणसी-२२१००२

CC-0. Sampurnanand University Collection. Digitized by eGangotri